सर्वशक्तिसमन्वितपरमेश्वरतः अद्धा साक्षाज्जातम् नतु परम्परया तदुत्पन्नमेतावता परमाण्वादिकारणकत्वं हिरण्यगर्भादिद्वारा जगतो जनिरितिमतं प्रतिक्षिप्तम् 'यो ब्रह्माणं विदधातिपूर्वम्' इत्यादिश्रुत्या परमेश्वरो हिरण्यगर्भमुत्पादयति उत्पन्नश्च तदग्रिमं प्रपञ्चोत्पादयतीति मतस्य भगवति सर्वेश्वरश्रीरामे साक्षादुत्पादकत्व कथनेन निराकृतं भवति, 'यतो वा इमानि भूतानि' इत्यादिश्रुतिस्वारस्यात् न परम्परया जगदुत्पत्तिः परमेश्वरात्साक्षादेव सर्वप्रपञ्चानामुत्पत्तेः एतादृशं समुत्पन्नं जगत् अवितं समुत्पन्नं सदवितं रक्षितं पालितं च भवतीति शेषः । तथा यत्र यस्मिन् परमेश्वरे अन्ते प्रलयकाले लीयते परमेश्वरे एव जायमानजगतो लयो भवतीति 'यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः । मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः' इत्यादिश्रुत्या परमेश्वरे जगतः संहारो भवतीति ज्ञायते । श्रुतिरप्य मुमर्थं पुष्णाति 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति, यत्प्रयन्त्य भिसंविशन्ति तद्विजिज्ञासस्व तद् ब्रह्म' अर्थात् यतः सर्वज्ञसर्वशक्तिसमन्वितात् इमानि परिदृश्यमानान्याकाशप्रमुखपृथिव्यान्तानि कार्यजातानि सर्गकाले जाय मानानि भवन्ति तथा येन परमेश्वरेण जातानि जीवन्ति स्वं स्वं स्थितिं लभन्ते पुनश्च प्रलयकाले विनाशोन्मुखानि यस्मिन् परमेश्वरे एव अभिविशन्ति तत्रैव स्व कीयनामरूपं विहाय शरीररूपेण तत्रावस्थितानि भवन्ति, तदेव ब्रह्म तदेव जिज्ञा स्यं मोक्षार्थिभिर्ज्ञेयमुपास्यञ्चेति । संपूर्णजगतः परब्रह्मश्रीरामादेवोत्पत्यादिकथना त्परमेश्वरे अभिन्ननिमित्तोपादानत्वरूपकारणत्वं प्रतिपादितं भवति । स्मृतिरपि-

'यतः सर्वाणि भूतानि भवन्त्यादियुगागमे ।
यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये ॥'

ततः स्वयंभूर्भगवान् सिसृक्षुर्विविधाः प्रजाः ।
अप एव ससर्जादौ तासुबीजमवासृजत् ॥'

कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम्'

अर्थात् आदियुगागमे कल्पस्यादिकाले सर्गादावित्यर्थः सर्वाणि स्थावर जङ्गमादिभूतानि यतः सर्वज्ञाद्भवन्ति समुत्पद्यन्ते इत्यर्थः । पुनश्च युगक्षये सर्गस्य विरामकाले यस्मिन् ब्रह्मण्येव लयं यान्ति स्वसंहृतिं लभन्ते तद् ब्रह्मेति । तथा विविधा विचित्रा अनेकविधाः प्रजाः सिसृक्षुः स्वयंभूः परमेश्वरः आदौ सर्वप्रथ

Scanned by CamScanner ankurnagpal108@gmail.com

मम् अप एव भूतान्तरोपलक्षितानि जलानि ससर्ज तास्वप्सु बीजं न्यदधात् येन जरायुजादि भूतानामुत्पत्तिर्जाता । कल्पक्षये प्रलयकाले भगवति सर्वस्य प्रलयो भवति कल्पादौ संहृतस्य सर्वस्य पुनराविर्भावो भवतीतिभावः । एकस्मिन्नेव परमेश्वरे जगत उत्पत्तिस्थितिप्रलयकथनेन लोकसिद्धकार्यकारणभावापेक्षया भगवति ततो विलक्षणकार्यकारणभावः कथितो भवति, तथाहि लोके सजातीयं कारणमुपादानं समवायिकारणं भवति यथा घटं प्रति कपालद्वयात्मकम्, विजातीयं चेतनावन्निमित्तकारणं भवति यथा घटं प्रति कुलालः, जगतः समस्य समवायिकारणं परमाणुः कर्तृकारकं कुलालः । तत्र कार्यस्य स्थितिर्विनाशश्च समवायिकारणे एव भवति न तु निमित्ते इह तु सर्वज्ञे श्रीरामे उत्पत्यादिकथनेनाभिन्ननिमित्तोपादानत्वं प्रतिपादितवानाचार्यः । अत्रत्यं तत्त्वम् 'प्रकृतिश्च प्रतिज्ञा दृष्टान्तानुपरोधात् (१।४।२३) इति सूत्रीयानन्दभाष्ये 'यत्सूक्ष्मचिदचिद्विशिष्टं कारणावस्थं ब्रह्म तदेव सृष्टिकाले स्थूलचिदचिद्विशिष्टं भवतीत्युपादानत्वं निष्पन्नतरम् । तत्र प्रकृतिजीवयोर्जगदुपादानत्वे सत्यपि तत्र ब्रह्मणः प्रधानत्वाद् 'वैशेष्यात्तु तद्वादस्तद्वादः' इति न्यायाद् ब्रह्मोपादानं जगदिति वचनमुपपद्यते । न च मृण्मात्रज्ञानेन मृण्मयघटादिदृष्टान्तासङ्गतिः तत्रापि मृदो मृण्मयस्य च कार्यस्य त्रिवृत्कृतत्वेन त्रिभूतात्मकत्वे सत्यपि मृदः प्राधान्यान्मृण्मयमिति वचनमुपपद्यते । यथात्रत्रिवृत्कृते पृथिव्याः प्राधान्यं तत्पृथिवीत्युच्यते । यत्र जलस्य प्राधान्यं तज्जलमित्युच्यते । तथैव चिदचिद्ब्रह्मोपादानकत्वेऽपि जगतस्तत्र ब्रह्मणः प्राधान्याद् ब्रह्मोपादानं जगदित्युच्यते । विकारकार्यं जगच्चराचरं तन्नामध्येयञ्च वाचारम्भणं वागालम्बनमात्रं चिदचिद्ब्रह्मैव सत्यमिति दृष्टान्तदार्ष्टान्तयोः समानत्वान्मृण्मयस्य सर्वस्य मृदुपादानकत्ववत्सर्वस्य जगतो ब्रह्मोपादनकत्वं निष्पन्नतरमेव' इत्यादिरूपेण प्रपञ्चितम् । विशेषस्तु भाष्यविवरणेऽनुसन्धेयः ।

सूर्यो यत्तेजसेन्दुरित्यादि सूर्यो दिनमणिः सरति गगने चलतीति सूर्यः अथवा सुवति कर्मणिलोकं प्रवर्तयतीति सूर्यः दृश्यते च सूर्योदयादनन्तरमेव लोकानां कृषिगोरक्षणादिकार्यकर्तृणां स्वे स्वे कार्ये प्रवृत्तिः, तदीयास्तमयानन्तरं सर्वेऽपि स्व स्व व्यापाराद्विरताः स्वापादिमुखाभवन् निवृत्तसर्वव्यापारा भवन्ति, एतादृशः सूर्यस्तथा, इन्दुश्चन्द्रमा नक्षत्रग्रहादिकश्च तेजसा इन्दुः प्रका

Scanned by CamScanner ankurnagpal108@gmail.com

शितः सन्नेव सकलं सर्वं विश्वजातम्, अविरतं निरन्तरं भासयति प्रकाशविशिष्टं करोति अर्थात् यदिमे सूर्यादयः प्रकाशकतया लोके प्रसिद्धास्ते सर्वे न स्वतेजसा प्रकाशयन्ति लोकान् किन्तु पारमेश्वरतेजो विशिष्टाः सन्त एव तथा कुर्वन्तीति, तथा च श्रुतिः' न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोयमग्निः। तमेवभान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' इति । अर्थात्-तत्र परमेश्वरे सूर्यः सकललोकप्रकाशकः सर्वलोकस्य चक्षूरूपः सूर्यो न भाति, सर्वलोक प्रकाशोऽपि सूर्योऽयं परमात्मानं न प्रकाशयति यथा प्रदीपो न प्रकाशयति सूर्यं किन्तु स्वयमेव सूर्यतेजसाऽभिभूतो भवति, तथा सूर्योऽपि भगवन्तं परमेश्वरं स्वतेजसा नो प्रकाशयति किन्तु तदीयतेजसा स्वयमेवाभिभूतो भवत् प्रकाश कत्वसामर्थ्यं जहाति एवं चन्द्रमाग्रहतारकादयो लोके प्रकाशका अपि न ते परमात्मानं प्रकाशयन्ति, परमात्मप्रकाशाभिभूतप्रकाशत्वात् । तदुक्तम्-

'दिवि सूर्यसहस्रस्य भवेद् युगपदुत्थिता ।
यदि भाः सदृशी सा स्याद् भासस्तस्यमहात्मनः ॥

इत्यादिवचनेन कोटिसूर्यो यदि संभूयैकदैकत्रोदितो भवेत्तदा तत्सदृशः प्रकाशः स्यादपि कदाचित्, परमेश्वरप्रकाशस्य सर्वातिशायिप्रकाशतया न स्वेतरप्रकाशप्रकाश्यत्वं कदाचिदपीति न ग्रहनक्षत्रप्रकाश्यः परमात्मेतिभावः । तदत्रानुसन्धेया गीतार्थचन्द्रिकास्थिता 'वस्तुतोऽवाङ्मनसगोचरे भगवति यथाक थञ्चिन्मनो निवेशार्थमिदमुच्यतेऽन्यथा सूर्यसहस्रस्यापि प्राकृतत्वात्तदीयप्रभाभि रप्राकृतपरमपुरुषप्रभायाः कथं सादृश्यं कथमिव चोपमानोपमेयभावसम्भाव नापि स्यादिति सुधीभिर्विभावनीयम्' इत्यादिरूपा जगद्गुरुश्रीरामानन्दाचार्य श्रीरघुवराचार्यवेदान्तकेसरिणानुगृहीता वाक् । तथा परमेश्वरे विद्युत्तडिदपि न भाति अर्थात् विद्युतः प्रकाशेनापि परमात्मा प्रकाशितो नैव भवति ।

यदा खलु प्रकाशमधिकृत्य महामहिमशालिनां सूर्यादीनां परमेश्वरप्रका शनविषये ईदृशी गतिरर्थात् न ते परमेश्वरं प्रकाशयितुं समर्था भवन्ति तदा अयं प्रत्यक्ष ग्राह्यः काष्ठाद्याश्रिताऽग्निः कुतः समर्थः, अर्थादग्निस्तु तत्प्रकाशने नैव समर्थः संभवति । कुत इमे सूर्यादयो न प्रकाशयन्ति तत्राह-'तमेवभान्तमित्यादि' तमेव परमात्मानं भान्तं प्रकाशक्रियां कुर्वन्तमिदं सर्वं सूर्यचन्द्रादिकमनुभाति

Scanned by CamScanner
ankurnagpal108@gmail.com

अर्थात् परमात्मप्रकाशोत्तरकाले एव सूर्यादिकोपि प्रकाशितो भवति स्व स्व स्वरूपप्रकाशनमपि सूर्यादीनां तत्प्रकाशाधीनमेव, न तु स्वरूपप्रकाशत्वमपि भगवत् प्रकाशमन्तरेणेति ।

ननु यदि सूर्यादिप्रकाशेन प्रकाशनं जाग्रति वस्तुनो न भवति तदा अस्तमिते आदित्ये कस्य प्रकाशेनेदं जगत् प्रकाशितं भवतीति प्रश्नं श्रुत्वा चन्द्र प्रकाशेन अस्तमिते चन्द्रे कथम् ? इत्यादिप्रश्नोन्तराभ्यामादित्यादीनां वस्तुप्रकाशकत्वं श्रुतौ प्रतिपादितं तत्कथं संगच्छते ? तत्राह-'तस्य भासा सर्वमिदं विभातीति' यदिदं सर्ववस्तुप्रकाशनं श्रुतौ समधिगतं न तत् सूर्यादिप्रकाशप्रयोज्यं किन्तु तस्य सर्वप्रकाशकस्य परमेश्वरस्य भासा प्रकाशेन स्वेतरसर्वविलक्षण प्रकाशेन, इदं स्थावरजङ्गमात्मकं जगत् विभाति प्रकाशितं भवति । अर्थात् भगवत् प्रकाशाधीनं वस्तुमात्रस्य प्रकाशनं भवति, अतएव श्रुतौ प्रकाशकप्रश्न प्रतिवचनप्रवाहे' 'वाचैवायं ज्योतिषा' 'आत्मैवायं ज्योतिषा' इत्यादिप्रकरणे नोपसंहृतवान् याज्ञवल्क्यः । तस्मात् परमात्मप्रकाशेनैव सर्वं प्रकाशितं भवति न तु कश्चिदपि परमात्मानं प्रकाशयितुं समर्थ इतिसारः । न केवलमस्मिन्नर्थे श्रुतिरेव प्रमाणं स्मृतयोऽपि जागरुकास्तथाहि-

'यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धिमामकम् ॥ (१५।१२) इति ।

अर्थात्-पार्थप्रतिबोधनावसरे गीतायां कथितं भगवता श्रीकृष्णेन आदित्ये दिनमणौ अविष्वग् भावेन सम्बद्धं सतः यत्तेजः प्रकाशोऽखिलं सर्वं स्थावरजङ्गमात्मकं जगत् पदार्थमात्रं भासयते प्रकाशयति यत् तेजश्च चन्द्रगतं तथाऽग्निगतं च तत्तत्सर्वमेव मामकं मम परमेश्वरस्यैव तेजो न तु सूर्यादीनाम्, मदीयतेजोलेशेनैव ते सूर्यादयोऽपि तेजो विशिष्टा भवन्ति, स्थावरजङ्गमात्मक सर्वप्रपञ्चानां भगवद्विभूतित्वेन वर्णनात् तदुक्तं श्रुतौ-'एतस्यैवानन्दस्यमात्रामुपजीवन्ति अन्यानि भूतानी'ति । एतावता सूर्यादितैजसे प्रतिभासनं तेजो न सूर्यादीनां किन्तु जगत् शेषिणः परमेश्वरश्रीरामस्यैव, तस्मात् सूर्यादितेजसा परमात्मा प्रकाशितो न भवति किन्तु परमात्मतेजसैवान्ये प्रकाशिता भवन्तीति ज्ञेयम् । एतादृशगुणगणविशिष्टो भगवान् श्रीसीतानाथ एव परमेश्वरः । स एव तत्त्वत्रि

Scanned by CamScanner ankurnagpal108@gmail.com

तयमध्ये मणिरिवमणिभूत उपासकैरुपास्यो ज्ञेयश्चेति । 'सूर्यमण्डलमध्यस्थोध्ये यः सीतासमन्वितः' इत्यागमोक्तेः । न केवलं 'जन्माद्यस्य यतः' 'यतो वा इमानि भूतानि जायन्ते' इत्यादिसूत्रश्रुतिसमर्थितं जगज्जन्मादिकारणत्वं परतत्वं परमेश्व रस्य स्वरूपपरिचायकं न वा सूर्यचन्द्रादितेजो धातुः प्रकाशकत्वं परमेश्वरस्व रूपपरिचायकं किन्तु वायुयमादिभयप्रदत्वमपि तत्स्वरूपपरिचायकमिति वक्तुमु पक्रमते 'यद्भीत्या वाति वायु' रित्यादि । 'यद्भीत्या वाति वातः' यस्य सर्व शक्तिम तः परमेश्वरस्य श्रीरामस्य भीत्या भयेन वातो वायुदेवः सर्वदा ईरणस्वभावकः क्षणमपि नैकत्रावस्थितो भवति किन्तु गतिमानेव । वायुर्द्विविधो बाह्याभ्यन्तर भेदात्, तत्र बाह्यो वायुः स्वगात्रेण सर्वं सर्वदापोषयति अमेध्यमपि पवित्रयति । यश्च शरीरान्तः संचारी स शरीराभ्यन्तरे मुखनासिकाभ्यां प्रवेशं निर्गमनं च कुर्वन् सर्वस्य प्राणरूपो भूत्वा सर्वं सर्वदा जीवयति 'वायुर्वै क्षेपिष्ठा देवता' इत्यादि श्रुतिसमर्थितः सर्वस्य प्राणपोषणकारी, यदि क्षणमपि आलस्यं कुर्यात् तदा सर्गकालोपि प्रलयायैव भवेदिति कथितगुणविशिष्टो वायुदेवोपि यस्य भयेनानवरतं भ्रमन्नेव भवति न तु कदाचित् स्वकार्यान्निवृत्तव्यापारो भवति । अर्थात् जगदुपकारकत्वादिमहामहिमो वायुरपि यस्य भयेन सर्वदा स्वकार्ये संलग्नो भवन्नास्तेभोदास्ते । किन्तु सर्वदा वाति देवमनुष्यतिर्यग्, नारकादि प्राणिनिकायेषु संचरणशीलो भवति स श्रीसीतानाथ एव पारमेश्वरं तत्त्वं नान्यः।

तथा 'अवनिरपि' सर्वाधारभूताधरित्री यस्य परमेश्वरस्य भयेन भीता सती सुतलं प्रतिष्ठारहितं पातालं नो याति, किन्तु 'रसा विश्वम्भरास्थिरा' इति स्थिरेति नाम सार्थकयति, अन्यथा यदि कदाचित् ईदृशी न भवेत्तदा स्थिरेति नाम पृथिव्या निरर्थकमेव भवेत्, अर्थादीशभयभीता स्वस्थानात् कदापि न चलति ईदृशगुणयुक्तः परमेश्वरः स चायोध्याधिपतिश्रीरामचन्द्रः एव नान्यः संभवति, स एव तत्त्वत्रयेषु तत्त्वशेखर इति । श्रुतिरप्यमुमर्थं पोषयति-'भी-षाऽस्माद्वातः पवते भीषा उदेति सूर्यः । भयादिन्द्रश्च वायुश्चमृत्युर्धावति पञ्चमः' अर्थात् सर्वनियामकसर्वधारकपरमेश्वरस्य भीषा-भयेन वातः देवेष्वतिशक्ति शालिसर्वदेरणस्वभावोऽपि वायुः पवते चलनादिक्रियां बाह्यरूपमास्थाय करोति, तथाऽन्तररूपमास्थाय प्राणनादिक्रियां कुर्वन्नेवावतिष्ठते, अर्थात्

Scanned by CamScanner
ankurnagpal108@gmail.com

यत्कार्यकरणाय परमेश्वरेण यत्र नियोजितस्तादृशं कार्यमतन्द्रितो भूत्वाऽनवरतं करोत्येव, यथा लोके सुशासकस्याज्ञां शासकभयेन प्रकृतिमण्डलः करोत्येव, यद्यहमेतस्याज्ञां न पालयामि तदा दण्डेदिति मन्वानः' इति भवति वातादिनाम नलसरूपेण स्व स्व कार्यकरणे भयहेतुरेवेति । तथा' भीषा उदेति सूर्यः' अस्य परमेश्वरस्य भीषा भयेन भीतः सूर्यः सर्वप्रकाशकतया देवेष्वतिगरिष्ठोपि उदेति यथाकालमेवनियमत उदयमस्तमयनं च करोति, तथोक्तम्-प्रेरितः काल चन्द्रेण निशि संस्थातुमक्षमः' अर्थात् कालचन्द्रेण परमेश्वरभयेन प्रेरितः स्व भावो निशि रात्रौ स्थातुमहमक्षमः नियमत उदयमस्तमयनं च करोतीति सूर्य वाक्यार्थः, तत्र हेतुं दर्शयति 'भीषा' भीषा भयेन अर्थात् ममानालस्य स्वभावो भगवदाज्ञाप्रयोज्य एव यदहमेतादृशो देवेषु लोके च प्रथितस्वभाव आज्ञामनुवर्ते तदा का कथा मदन्यस्येति । 'भीषाऽस्मादिन्द्रश्चेत्यादि, अस्य महाशक्तिकस्य पर मेश्वरस्य भीषाभयेनैव इन्द्रोबलाभिमानिदेवराजोऽग्निः सर्वदाहकः तथा पञ्चमो यमः सर्वसंहारकारकोऽपि धावति सर्वथा विगततन्द्रा इमे इन्द्रप्रमुखा देवाः सर्गादौ तत्तत्कार्यकरणाय परमेश्वरेण तत्तत्कार्ये विनियोजिता आकल्पं स्वं स्वं कार्यं कुर्वाणा एव भवन्ति न मनागपि तत्तत्कार्ये आलस्यं कुर्वन्ति यदाज्ञया भीताः संभवन्त इति । तथा 'यः सर्वज्ञः स सर्ववित् 'यः परमेश्वरः सर्वज्ञः सर्व पदार्थविषयकसामान्यज्ञानवान् । 'इदं चिदिदमचित्' इत्यादिरूपेण स सर्ववित् प्रातिस्विकतत्तद्रूपेण तत्तत् व्यक्तित्वरूपेण सर्वविषयकज्ञानवानिति श्रुतिरपि प्रमाणम् ।

पुनः स परमात्मा सर्वशेषी 'साक्षी' तत्तत् शुभाशुभकर्मफलभोक्तुर्जीवस्य यानि शुभानि अशुभानि वा कर्माणि तेषां साक्षी साक्षात् द्रष्टा, जीवो हि स्वकीयकर्मणः फलं सुखं दुःखं वा अनुभवन्नपि तत्कारणं साक्षान्नानुभवति, कर्मणामतीन्द्रियेण प्रत्यक्षेणानुभवाभावात् । परमेश्वरस्तु सर्वं सर्वदा पश्यत्, सर्वदैव साक्षादनुभवन् सर्वस्य सदा द्रष्टा साक्षी भवति । एतावता साक्षाद् द्रष्टृत्वं सर्वसाक्षित्वञ्च प्रदर्शितं सर्वेश्वरश्रीरामचन्द्रस्य ।

पुनश्च स परमेश्वरः कूटस्थः कूटवत् अयोघनवत् सर्वदैकरूपेणावस्थितः । यथा प्रस्तरमयः शैलश्रृङ्गप्रदेशो वर्षातपादिसंपर्कयुतोपि तज्जनितसुख-

Scanned by CamScanner ankurnagpal108@gmail.com

दुःखादिविकाररहित एव सर्वदा भवति तथैव परमेश्वरः सर्वदा सर्वथा प्राकृतिकविकारिगुणरहितत्वेन कूटवत् वर्तमानः कूटस्थ इति कथ्यते । सर्वथा सर्वविकाररहितोऽविकारी परमेश्वर इति, तथा स परमेश्वरः एक एव नानेको जीववत् तत्रैकोऽद्वितीयः स्वेतरसकलविलक्षणो मुख्य इति वा असहायो वा नास्ति कश्चिदस्य सहायकः यथा घटादिनिर्मातुर्घटनिर्माणे स्वेतरसहायकचक्रचीवरमृत्तिकाजलादिलक्षणसहायकस्य सहकारिकारणस्यापेक्षा भवति सहायकाभावे सत्यपि कुलाले घटादिकार्यादर्शनात् तद्वत् परमेश्वरस्य जगन्निर्माणे स्वेतरसहायकस्यापेक्षा न भवति । अथवा एकशब्दस्य मुख्योऽर्थः । यथा घटोत्पादने चेतनत्वान्मुख्यं कारणं कुलालस्तदन्येषामचेतनतया गौणत्वं तथैव जगन्निर्माणे मुख्यं कारणं परमेश्वरः तदन्ये गौणकारणरूपा एव । अर्थात् सर्गोत्पादने मुख्यं कारणं प्रदेशः सहकारिकारणमपि तदेव न तु तदन्यत् किञ्चिदपि सहकारितया अपेक्षितमिति । यथा घटाद्युत्पादने मुख्यं कारणं कुलालः सहकारिकारणं कुलालादतिरिक्तं चक्रादिकजन्यभ्रमादिव्यापारवत्तया सहकारिकारणम्, नात्र जगदुत्पादने मुख्यं कारणं किमप्यन्यत्, तदन्यच्च सह कारिकारणं किन्तु प्रकृते यथा लूताकीटः तन्तूत्पादने मुख्यं कारणं सहकारिकारणञ्च भवति तथा जगत् सर्गे ब्रह्मपदवाच्यश्रीरामचन्द्र एव सहायकानपेक्षाभिन्ननिमित्तोपादानकारणं भवति । न च लूतातन्तु स्थले लूताकीटो मुख्यं कारणं तथा मुखनिर्गतलालासम्पादकं तदीयं शरीरमेव सहकारिकारणमितिवाच्यम् केवललूताकीटशरीरस्याकारणत्वात् जीवसंसृष्टजीवस्यैव कारणत्वेन तादृशोभयकारणत्वस्यैकस्मिन्नेव समावेशादितितत्रोभयकारणत्वमेकस्यैव लूताकीटस्य तथैव प्रकृते जगत्सर्जनकार्यं प्रति परमेश्वरस्यैव तदुभयकारणत्वमिति सुष्ठूक्तमेकोऽसहाय इतिसंक्षेपः । तथा स परमेश्वरः 'बहुशुभगुणवान्' तत्र बहवः शुभाः कल्याणगुणाः । 'यः सर्वज्ञः स सर्ववित्' इत्यादिश्रुतिप्रसिद्धसर्वज्ञत्व सर्ववित्त्व 'यतो वा इमानि भूतानि जायन्ते' इत्यादिश्रुतिबोधितजगत्कारणत्व स्थितिप्रलयादिमत्व 'न तत्समश्चाभ्यधिकश्च दृश्यते' इत्यादिश्रुतिप्रसिद्ध 'स माभ्यधिकहरहितत्वकृतित्वकृतज्ञत्वमोहक्रोधहर्षादिमत्वस्थिरप्रज्ञत्वशरणागतवात्सल्यदृढव्रतत्वादिका गुणाः, तत्र भावरूपा अभावरूपाश्च गुणाः यस्मिन् स

Scanned by CamScanner
ankurnagpal108@gmail.com

बहुशुभगुणवान् । तत्र भावरूपो गुणः सर्वज्ञत्वादिः यत्र भावात्मक एव पदार्थः प्रकारो भवति कृतिमत्वादिकं वा सर्वज्ञत्वादिकं वा, अत्र कृतिमत्वं कृत्याश्रयत्वं तत्र भावात्मकः प्रयत्नापरपर्यायरूपा कृतिरेव स्वाश्रये प्रकारतया भाति कृतिमान् कृत्याश्रय एव कर्तेति ज्ञायते, यथा वा सर्वज्ञत्वं तच्च सर्वविषयकज्ञानवत्वमत्रभावात्मकज्ञानपदार्थ एवात्मनि प्रकारतया भासते । अभावात्मको गुणो जगत्कारणत्वादिरूपः । तत्र कार्यसमानाधिकरणात्यन्ताभावप्रतियोगित्वाभावरूपमेव कारणत्वम् यथा घटाधिकरणे विद्यमानोऽभावो न मृत्तिकादेः किन्तूदासीनपटाद्यभावः तादृशाभावप्रतियोगित्वं पटे प्रतियोगित्वाभावोमृत्तिकादौ यतो घटाधिकरणमृत्तिकादेरभावो नैव वक्तुं शक्यते घटाधिकरणे मृत्तिकादेर्विद्यमानत्वादन्यया घटादिकं प्रति मृत्तिकादेः कारणत्वमेव न स्यात् ततश्च लोकसिद्ध कार्यकारणभावपरिभाषैवास्तमियात् । ततश्च कारणत्वादिकमभावरूपो धर्म इतिजगत्कारणत्वात्मकाभावरूपगुणवान् परमेश्वरः । अत्र कारणत्वाभावे न्याय मतपरिभाषिकगुणत्वं नास्ति कारणत्वस्याभावरूपत्वात्, न्यायमतसिद्धरूपाद्यन्यतमस्य भावरूपत्वेन भावाभावयोस्तादात्म्यासंभवात् तथापि गौणत्वमेवात्र गुणत्वं विवक्षितम् । एतादृशगौणत्वरूपं गुणत्वं भावाभावोभयसाधारणमिति भावाभावात्मकानेकासंख्येय कल्याणगुणादिकाबहवो गुणाः सन्ति यत्र स बहुशुभगुणवानिति । एतादृशबहुशुभगुणवान् भगवान् श्रीसीतानाथ एव नान्य इतिसारः । तदत्र श्रीमद्रामायणविषये वादीभकण्ठीरवश्रीमधुराचार्यप्रणीतश्रीभगवद्गुणदर्पणे प्रतिपादिता दयादि प्रीत्यन्तानेकगुणानुसन्धेयाविशेषार्थिभिः ।

तथा स-'अव्ययः' तत्र व्येति विनश्यतीतिव्ययः न व्येति न विनश्यतीत्यव्ययः । अर्थात् विनाशात्मकचरमभावविकाररहितोऽव्ययः सर्वविकारहितः, तत्र पदार्थानां विनाशो द्विप्रकारेण भवति, क्वचिद् गुणादिधर्मनाशपूर्वको विनाशः क्वचिद् धर्मिणो विनाशपूर्वक एव विनाशः । तत्राद्यो यथा यत्र धर्मीस्वरूपेण यथा पूर्वमवस्थितोऽपि गुणादिधर्मस्य कारणबलेन विनाशो भवति यथा श्याम घटो विलक्षणतेजः संयोगेन श्यामगुणनाशेन पाकवशात् रक्तो जायते तत्र श्यामो घटो नष्टः रक्तघटश्चोत्पन्न इति व्यवहारो जायते । तत्र स्वरूपतो घटो न नष्टः किन्तु विशेषणस्य श्यामत्वगुणस्यैव पाकेन नाशो जातः परन्तु गुणात्मकवि

Scanned by CamScanner ankurnagpal108@gmail.com

शेषणनाशाधीनविशेष्येऽपि विनाशप्रत्ययो जायते इति प्रकृते गुणविनाश पूर्वकद्रव्यस्यापि विनाशः कथितो भवति । यत्र तु घटादिरूपः पदार्थो दण्डादि प्रहारेण विनष्टस्तत्र घटादिरूपधर्मिणः स्वरूपेण नाशो जायते इत्ययं विनाशो धर्मिणः स्वरूपनाशः । विशिष्टविनाशस्तु त्रिधा भवति क्वचिद्विशेषणनाश-पूर्वकः क्वचिद्विशेष्यनाशपूर्वकः क्वचित्तदुभयविनाशपूर्वकः । यथा यत्र दण्डा दिविशेषणनाशेन दण्डी विनष्टः इति प्रतीतिर्जाते, तत्र पुरुषस्तु विद्यते एव किन्तु पुरुषात्मकदण्डीति विशिष्टैकदेशविशेषणस्य विरहपूर्वको विशिष्टस्य विनाशो जातः । यत्र तु दण्डात्मकविशेषणं यथा पूर्वमवस्थितमेव अर्थात् दण्डस्तत्र विद्यते एव पुरुषस्तु तत्स्थानं परित्यज्यान्यत्र गतस्तत्रापि दण्डसत्वेऽपि पुरुष विरहप्रयुक्तो दण्डीनास्तीति प्रत्ययो भवतीति विशेष्यविरहप्रयुक्तो विशिष्टस्य दण्डिनो विरहो जायते । अत्र विशेष्यपुरुषविरहप्रयुक्त एव विशिष्टस्य विरहः, विशेषणस्य यथा पूर्वमवस्थितत्वात्, दण्डं तत्रैव निधायपुरुषस्तत्थानं प-रित्यज्यान्यत्र गत इति । यत्र दण्डरूपविशेषणमपि विनष्टं पुरुषोऽपि तत्स्थानं परित्यज्यान्यत्र प्रव्रजितस्तत्र विशेषणविशेष्योभयविरहप्रयुक्तो विशिष्टस्या-भावो, यतः तदुभययोरपि विरहात् । यथा वा 'शिखी विनष्ट' इत्यादौ सत्यपि शिखिनि शिखाविनाशाधीनः शिखिनो विनाशव्यवहारः, शिखायां यथा पूर्वम वस्थितायामपि शिखिनो विशेष्यस्यैव विरहप्रयुक्त एव 'शिखी विनष्ट' इति प्रत्ययो जायते तत्र विशेष्यविरहप्रयुक्तो विनाशः । क्वचित्तदुभयविरहप्रयुक्त एव तादृशविनाश इत्यत्र विशेषणविशेष्योभयप्रयुक्तः शिखी विनष्ट इत्यादि व्यवहारः । एवमेवान्यत्रापि यथामति उदाहरणं प्रदर्शनीयम् । परन्तु प्रदर्शितो विनाशक्रमो जन्यानां स्वरूपतो विशेषणतो नित्यानामपि कदाचित् भवति । अर्थात् यो हि जन्यः पदार्थः स कदाचित् स्वरूपतः क्वचित् विनश्यति, कदाचि द्विशेषणनाशाधीनो विनश्यति क्वचित्तदुभयविनाशाभ्यां विनश्यति । नित्योऽपि पदार्थः यत्र जन्यगुणंधर्मादिविशेषणवत्तया प्रतीतो भवति तत्र विशेषणविना शेन तद्विशिष्टतया विनश्यतीति व्यवहारभाग् भवति । यस्तु विशेषणविशेष्यो भयरूपेणाजन्यस्तत्र तदुभयोरजन्यत्वेन नित्यत्वात् कदापि केनापिरूपेण विना शो न जायते यथा जलीयतैजसवायवीयपरमाणूनाम्, तत्र तदीयपरमाणु

Scanned by CamScanner
ankurnagpal108@gmail.com

तद्गतगुणानामपि नित्यत्वात्, तथैव प्रकृते परमेश्वरगुणानाम् परमेश्वरस्य च नित्यत्वेन न तस्य परमेश्वरस्य तथा तदीयगुणस्य विनाशो जायते । अर्थात् 'सत्यं ज्ञानमानन्दं ब्रह्म' 'नित्यो नित्यानाम्' अजो नित्यः शाश्वतोऽयं पुराणः' 'वेदाविनाशिनं नित्यम् य एनमजमव्ययम्' इत्यादिश्रुतिस्मृतिशतैर्भगवतस्वरूपस्य तदीयगुणानाञ्च नित्यत्वव्यवस्थापनेन भगवत् स्वरूपवत् तदीयगुणानामपि तथात्वात् न भगवतः स्वरूपेण गुणद्वारेण वा विनाशो जायते इति उभय प्रकारकव्ययरहितो भगवान्, अव्ययः सर्वदा सर्वप्रकारकव्ययरहित इति। एतत्सर्वं हृदि निधाय अव्ययेति विशेषणं भगवति प्रक्षिप्तवानाचार्यः । विशेष प्रपञ्चः सूरिभिः स्वयमेवोहनीयः ।

तथा एतादृशगुणगणविशिष्टः परमेश्वरश्रीरामचन्द्रो 'विश्वभर्ता' विश्वस्य सर्वस्य जनिमतः पदार्थस्य भर्ता पालनपोषणकर्ता तत्र पालकः सर्वापत्तिभ्यो रक्षणकर्ता पोषकः सर्वस्य संवर्धकः । यथा कश्चिन्मालाकार उपवनं निर्माय तत्र बकुलचंपकाम्रपनसादिवृक्षान् मृगादिपशुभ्यो वृक्षघातकेभ्यो रक्षणं करोति तथा जलादिना संसिच्य वर्धयति, यथा वा माता पिता पुत्रमुत्पादयति उत्पाद्यापद्भ्यो रक्षणं कुर्वन्तौ हिते नियोज्य तदीयसंसारयात्रां निर्वाहयतः तथैव परमेश्वरो जगदुत्पादरक्षणपोषणादिकं कुर्वन् विश्वस्य जगतो भर्ता भवतीति विश्वभर्तेति कथ्यते ।

'श्रीमानर्च्य' इत्यादि । शोभारूपाश्रीरनपायितया सम्बद्धा विद्यते यस्य स श्रीमान् । अर्थात् सर्वातिशायिनी नैयत्येन विद्यमानः शोभायुक्तः, यद्यपि सर्वोपिरूपलावण्यादिशोभयायुक्त एव भवतीति शोभात्मकश्रीसम्पन्नत्वं न विशेषाधायकं तथापि यादृशी शोभा स्वाश्रयं कदापि न व्यभिचरति तादृशी शोभैवात्र श्रीपदवाच्या भवति । अर्थान्नित्यशोभया युक्तः । 'प्रसन्नतां या न ग ताभिषेकतः । तथा न मम्लौ वनवासदुःखतः । मुखाम्बुजश्रीरघुनन्दस्य मे स दास्तु सा मञ्जुलमङ्गलप्रदा' श्रीमद्रामचरितमानसे २।२ इति कविकुलकमलदि वाकर जगद्गुरुश्रीतुलसीदासोक्तिः । अनेनागमापायिशोभाविवर्जितनित्यशो भायुक्तत्वं श्रीमानिति पदेन ध्वनितम् । अथवा सर्वदा सूर्यस्य प्रभावत् नित्यान पायिनी श्रीसीतारूपा श्रीर्विद्यते यस्य स श्रीमान् 'अनन्या राघवेणाहं भास्करेण

Scanned by CamScanner ankurnagpal108@gmail.com

प्रभा यथा' यथा सूर्यस्य प्रभा प्रकाशः सूर्याद्वियुज्य क्षणमप्यन्यत्र न भवति तथैव श्रीराघवेणाहमनन्या, जलतरङ्गवदभिन्नेत्यर्थः । इति श्रीमद्रामायणीय महर्षिश्रीवाल्मीकिवचनप्रामाण्यात्सूर्यप्रभावन्नित्यसम्बद्धा श्रीसीतासर्वेश्वरात् ।

'आवयोर्नित्यसम्बन्धः शक्तिशक्तिमतोरिव ।

मया विना वदन् रामं रामं विना वदंश्च माम् ॥

वदत्यावां यतश्चावामभिन्नावेव सम्मतौ ।

करुतेत्वधमो मूढो भेदबुद्धिं य आवयोः ॥

यावच्चन्द्ररवी तस्य तावद्धि निरयोस्थितिः

इत्यादिरूपेण सर्वेश्वरीश्रीसीतयास्वयमेवोपदिष्टत्वाद्धनुमन्तंप्रति (वशिष्ठ संहिता) न च तर्हि कथं पञ्चवटीतः श्रीरामाद्वियुज्य चिरमुवास लङ्कायामिति वाच्यम् लीलामात्रत्वात्परमेश्वरस्येति गृहाण । अर्थात्-भगवान् श्रीरामचन्द्र मर्यादापुरुत्तमः स कदाचिदपि लोकमर्यादां न तत्याज इति लोकमर्यादाम नुरुद्ध्यैव सर्वं कृतवानिति लौकिकाः । अत्रत्यं तत्वं 'अनन्या च मया सीता भास्करेण यथा प्रभा' 'अनन्या राघवेणाहं भास्करेण प्रभा यथा' इत्यादि श्री मद्रामायणीयवचनस्वारस्यात् श्रीवशिष्ठसंहिताप्रभृतिपूर्वाचार्यदिव्यप्रबन्धेभ्यो म दीयान्यनिबन्धेभ्यः पुराणादितोवावगन्तव्यम् । अथवा श्रीराज्यरूपाधनाद्यधिष्ठा तृदेवतारूपा लक्ष्मीर्विद्यते यस्य स श्रीमान् परमेश्वरस्य सर्वशासकतया लीलावि भूतिभोगविभूत्यादिसर्वशासकत्वेन लक्ष्मीयुक्तत्वं सर्वदैवेति स सर्वदैव श्रीमान् सर्वाधिपतित्वेन गीयते इति ज्ञेयम् । तथा स भगवान् 'अर्च्यः' बहुविधविबु धैर्विधिभवप्रमुखैराराधयितुं योग्यः, तत्र विधिः सर्वप्रथमो हिरण्यगर्भः 'हि रण्यगर्भः समवर्तताग्रे 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्राहिणोति तस्मै' इत्यादिश्रुतेः, अर्थात् अग्रे सर्वस्योत्पत्तेः प्रागेव हि रण्यगर्भ एतन्नामकः प्रथमो जीवः समवर्तत उत्पन्नोऽभूत् अत एवायं प्रथमो जीव इत्युच्यते । तथा यः सर्वशक्तिमान् परमेश्वरः पूर्वं सर्वप्रथमं ब्रह्माणं हिरण्यगर्भं विदधाति समुत्पा दयति तथा यः परमेश्वरः ब्रह्माणं समुत्पाद्य संसारयात्रानिर्वाहाय तस्मै हिरण्य गर्भाय वेदान् ऋगादिकान् साङ्गान् प्राहिणोत् अददात् अर्थात् ब्रह्माणमुत्पाद्य तस्मै वेदान् प्रददौ-

Scanned by CamScanner ankurnagpal108@gmail.com

'सृष्ट्यादौ च सिसृक्षुः श्रीरामो विधिं विधाय हि ।
सृष्टये प्रेषयामास वेदं ज्ञानमहानिधिम् ॥'

इतिवशिष्ठसंहितोक्तेः । उपर्युक्तलक्षणलक्षितो विधिः तथा भवः शिवः भवति जगदस्मादिति । हिरण्यगर्भादिप्रधानैर्जीवादिभिः सर्वथा सर्वदा आराधयितुं योग्यो ब्रह्मादीनां देवाग्रणीनामपि बहुविधविविधप्रकारेण सर्वदा पूजनीयः श्रीरामचन्द्र इति भावः-

'श्रीरामस्य मनुं काश्यां जजाप वृषभध्वजः ।
मन्वन्तरसहस्रैस्तु जपहोमार्चनादिभिः ।
ततः प्रसन्नो भगवान् श्रीरामः प्राह शङ्करम् ।
वृणीष्व यदभीष्टं तद्दास्यामि परमेश्वर ।'

(श्रीरामोत्तरतापनीयोपनिषद्) इत्यादिश्रुत्या-

'यस्यामलं नृपसदस्सु यशोऽधुनापि,
गायन्त्यघघ्नमृषयोर्दिगिभेन्द्रपट्टम् ।
तं नाकपालवसुपालकिरीटजुष्टं,
पादाम्बुजं रघुपतेः शरणं प्रपद्ये'

भागवते इत्यादिभिः तथा

'आराध्यं ब्रह्मरुद्रादेर्जगद्धेतुञ्च मुक्तिदम् ।
दिव्यदेहं गुणाम्भोधिं रामं ब्रह्मसमाश्रये ॥'

इत्यादि जगद्गुरुश्रीरामानन्दाचार्यवचनैश्चाभिव्यज्यते ।

तथा स श्रीरामचन्द्रः 'शरण्यः' शरणे रक्षणे साधुर्योग्यः, सर्वस्य रक्षणे करणे सर्वथा समर्थस्तथा सर्वस्य चिदचिदामकपदार्थजातस्य आयतनरूपश्च । 'शरणं रक्षणे गृहे' इतिकोशात् शरणशब्दार्थो रक्षणपरकम् । तत्र यदा जयन्तः श्रीसीतादेव्या अपमानं कृत्वा भयभीतो भूत्वा पलायितः तदा श्रीसीतायास्तादृशीमवस्थां दृष्ट्वा संस्तरात्तृणमादाय तं ब्रह्मास्त्रेण नियोज्य वायसं प्रति प्रक्षिप्तवान् । 'सदर्भं संस्तराद् गृह्य ब्रह्माऽस्त्रेण नियोजयत् । स प्रदीप्त इव कालाग्निर्जज्वालाभिमुखो द्विजम् । स तं प्रदीप्तं चिक्षेप दर्भं तं वायसं प्रति । त्राणकाम इमं लोकं सर्वं वै विचचार ह । त्रीँल्लोकान् सम्परिक्रम्य तमेव शरणं

Scanned by CamScanner
ankurnagpal108@gmail.com

गतः' इत्यादिप्रकरणेन ज्ञायते यत् स जयन्तकाकः पित्र्यादिभिररक्षितोऽन्यत्र शरणमलब्ध्वा भगवतो रामचन्द्रस्यैव शरणागतिं स्वीचकार, ततो निग्रहानुग्रह करणे समर्थो भगवान् शरणागतं 'हिनस्तु दक्षिणाक्षित्वच्छर इत्यथ सोऽब्रवीत्' इत्यादितदनुमतमेकमक्षि विनाश्य शरणं दत्वाऽरक्षयत् । 'वधार्हमपि काकुत्स्थ कृपया पर्यपालयत्' इतिमहर्षिश्रीवाल्मीकिवचनात् । लौकिको हि शरण्यो न शरण्योऽपि तु शरण्याभासोऽयं तु सर्वसमर्थः शरणं दत्वा कृतार्थयति प्रपन्नम्, तथोक्तं स्वयमेव-

'सकृदेव प्रपन्नाय तवास्मीति च याचते ।
अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम ॥

इत्यादिना ज्ञातं भवति यदयं भगवान् तापत्रयपरीतप्तानां तापत्रयाद्वि मोच्याभयात्मकज्ञानानंदलक्षणं स्वपदं समर्प्य कृतार्थयतीति सर्वथाऽयं सर्वेश्वरश्रीरामः शरण्यः । तथा अयं चिदचित्पदार्थमात्रस्य शेषितयाऽन्तर्यामी भूत्वा सर्वस्यायतनमपि भवतीति तत्त्वम् । यथा मार्गे भ्रमणात् उद्विग्नहृदयः पथिकः श्रान्तो भूत्वा निरापदमाश्रयमन्वेषयन् तादृशं गृहाद्याश्रयं प्राप्य तत्र श्रान्त्याद्यपनोदनपूर्वं निस्सीममानन्दं संप्राप्य सुखीभवन् स्वात्मानं कृतार्थमिव मनुते, तथैव भवभ्रमणश्रान्तमुद्विग्नमानसं स्वकृतकर्मसंसारं प्राप्तचेतसं शरणे समागतं भगवदायतनरूपमायतनप्राप्तं संसाररूपबन्धरहितं कृत्वा परमपदं समर्प्य कृतार्थयन् तस्यायतनरूपो भवति, अत एव 'रक्षकमायतनं वेत्यनुक्त्वा तदुभयबोधकपदस्य शरण्यस्यैव प्रयोगं कृतवान् भगवानाचार्यः । तथा 'योगि गम्यांघ्रिपद्मः' योगं युञ्जन्ति ये ते योगिनः योगश्च चितवृत्तिनिरोधरूपः ततश्च यमनियमासनप्राणायामप्रत्याहारधारणा द्वारा सविकल्पकध्यानं कृत्वा निर्वि कल्पकसमाधिना परमात्ममननशीला ये ते योगिनः श्रीशुकसनकसनन्दनप्रभृति कनित्यसिद्धाः सूरयः प्रत्यक्षसमानाकारतां प्राप्य तैलधारावदविच्छिन्नानुध्यानात्म कज्ञानशीलास्तेषां गम्यं प्राप्यं ये ये गत्यर्थास्ते ते प्राप्त्यर्थाः इतिनियमेन तदीयं चरणकमलं प्राप्यं भवति स योगिगम्यांघ्रिपद्मः स सर्वशेषी अर्थादुभय विभूतिनायको भगवान् नित्यसूरिभिः प्राप्तो भवति । यद्यपि यावत् संसारं भगवदुपासनं कृत्वा स्वकर्मभोगान्ते परित्यज्य संसारं परमपदे मुक्तजीवेन प्राप्त

Scanned by CamScanner ankurnagpal108@gmail.com

चरणकमलो भवत्येवेति सूरिणैव प्राप्यो भवतीति कथनं न समीचीनं इवाभाति, तथापि मुक्तस्य द्वयी अवस्थे भवतः संसारावस्था मोक्षावस्था च, तत्र संसारावस्था पूर्वावस्थेति कथ्यते मोक्षावस्था चोत्तरावस्था, तत्र मोक्षावस्थायामेव भगवच्चरणप्राप्तो भवति न तु पूर्वावस्थायां प्राप्तचरणकमलो भवति, नित्यसिद्धास्तु सर्वावस्थायामपि प्राप्तभगवच्चरणकमला भवन्ति । यद्यपि मोक्षावस्थायामुभयोः समानत्वं तथापि नित्यसिद्धा अदृष्टसंसाराः, मुक्तास्तुपूर्वावस्थायां दृष्टसंसारा इति मुक्तानामुपलक्षणविधयाकाकवन्तो देवदत्तगृहाः, इत्यादौ काकाभावेपि काकसत्तानापगता भवति किन्तु अनुसरत्येव तथैव मुक्तस्यापि पूर्वावस्थोपलक्षणविधयाऽनुवर्तते । नित्यमुक्तस्य तु पूर्वावस्थारूपसंसारस्यानुवर्तनं सत्वं वा विशेषणविशेष्यविधया न भवतीत्येतावानेवभेदः । एतादृशादृष्टसंसारयोगिभिः प्राप्तचरणः श्रीरामचन्द्रः ।

पुनरपि श्रीरामः क्लेशादिभिरस्पृश्यः, तदाह भगवान् पतञ्जलिः-'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः' तत्र पञ्चक्लेशाः 'अविद्यास्मिता रागद्वेषाभिनिवेशाः पञ्चक्लेशाः । एतेषां विशेषस्वरूपं तु अस्मद्गुरुचरण जगद्गुरुश्रीरामानन्दाचार्यश्रीयोगीन्द्रप्रसादितयोगसूत्रविवरणतोऽवगन्तव्यम् । तात्पर्यायस्तु तत्रा तस्मिंस्तद् बुद्धिरविद्या विपरीतज्ञानम् । यथा शङ्खे पीतिमग्रहः शरीरे आत्मबुद्धिरात्मनि वा शरीरबुद्धिः एतत्कार्यमस्मिताया राग आसक्तिरनुरंजनम् द्वेषः प्रसिद्धः, अभिनिवेशो मरणत्रासः संसारिणां हिरण्यगर्भादारभ्य कीटपतंगादिजीवानां समान एव । कर्मशास्त्रविहितप्रतिषिद्धक्रियाजनित शुभाशुभपुण्यपापरूपमेव, यत् अग्निहोत्रादिजनितं कलंजभक्षणादिजनितं च । विपाको जात्यायुर्भोगलक्षणकः । आशयो वासनासंस्कार इति एभिः कर्मादिभिः सर्वदैवापरामृष्टोऽसम्बद्धः, यथा पुण्यपापवासनयाऽविद्यावृतजीवः परिष्वक्तो भवति न तथेश्वर एभिः परामृष्यते । एतादृशः परमेश्वरो निराकारोऽपि तु साकारः । किमाकारः ? तत्राह सूत्रे-'पुरुषविशेषः' 'स वा एष पुरुषविधः पुरुष एवेदं सर्वम् इत्यादिश्रुत्या पुरुषाकारः एतावता निराकरवादी न योगसङ्गत इतिनिरस्तो बोध्यः । विशेषस्तु तत्रैव विवरणतात्पर्ये । तथा श्रीरामचन्द्रः सत्समुदितसुयशाः' सद्भिर्वाल्मीकिव्यासादिपरमऋषिभिर्यशांसि समीचीनरूपेण

Scanned by CamScanner ankurnagpal108@gmail.com

लोके प्रख्यापितानि यस्य स अथवा सन्ति लोके प्रख्यातानि यस्य स सत्स मुदितयशाः अर्थात् दशरथकुलेऽवतीर्य्य स्वयं सर्वशक्तिमान् अन्यैः प्रयत्न पूर्वकमपि यत् रावणखरदूषणवालिनिग्रहादीनि कार्याणि मनसाप्यालोचयितुमयोग्यानि, तान्यप्रयत्नेनलीलान्यायेनैव संपादितानि एतादृशविशिष्टसामर्थ्यवानिति तस्य यशो लोके दिगन्तप्रसिद्धम् इति लोकप्रसिद्धकीर्तिमान् स श्रीरामः । प्रथमपक्षार्थः तत्र सन्तोवाल्मीकिप्रभृतयः भगवद्गुणानुवादकरणात् सन्त इति कथिता भवन्ति । तत्र प्रथमः कविर्हिरण्यगर्भः, द्वितियस्तु श्रीवाल्मीकिप्रभवः, तृतीयस्तु श्रीपराशरामत्मजः, तत्र हिरण्यगर्भः वेदान् भगवतोऽधिगत्य मन्त्रस्वरूपेण निर्माय वेदद्वारा भगवतो यशो वर्णितवान् अर्थात् 'यतो वा इमानि भूतानि जायन्ते' इत्यादिना भगवति जगदुत्पत्तिस्थितिप्रलयकर्तृत्वं प्रदर्शितम् 'सत्यं ज्ञानमानन्दं ब्रह्म' इत्यादिश्रुत्या तस्मिन् भगवति भवे त्रिकालाबाध्यत्व-अजडत्वात्मकस्वप्रकाशज्ञानरूपत्वं सर्वेषामनुकूलत्वात्मकानन्दरूपत्वमानन्दरूपं प्रदर्शितवान् । तथा बृहत्वात् व्यापकत्वं चिदचिदादिस्थावरजङ्गमानां परिणमयितृत्वान् चिदचिद्वैशिष्ट्यं प्रदर्शितम् तथा 'एतस्यैवाक्षरस्य प्रशासने गार्गि सूर्या चन्द्रमसौ विधृतौ तिष्ठतः' इत्यादिश्रुत्या सूर्यादिचिदचित्पदार्थस्य धारकत्वं सूर्यादिसकलपदार्थानां धार्यत्वं प्रदर्शितं वेदवाक्यादेव । तथा 'यः पृथिव्यां तिष्ठन् यस्य पृथिवीशरीरं यं पृथिवी न वेद यः पृथिवीमन्तरो यमयति स ते आत्माऽन्तर्याम्यमृतः' यो विज्ञाने तिष्ठन् विज्ञानमन्तरो यमयति यं विज्ञानो न वेद यस्य विज्ञानं शरीरं स ते आत्माऽन्तर्याम्यमृतः' इत्यादिश्रुत्या पृथिव्यादिपदार्थानां परमेश्वरशरीरत्वं भगवतश्च पदार्थमात्रस्य शरीरित्वं प्रतिपादितम् । तथा 'यः पृथिव्याम्' इत्यादि श्रुतिनिकरैः पृथिव्यादिजडचेतनस्य नियाम्यत्वं भगवतश्च सर्वचिदचिन्नियामकत्वं कण्ठरवेण प्रतिपादितम् । तदेवं प्रकारेणादिकविहिरण्यगर्भः लीलोपकरणस्य सकलपदार्थस्य भगवत् शेषत्वं भगवतश्च सर्वशेषित्वं स्वकीयनिर्मितकाव्यरूपवेदादुपवर्णयन् भगवतः कीर्तिमेव लोके प्रख्यापयामास । अतएवायं हिरण्यगर्भः आदिकविरिति नाम्ना लोके प्रसिद्धिं गतः । ततो बहुकाले गते लोकानां स्वल्पायुकृतो वेदस्यातिकाठिन्यमनुभवत् तमेव वेदार्थः स्वमतिसरलं लौकिकछन्दोबद्धं श्रीमद्रामायणं श्रीरामप्रतिपादकगायत्रीव्याख्यानरूपं निर्माय

Scanned by CamScanner ankurnagpal108@gmail.com

लवकुशप्रभृतीमध्याप्य लोके भगवतः श्रीरामचन्द्रस्य कीर्तिं विस्तारयामास, सोऽयं द्वितीयकविः त्रेतायां सम्बभूव । 'वेदवेद्येपरेपुंसि जाते दशरथात्मजे । वेदः प्राचेतसादासीत्साक्षाद्रामायणात्मना' इत्यागमोक्तेः । ततः पूर्वोक्तकालद्वयादपि अतिविषमे द्वापरकलियुगयोः सन्धिकाले समागते प्रचाराभावात् लोकानां बुद्धि-आयुष्यादिदौर्बल्येन वेदश्रीमद्रामायणयोः प्रचारस्याल्पत्वेन प्रचारेऽत्यल्पतां गते परमकारुणिको वेदव्यासः परमात्मरूपेण भुवि समागत्य विलुप्तप्रायं वेदं वेदार्थोपबृंहकपुराणमष्टादशमुपपुराणं च निर्माय तत् द्वारा वेदार्थलक्षण भगवतः ख्यातिं लोकेऽकरोत् । ततश्च श्रीवेदव्यासकाव्यं परमेश्वरोपवर्णनेनैव सार्थकमिति प्रसिद्धिः । तदत्र कवित्रितयहार्दमतिसमासेन प्रदर्श्यते ग्रन्थगौरव भिया । तथाहि-'सहस्त्रधारे विततते पवित्र आवाचं पुनन्ति कवयो मनीषिणः । रुद्रास एषामिषिरासो अद्रुहः स्पर्शः स्वञ्चः सुदृशो नृचक्षसः' (ऋग्वेद ९।७३। ७-वेदरहस्यम् ८) 'सचन्त यदुषसः सूर्येण चित्रामस्य केतवो रामविन्दन् । आयन्नक्षत्रं ददृशे दिवो न पुनर्यतो न किरद्धानुवेद' (ऋ. १०।१११।७-वेद रहस्यम् १४६) 'अर्वाची सुभगे ? भवसीते ? वन्दामहे त्वा । यथा नः, सुभगाऽससि यथा नः सुफलाऽअसि' ऋ. ४।५७।६ वेदरहस्यम् ३४ 'धृतेन सीता मधुना समक्ता विश्वै र्देवैरनुमता मरुद्भिः । सा नः सीते ? पयसाऽभ्यववृस्वोर्ज स्वती धृतवत्पन्वमाना' (अथर्ववेद ३।१७।९-वेदरहस्यम् ३५) 'इन्द्रः सीतां निगृह्णातु तां पुषाऽनुयच्छतु । सा नः पयश्वती दुहामुत्तरमुत्तरां समाम्' (ऋ. ४। ५७।७-वेदरहस्यम् ३६) मन्त्ररहस्यन्तु जगद्गुरुश्रीराघवानन्दाचार्यानुगृहीतर हस्यमार्तण्डभाष्यतस्तथा जगद्गुरुश्रीरामानन्दाचार्यश्रीरामप्रपन्नाचार्ययोगीन्द्र-कृतदीपिकाटीकातोऽनुसन्धेयम् । 'श्रीश्चते लक्ष्मीश्च पत्न्या' (यजुर्वेदः ३१। २२) 'ईश्वरीं सर्वभूतानां तामिहो पह्वये श्रीयम्' (श्रीसूक्तस्य च) रहस्यं जगद्गुरुश्रीवैदेहीवल्लभाचार्यानुगृहीतश्रीसूक्तप्रकाशतो ग्राह्यम् । तथा द्वितीयः-

'सकृदेव प्रपन्नाय तवास्मीति च याचते ।
अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम ॥ (श्रीमद्भा. ६।१८।३३)
वद्धाञ्जलिपुटं दीनं याचन्तं शरणागतिम् ।
न हन्यादानृशंस्यार्थमपि शत्रुं परन्तप ॥

Scanned by CamScanner ankurnagpal108@gmail.com

आर्तो वा यदि वा दृप्तो परेषां शरणं गतः ।
अरिः प्राणान् परित्यज्य रक्षितव्यः कृतात्मना (श्रीमद्रा. ६।१८-२७-२८)
द्वि शरान्नाभि सन्धत्ते द्विःस्थापयति नाश्रृतान् ।
द्विर्ददाति न चार्थिभ्यो रामो द्विर्नाभिभाषते ॥ (श्रीमद्रा. २।१८।३०)
नास्य क्रोधः प्रसादश्च निरर्थोऽस्ति कदाचन ।
हन्त्येष नियमाद्वध्यानवध्येषु न कुप्यति ॥ (श्रीमद्रा. २।२।४५-४६)
सूर्यस्यापि भवेत्सूर्यो ह्यग्नेरग्निः प्रभोः प्रभुः । (श्रीमद्रा. २।४४।१५)
वसुधाया हि वसुधां श्रियः श्रीं भर्तृवत्सलाम्
सर्वांल्लोकान्सुसंहृत्य सभूतान्सचराचरान् । (श्रीमद्रा. ५।५१।३९)
पुनरेव तथा स्रष्टुं शक्तो रामो महायशाः ।
विदितः स हि धर्मात्मा शरणागतवत्सलः ।
तेन मैत्री भवतु ते यदि दीवितुमिच्छसि ॥ (श्रीमद्रा. ५।२१।२०)
साक्षाद्रामाद्विनिवृत्तो धर्मश्चापि श्रिया सह ॥ (श्रीमद्रा. २।२।२९)
यश्च रामं न पश्येत्तु यं च रामो न पश्यति ।
निन्दितः स भवेल्लोके स्वात्माप्येनं विगर्हते ॥ (श्रीमद्रा. २।१७।१४)
रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता । (श्रीमद्रा. १।१।१४)
चिन्तयेद्राघवं नित्यं श्रेयः प्राप्तुं च इच्छति ।
श्रावयेदिदमाख्यानं ब्राह्मणेभ्यो दिने दिने ॥ (श्रीमद्रा. ७।१११।२०)

श्रीमद्रामायणहार्दं तु श्रीयुगलचरणकमलामृतरसरसिकश्रीशिवसहाय-कृत विवरणे प्रपञ्चितमतिविस्तारेणेतिनात्र तन्यते ।

तथैव तृतीयः-

सुरोऽसुरो वाप्यथवानरो नरः सर्वात्मना यः सुकृतज्ञमुत्तमम् ।
भजेत रामं मनुजाकृतिं हरिम् य उत्तराननयत्कोसलान्दिवम् ॥ (भा. ५।१९।८)
स यैः स्पृष्टोऽभिदृष्टो वा संविष्टोऽनुगतोऽपि वा ।
कोसलास्ते ययुः स्थानं यत्र गच्छन्ति योगिनः ॥
पुरुषो रामचरितं श्रवयणैरुपधारयन् ।
आनृशंस्यपरो राजन् कर्मबन्धैर्विमुच्यते ॥ (९।११।२२।२३)

Scanned by CamScanner
ankurnagpal108@gmail.com

नेदं यशो रघुपतेः सुरयाञ्चयात्त-
लीलातनोरधिकसाम्यविमुक्तधाम्नः ।
रक्षो वधो जलधिबन्धनमस्त्रपूगैः
किं तस्य शत्रुहनने कपयः सहायाः ॥ (९।११।२०)

गुर्वर्थे त्यक्तराज्यो व्यचरदनुवनं पद्मपद्भ्यां प्रियायाः
पाणिस्पर्शाक्षमाभ्यां मृजितपथरुजो यो हरिद्रानुजाभ्याम् ।
वैरुप्याच्छूर्पणख्याः प्रियविरहरुषाऽऽरोपितभ्रूविजृम्भ-
त्रस्ताब्धिर्बद्धसेतुः खलदवदहनः कोसलेन्द्रोऽवतान्नः ॥ (भा. ९।१०।४)

ध्येयं सदा परिभवघ्नमभिष्टदोहं
तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम् ।
भृत्यार्तिहं प्रणतपालभवाब्धिपोतं
वन्दे महापुरुष ते चरणारविन्दम् ॥

त्यक्त्वा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं,
धर्मिष्ठ आर्यवचसा यदगारण्यम् ।
मायामृगं दयितयेप्सितमन्वधावद्
वन्दे महापुरुष ते चरणारविन्दम् ॥ (भा. ११।५।३३।३४)

एतदीयविशेषरसास्वादनं तु जगद्गुरुश्रीगङ्गाधराचार्यचरणकृता श्रीशुकार्यमतदीपिकातः कर्तव्यं विशेषार्थिभिरित्यत्र विरम्यते । अतएव लोके कवित्र यस्यैव नाम गृह्यते तदन्ये तु तदाभासा एव । तदुक्तं-'एकोभून्नलिनात्परस्तु प्रलिनाद् वल्मीकतश्चापरः, तेऽभूवन् कवयः प्रभूतयशसस्तेभ्यो नमस्कुर्महे । ये चान्ये निजगद्यपद्यरचनैश्चेताश्चमत् कुर्वते तेषां मूर्ध्नि ददाति वामचरणं कार्णाटराज प्रिया' इति । अत्र ब्रह्मादीनां कवित्वं तदन्येषां लौकिकानामकवित्वमित्याद्याः कवयः लोकोत्तरा प्राकृतिकनायकसम्बन्धिगुणवर्णनं कृत्वा स्वस्मिन् सत्कवित्वमाविष्कृतवन्तः, तदन्यैस्तु लौकिकप्राकृतिकनश्वरनायकप्रभृतिनां गुण वर्णनं कृत्वा स्वेषु कव्याभासत्वमाविष्कृतं परञ्च तत्रैवकवेः कवित्वं यत्र परमेश्वरगुणवर्णनकर्तृत्वं नान्यत्रेतिभावः ।

यथा भगवान् श्रीरामचन्द्रः आदितः 'सत्समुदितसुयशाः' एतदन्तः विशे

Scanned by CamScanner ankurnagpal108@gmail.com

षणानिकरैः साभिप्रायैर्विशेषणैर्विशेषितस्तथैव 'सूरिमान्यः' एतद्विशेषणेनाऽपि-युक्तः स सूरिभिनित्यमुक्तजीवैः श्रीपवनात्मजप्रमुखैर्मान्यः । मानयितुं पूजयितुं योग्यस्तैः पूज्य इत्यर्थः । ये नित्यमुक्तजीवाः 'सदापश्यन्ति सूरयः' इतिवचनेन महामहिमशालिनः सर्वदा भगवत्संनिधौ भगवतः कैङ्कर्यं कुर्वाणा अत्यन्तसा-निध्यं प्राप्ता भगवत् सायुज्यं प्राप्तास्तैर्यदापूज्यस्तदा बद्धमुक्ताभ्यां पूज्यत्वमर्थत एव सिद्ध्यति । मानघातोर्यतिप्रत्यये कृते मान्य इतिप्रयोगस्तदर्थश्चपूजनीयः, यथा मानधातोर्विचाराऽर्थस्तथैव पूजार्थोऽपि । मानविचारे पूजाग्रामितिस्मर णात् । तत्र मन्यते विचारयति मन्यते पूजयतीतिवार्थः । एतादृशमहाप्रभाव शिष्टव्यक्तिभिर्यदा भगवान् पूजनीयस्तदा देवमनुष्यादिभिः लीलाभूमिस्थितैः पूजनीय इतिकैमुतिककल्पावसिद्धो भवतीति विशेषविवरणमन्यत्रावलो-कनीयम् ।

तदेवं प्रतियोगिसापेक्षं भगवतो गुणानभिधाय स्वरूपसापेक्षगुणेष्व न्यतमं गुणं दर्शयितुमाह-'वदान्यः' इति ।

अप्यहं जीवितं जह्यां त्वां वा सीतां स लक्ष्मणम् ।
न तु प्रतिज्ञा संश्रुत्य ब्राह्मणेभ्यो विशेषतः ॥
द्वि शरान्नाभिसन्धत्ते द्विः स्थापयतिनाश्रितान् ।
द्विर्ददाति न चार्थिभ्यो रामोद्विर्नाभिभाषते ॥

इत्यादिमहर्षिवचनेनवदान्यत्वं व्यञ्जितं भगवतः । तत्र वदान्यो दानशीलः यथा लौकिकोऽपिदाता सेवादिभिराराधितो याचकाय मनोभिलषितं लौकिकं फलं प्रदाय वन्दाय इति संज्ञां लभते । यथोक्तं तत्कुलीयानाम्-'गुर्वर्थमर्थी श्रुत पारदृश्वा रघोः सकाशादनवाप्यकामम् । यातो वदान्यान्तर इत्ययं मे माभूत्परी वाद नवावतारः ।' इतिलौकिको हि राजा लौकिकधनादिदानेनैव वदान्यः पर-मेश्वरस्तु ।

सकृदेव प्रपन्नाय तवास्मीति च याचते ।
अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम ॥
स्थिरे मनसि सुस्वस्थे शरीरे सति यो नरः ।
धातु साम्ये स्थिरेस्मृत्वा विश्वरूपं च मामजम् ॥

Scanned by CamScanner ankurnagpal108@gmail.com

ततस्तं म्रियमाणं तु काष्ठपाषाणसन्निभम् ।
अहं स्मरामि मद्भक्तं नयामि परमां गतिम् ॥

इतिभगवद्वचनप्रामाण्यात् लौकिकं धनादिकं यच्छन्नपि लोकोत्तरपरमपदात्मकमोक्षस्यापि दाता भवतीति । एतावानेवानयोर्भेदः सत्यपि वदान्यत्वे तदुभयोः । सर्वस्य सकलप्रदत्वं परमेश्वरस्येति स्वयमेव भगवतोक्तम्-

चतुर्विधाभजन्ते मां जनाः सुकृतिनोऽर्जुन ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ? ॥

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिस्यामि मा शुचः ॥ इति ।

मम परमेश्वरस्यैतद् व्रतं यदहं तवास्मीति प्रपन्नाय, संसारादभयप्रयोजकादभयमन्ते परमपदम् प्रयच्छामीति । ततश्च वदान्यत्वेति विशेषणेन भगवति धर्मार्थकाममोक्षाख्यचतुर्विधफलप्रापकत्वमिति सूचितम् ।

तथा शश्वच्छ्रीरामचन्द्रः सुमहितहिमासाधुवेदैरशेषैरिति, तत्र साधु समीचीनं यथा स्यात्तथा, अशेषैर्वेदैः कर्मकाण्डज्ञानकाण्डान्तर्गतवेदसमूहैः, शाश्वतं सर्वदा सुष्ठुमहितः ख्यापित महिमा महत्त्वं यस्य तादृशः स श्रीरामचन्द्रो लोकदृष्ट्या दशरथापत्यपुंस्त्वविशिष्टः शास्त्रदृष्ट्या तु सर्वशेषी सर्वेश्वरो भगवान् श्रीरामो यत्र योगिनो रममाणा भवन्ति 'रमन्ते योगिनोऽनन्ते सत्यानन्दे चिदात्मनि' इति रामपदेनासौ परं ब्रह्माभिधीयते इतिश्रुत्युक्तेः । अर्थात् सर्वलोकनायकस्य सर्वमहत्वं सर्वत्र सर्वदैव गीयते स भगवान् राम एव न अतोऽतिरिक्तः कश्चिदिति । अर्थात् सर्वो वेदराशिः कर्मकाण्डान्तर्गतो ज्ञानकाण्डान्तर्गतो वा भवति सर्वेऽपि साक्षात्परम्परया वा समीचीनरूपेण सर्वकालं भगवतो रामस्यैव महिमानमुद्गिरन्ति । सर्ववेदप्रतिपाद्यो भगवान् श्रीराम एव, लोकदृष्ट्याऽयोध्याधिपतिर्वेददृष्ट्या सर्वप्राकृतिकलोकाधिपतिर्भवन्नेव त्रिपादविभूत्यधिपती स एवेति भावः ।

'राम एव परं ब्रह्म राम एव परं तपः ।
राम एव परं तत्वं श्रीरामो ब्रह्मतारकम् ॥' (श्रीरामोपनिषद्)

सूर्यस्याऽपि भवेत्सूर्यो ह्यग्नेरग्निः प्रभो प्रभुः ।

Scanned by CamScanner ankurhagpati08@gmail.com

दैवतं देवतानां च भूतानां भूतसत्तमः' (श्रीमद्भा. २।४४।१५-१६)

'स उ प्राणस्य प्राणः' (के. १।२) नित्यो नित्यानां चेतनश्चेतनानाम्' (क. ४।१३)

प्रियते सततं रामः स हि विष्णुः सनातनः' (श्रीमद्भा. ६।१२८-११९)

भरणः पोषणाधारः शरण्यः सर्वव्यापकः ।
करुणः षड्गुणैः पूर्णो रामस्तु भगवान् स्वयम् ॥ (म. रामायणम्)

रामस्य नामरूपं च लीलाधाम परात्परम् ।
एतत्त्चतुष्टयं नित्यं सच्चिदानन्दमव्ययम् ।
परान्नारायणाच्चैव कृष्णात्परतरादपि ।
यो वै परतमः श्रीमान् रामो दाशरथिस्वराट् ॥
जयमत्स्याद्यसंख्येयावतारोद्भवकारणम् ।
ब्रह्मविष्णुमहेशादिसंसेव्यचरणाम्बुजम् ॥ (वशिष्ठसंहिता)

परं ब्रह्म परं तत्वं परं ज्ञानं परं तपः ।
परं बीजं परं क्षेत्रं परं कारणकारणम् ॥' (श्रीमद्भा.)

ज्ञानशक्तिवलैश्वर्यवीर्यतेजांस्यशेषतः ।
भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः' ॥ (वि. पु. ६।५।७९)

'ज्ञानशक्तिवलैश्वर्यवीर्यतेजांसि षट् गुणाः ।
भगत्वेनेरिताः सन्ति श्रीरामे भगवान् स तत् ॥
श्रीरामे भगवच्छब्दो मुख्यवृत्या प्रवर्त्तते ।
गौण एव स चान्यत्र षड्विधैश्वर्यलेशतः' ॥

(२।३ श्रीरामभगवत्वे जगद्गुरुश्रीगङ्गाधराचार्यः) इत्याद्यनेकश्रुतिस्मृतीतिहासाचार्यदिव्यप्रबन्धपुराणागमादिनां 'अक्षरं ब्रह्मसत्यं च मध्ये चान्ते च राघवः' इत्यादिब्रह्मवाक्येन तथा 'अभयं सर्वभूतेभ्यो ददाम्येतत् व्रतं मम' ति स्वयं भगवद्वाक्येन चायोध्याधिपतेरेवेश्वरत्वमितितात्पर्यः । 'सर्वेषामवताराणामवतारी रघूत्तमः' इत्यागमोक्तेर्थया वराहनृसिंहकूर्मादयोऽवताराः सर्वशेषिणो रामस्य तथैव सर्वावतारिणो भगवद्रामस्यावनतारभूतः श्रीनारायणोऽपि । प्रलये योगनिद्रामास्थाय जलशयनात् स एव नारायणपदवाच्य, नारं घनरसोज्वलम

Scanned by CamScanner ankurnagpal108@gmail.com

यनं यस्य-नारं घनरसः पुमानित्युक्तेः । 'पुरुषाःपुरुषानराः' इतिनिघण्टुवचनात् नराः पुरुषास्तेषां समूहोनारमयनं यस्य स नारायणः, यद्वा 'जगत्सर्वं शरीरं ते स्थैर्यं ते वसुधातलम्' इति महर्षिवचनात्-नाराणि सकलब्रह्मण्डात्मकतत्वानि अयनं यस्य-नरतीति नरः प्रोक्तः परमात्मा सनातनः । नराज्जातानि तत्वानि नाराणीति विदुर्बुधाः' इत्युक्तेः । अत एव प्रतिकल्पं श्रीनारायणभेदः पुराणादौ प्रतिपादितः । नैवं श्रुत्यादौ श्रीरामभेदः प्रतिपादितोऽवलोक्यते । यद्यपि दण्डकारण्यस्थश्रीरामात् लंकास्थितः श्रीरामो देशकालभेदवद् भाति तथापि तत्र विशेषणयोर्देशकालयोरेवभेदो न तु विशेष्यस्य श्रीरामस्य भेदः । उपासना तारतम्याद् वा । यथा गुणकर्मान्यत्वविशिष्टसत्ताया द्रव्यमात्रवृतित्वेन शुद्धाद् भिन्नत्वं परन्तु सत्तात्वेन न पार्थक्यं विशेष्यस्यैकत्वात्, तथैव प्रकृतेपि विशेषण कालदेशयोर्न भेदोऽपित्वभेद एवेति । एवं च यथा यागादिजनितो धर्माधर्म रूपोऽपूर्वाख्यः पदार्थः केवलवेदप्रमाणक एव नान्यः प्रमाणगम्यो भवति, अत एव प्रमाणान्तरागम्यत्वादपूर्व इति कथ्यते तथा सकलविभूतिनायको भगवान् श्रीरामचन्द्रो वेदैकप्रमाणगम्यः सकलवेदाश्च साक्षात् परंपरया भगवन्तं श्रीरामेव सर्वशेषिसर्वप्रकारितया सर्वेशरूपतया प्रतिपादयन्तीति 'ब्रह्मसत्वे प्रमाणं तु शास्त्रमेव सुनिश्चितम् । तन्त्वौपनिषदश्चैतच्छ्रुतिवाक्यप्रमाणतः' इत्यादिरूपेण श्रीबोधायनमतादर्शोक्तदिशा सर्वेश्वरः श्रीराम एव ब्रह्मेति तत्त्वम् । एतत्सर्वमभिप्रेत्यैवाचार्याः प्राहुः 'शश्वच्छ्रीरामचन्द्रः सुमहितमहिमासाधुवेदैरशेषैरिति । विशेष विवरणं स्थनान्तरे सर्वेश्वरश्रीरामपरत्वप्रस्तावे मत्कृते द्रष्टव्यमितीह संक्षेपः ।

तथा तत्त्वत्रयेषु शेखरवद्राजमानो भगवान् 'निर्मृत्युः' निर्गतोऽपगतो मृत्युर्यमराजः कृतान्तो यस्य स निर्मृत्युः 'मृत्युर्धावतीति श्रुत्युक्तेः स एव नियन्ता अत एव मृत्युभयेन सर्वथा रहितः । प्राकृतिकदेहवान् लोको देवमनुष्यनारकतिर्यञ्च सर्वदैव मृत्युभयेन भीतो भवन् विभेति मरणस्याऽवश्यंभावादिति सर्वेषां मृत्युभयं नातिवर्तते, अयंतु सर्वशक्तिकः सर्वशरीरीति तस्य वशे यमराजो विद्यते नहि दासात्स्वामिनो भयं भवतीति न्यायेन न भगवतो यमाद् भयमीति भावः । तदुक्तं श्रुतौ-

'भयादस्याग्निस्तपति भयात्तपति सूर्यः ।

Scanned by CamScanner ankurnagpal108@gmail.com

भयादग्निश्च वायुश्च मृत्युर्धावति पञ्चमः ॥'

इतिकाठके । इत्यादिश्रुतिर्भगवद्भयेन भीतत्वमिन्द्रयमादीनां दर्शयति ततः कथं भगवतो मृत्युभयं भवेदित्याशयेन प्राह-निर्मृत्युरिति' अर्थात् प्राकृतिकजन्यस्य मृत्युभयं भवति तस्य तदवश्यंभावात् भगवांस्तु लोकोत्तरोऽप्राकृतिको मृत्युमर्यादामतिक्रान्त इति भवत्येव निर्मृत्युः सर्वथामृत्युभयरहितः, अभयं सर्वभूतेभ्यो ददामीत्युक्तेः ।

तथा यथोक्तगुणसम्पन्नो भगवान् श्रीरामचन्द्रः 'सर्वशक्तिः' सर्वविषयक शक्तिर्विद्यते यस्य सः । 'परास्य शक्तिर्विविधैवश्रूयते स्वाभाविकी ज्ञान-बल-क्रिया चेत्यादिश्रुतेः । प्रत्यक्षोपस्थापितस्यानेकप्रकारकवित्तस्य प्रतिनियतदेश-कालक्रियाश्रयस्य जगत्-उत्पत्ति-स्थितिप्रलयात्मककार्यमशक्तेनाल्पशक्तिमता वा पुरुषेण सर्वथैव कर्तुमशक्यं तादृशजगत उत्त्पत्यादिकार्यमन्येन मनसाप्यालोचयितुमशक्यं तादृशं कार्यमयं करोतीत्यर्थत एव परमेश्वरे सर्वशक्तिमत्वं सिद्ध्यतीति दर्शयितुं सर्वशक्तिरिति विशेषणं प्रक्षिप्तम् । नहि केवलं तर्कमात्रोपस्थापितं सर्वशक्तिकत्वं भगवति प्रतिपादितम्, किन्तु 'परास्यशक्तिर्विविधाः सर्गाद्याभावशक्तयः' इत्यादिश्रुत्यनुमोदितमपीति भावः ।

तथा स श्रीरामचन्द्रो 'विकलुषविजरः' तत्र विगतं कालुष्यं पापात्मकं कर्म यस्य स विकलुषः पापपुण्यकालुष्यमशुभफलदायकं कर्म प्राकृतदेह सम्बन्धेन जायते तादृशं देहसम्बद्धं सत् तादृशदेहवतामेव सुखदुःखादिकं तस्मिन् जन्मनि जन्मान्तरे वा फलं जनयति, भगवांस्तु लोकोत्तराप्राकृतिक शरीरवानिति तस्य तादृशकर्मलिप्तत्वं न भवति कर्मवन्धनविनिर्मुक्तत्वात्-नहि कर्माणिलिम्पन्ति न मे कर्मफलेस्पृहा, इतिभगवद्गीतोक्तेः । ततः स विकलुष इति । तथा स विजरः, विगता दूरं गता जरावृद्धावस्था यस्य । इयं च जराप्राकृतिकशरीरमधिरुह्य तदभिमानिनं बद्धजीवं परम्परया दुखयन्ती दुःखजनकतया दुःखमिति कथ्यते, भगवांस्तु न प्राकृतिकशरीरवान् तथा मिथ्याज्ञानमूलकशरीराभिमानवानपि 'नित्यविभूतिमहेशम्' (नीराजनस्तवे महामहोपाध्यायश्रीरामानन्दाचार्यश्रीरघुवराचार्याः) इत्युक्तेः । ततो मिथ्याज्ञानरूपप्रयोजकाभावेन तज्जनितशरीराश्रितजरादिमान् न भवतीत्यतोऽजरः । अनादिकाला

Scanned by CamScanner
ankurnagpal108@gmail.com

देव भवपरम्परया जीवस्य तत् तत् देहाभिमानोऽहं ममेत्यात्मको जायते स्वभावत एव ततश्च देह एवात्मा आत्मैव देह इत्यभिमत्य तादृशदेहद्वारेण शास्त्रविहितं तत् प्रतिषिद्धं कर्मकृत्वा तादृशकर्मजनितभोगाय शरीरान्तरं संधार्य संगृह्य पापपुण्यादिमद्देहं तद्गतजन्मजरामरणादिकमनुभवन् घटीयन्त्रवदामोक्षं संसारस्त्रोतसोह्यमानो भवति । कदाचित् भगवत्प्रसादेन प्राग्भवीयपुण्यकर्मबलेन विगताभिमानो भगवतो रामस्य तारकाख्यः 'श्रीमद्रामचन्द्रचरणौ शरणं प्रपद्ये, श्रीमते रामचन्द्राय नमः' इत्याकारक मंत्रं जपन् भगवतः कैंकर्यं च कुर्वाणः कालं यापयन् भोगेन शरीरं समाप्य विलक्षणं भगवत्प्रसादलब्धं शरीरमास्थाय विमुक्तो भवतीति सांसारिकजीवव्यवस्था, परमेश्वरस्य तु संसाराभावेन सर्वदैव कर्मरहितो जरारहितश्चेति सर्वप्रथितमिति भावः । अत्रार्थे श्रुतिः 'अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघित्सोऽपिपासः सत्यकामः सत्यसंकल्पः' (छा ८। ७।१) इत्यादि । अर्थात् अयं परमात्मा अप्राकृतिकसमाभ्याधिकविवर्जिताप्राकृतिकलोकोत्तरस्वेतरसकलविलक्षणत्वेन 'अपहतपाप्मा' तत्र अपहतं विनाशितं शुभाशुभकर्म येन स अपहतपाप्मा विनाशितकर्मजालः परमात्मेत्यर्थः, न पूर्वं नेदानीं न वा परतो जायमानकर्म सम्बन्ध इति यावत् अर्थात् परमेश्वरस्य नेतः पूर्वं कर्मबन्धोजातो नेदानीं विद्यते न वा परं भविष्यति किन्तु पूर्वं नासीत् न वा वर्तमानकाले बद्धजीववत्कर्म विद्यते न वा भविष्यत्काले कर्मबन्धनं भविष्यतीति सर्वत्रैव कर्मबन्धनशून्यः परमात्मेति ।

यद्यपि 'अपहतपाप्मा' इत्यस्य विनाशितकर्मजाल इत्यर्थकरणे मुक्तजीववत् परमेश्वरेऽपि कर्मसत्वमायाति, यतो यदि भगवति कर्म भवेत्तदैव कारणबलेन तद्विनाशःस्यात् प्रतियोगितासम्बन्धेन नाशं प्रति तादात्म्यसम्बन्धेन प्रतियोगिनो घटादेः कारणत्वमिति नियमात् यथा यदा मुद्गरादिप्रहारात् घटादिको विनाशितो भवति प्रतियोगितासम्बन्धेन नाशो घटे तिष्ठति तत्र घटे तादात्म्यसम्बन्धेन प्रतियोगिनो घटस्य विद्यमानतया नाशप्रतियोगिनोः कार्यकारणभावो निर्वाहितो भवति । तत्र घटादिसत्वं यदा भवति तदैव तस्य विनाशो भवति घटाभावे तद्विनाशस्यासंभवात् । नहि यथावस्त्रवान् विनाशयति तथा वस्त्ररहितो दिगम्बरः स्वकीयवस्त्रं विनाशयति तस्याभावात् । तथैव प्रकृते यदि भगवति

Scanned by CamScanner ankurnagpal108@gmail.com

कर्मभवेत्तदैव नाशस्तदभावे प्रतियोगिनोऽभावात्कथं विनाश इति । तथापि कर्मसंबन्धरहितः परमात्मेत्यर्थः अर्थात् कर्मसंबन्धाभाववानित्येवार्थः । तथा च मिथ्याज्ञाननिमित्तकर्मसम्बन्धस्य बद्धजीवे पूर्वावस्थायां मुक्ते जीवे च प्रसिद्धत्वेन तदभावस्य भगवति प्रसिद्धेः । इत्थं च यथा ध्वंशः स्वाधिकरणे स्व पूर्वकाले साधयति न तथाऽत्यन्ताभावः स्वप्रतियोगिसत्वं स्वाधिकरणे साधय तीति 'पाषाणे गन्धाभावो वायौरूपाभाव' इत्यादिप्रतीत्या अन्यत्र पृथिव्यादौ प्रसिद्धस्य गन्धादेरभावो ज्ञायमानोऽपि पाषाणादौ गन्धादिसत्वं न प्रसंजयति अत्यन्ताभावस्य प्रतियोग्यधिकरणज्ञानपूर्वकत्वेऽपि स्वाधिकरणे स्वसत्वस्य यदा कदाचिदपि साधकत्वमिति न नियमः ।

तथा स भगवान् विधिभवप्रभृतिकदेवैरपि गीर्मनोभ्यामगम्यः । अर्थात् ब्रह्मादिदेवैः प्राथितमहिमावद्भिरपि वाङ्मनोभ्यां ज्ञातुं प्राप्तुं वा न शक्यः अशुद्धान्तःकरणैरनाराधितश्रीचरणकमलैस्तैरपि प्राप्तुमशक्यस्तदा काकथा मनुष्यादीनाम् । प्रकृते वाङ्मनसातीतत्वं प्रतिपादितम् तदशुद्धान्तः करणाभिप्रायेण, अन्यथा 'दृश्यते त्वग्रयाबुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः' एषोणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पञ्चधा संविवेश' इत्यादिश्रुतीनां वैयर्थ्यं स्यात् । तस्मात् 'यतो वाचो निवर्तन्तेऽप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान् नविभेति कुतश्चन' इत्यादिना न कोऽपि विरोधः । अन्यथा परस्परविरोधेनैकवाक्यस्य व्याहतार्थकत्वमापतेत् । अर्थात् समस्तहेयप्रत्यनीकोऽनन्तज्ञानसुखस्वरूपलक्षणो ज्ञानादिकानन्तकल्याणगुणाकरचिदचिदादिकसृज्यमानपदार्थोत्पत्ति स्थितिप्रलयकारकः आर्तादिचतुःप्रकारकभक्तपुरुषप्राप्योऽधर्माद्यारभ्य मोक्षान्त चतुःप्रकारकफलप्रापकः स्वेतरविलक्षणसमाभ्यधिकविवर्जितचिच्छरीरयुक्तः सकललोकलीलासंपादको भगवान् श्रीसीतानाथ एव परमतत्वम्

'राम एव परं ब्रह्म राम एव परं तपः ।
राम एव परं तत्वं श्रीरामो ब्रह्म तारकम्' इतिश्रुतेः ।

'तत्वं नैव परेशदिव्यगुणकाच्छ्रीरामचन्द्रात्परम्,
मुक्त्यै नास्ति गतिस्तथा रघुपतेर्भक्तेः प्रपत्तेः परा ।

निर्दोषञ्च मतं परं नहि विशिष्टाद्वैततो वैदिकं

Scanned by CamScanner ankurnagpal108@gmail.com

श्रीरामान्नहि कीर्तनीयमपरं मुक्तिप्रदं प्राणिनाम्'

इति जगद्गुरुश्रीसाकेतनिवासाचार्योक्तेश्च ।

तत्र समस्तहेयप्रत्यनीकत्वमित्यस्य समस्तहेयविरोधित्वमेवार्थः । यथा प्रकाशान्धकारयोः । यथा प्रकाशोऽन्धकारस्यविरोधी सवितर्युदितेऽन्धकारो विगतो भवति नहि सौर्यप्रकाशे जाते नैशं तमोऽवस्थानं लभते । यतो विरोधिन एकस्य सद्भावे तदपरेण तत्रावस्थातुमशक्यं, प्रकाशतमसोः सहानवस्थानलक्षणविरोधस्य सर्वानुमतत्वात्प्रत्यक्षसिद्धत्वाच्च । अथ तमस्तेजसोः प्रत्यक्षसिद्धो विरोधस्तथैव हेयगुणयोः परस्परविरोधित्वमेव । तत्र दृष्टान्ते सति तेजसि न तत्र तमः पदमादधाति, तथैव दार्ष्टान्तिके 'सत्यं ज्ञानमानन्दं ब्रह्म' इत्यादिश्रुतिसिद्धज्ञानसुखाद्यात्मकस्य हेयप्रयनीकविकारादिदोषविरोधित्वमेव, यथा वा नकुलसर्पयोः स्वाभाविको विरोध इति नकुलसत्वे सर्पाभावो ज्ञायते तथैव भगवति ज्ञानानन्दादिसत्वे तद्विरुद्धानां हेयगुणानामभावो ज्ञायते । इतिज्ञानादिहेययोश्च परस्परं विरोधेन भगवति ज्ञानादिके श्रुत्या प्रतिपादिते तद्विरुद्धहेयानामभावो ज्ञायते इत्युभयोः परस्परविरोधित्वमेव । तदुक्तं 'ज्ञानानन्दमयोऽमलः' इति, तथा तद् ब्रह्म परमं नित्यमजमक्षयमव्ययम् ।

'एकस्वरूपन्तु सदा हेयाभावाच्च निर्मलम्' इति ।

'समस्तहेयरहितं रामाख्यं (विष्णवाख्यं) परमं पदम् ।
अविकाराय शुद्धाय नित्याय परमात्मने' ॥

इत्यादिप्रमाणवचनेन भगवति कल्याणात्मकज्ञानादिगुणकथनेन हेयकल्याणगुणयोः परस्परविरोधित्वं तमः प्रकाशयोरिव प्रकृतार्थतर्कस्वयमूहनीयः ।

'अनन्तज्ञानादिकल्याणगुणाकरः' तत्र अनन्तत्वं नाम नित्यत्वे सति चेतनाचेतनादिसकलपदार्थव्यापकत्वे सति सर्वान्तर्यामित्वरूपमेव । तत्र सति सप्तम्या विशिष्टार्थकतया नित्यत्वविशिष्टाचेतनादिव्यापकत्वविशिष्टसर्वान्तर्यामित्वात्मकम् । ततश्च देशतः कालतो वस्तुतश्च परिच्छेदराहित्यमेवानन्तत्वम् । तत्र व्यापकतया सर्वदेशे विद्यमानत्वेन देशतोऽपरिच्छिन्नत्वे देशपरिच्छेदराहित्यं सर्वदेशसंबन्धित्वस्यैव विभुत्वात्, देशपरिच्छिन्नस्य व्यापकत्वासंभवात् । नित्यत्वा

Scanned by CamScanner ankurnagpal108@gmail.com

दुत्पादविनाशरहितत्वात् कालपरिच्छेदराहित्यम् । स्वभिन्नसमस्तपदार्थस्य प्रकारत्वात् स्वस्य प्रकार्यन्तराभावात् समाभ्यधिकपदार्थाभावेन वस्तुपरिच्छेदरहितत्वम् । एतदेव नित्यत्वे सति चेतनाचेतनसर्वपदार्थव्यापकत्वे सत्यन्तर्यामित्वमित्यनेनाभिव्यञ्जितम् । अर्थात् सकलजडचेतनव्यापकतया विभुत्वात् पृथिव्यामस्ति जलदेशेनास्तीति वक्तुमशक्यत्वेन देशपरिच्छेदो न भवति । तदुक्तम्-श्रुतौ-'नित्यं विभुं सर्वगतं सुसूक्ष्मम्, अन्तः प्रविष्टः शास्ताजनानां सर्वस्यात्मा, यः पृथिव्यां तिष्ठन्, यस्यात्माशरीरं यस्य पृथिवी शरीरं, यं पृथिवी न वेद, न तत् समश्चाभ्याधिकश्च दृश्यते' इत्यादि । अर्थात् ध्वंसप्रतियोगित्वं देशपरिच्छिन्नत्वं तदभावात् देशापरिच्छिन्नत्वमिति । नित्यत्वेन सर्वकालेऽवस्थानाद्वर्तमानकालेऽस्ति कालान्तरे घटादिवन्नास्तीति प्रतिपादयितुमशक्यतया कालपरिच्छेदो नास्ति । अर्थात् अत्यन्ताभावप्रतियोगित्वाभावात्सर्वदाऽवस्थानेन कालापरिच्छिन्नत्वम् । तथा सर्वान्तर्यामितया सर्वप्रकारित्वात्स्वस्य प्रकार्यन्तराभावादेतद्वस्तुवदिति वस्तुपरिच्छेदोपि न भवति । अर्थात् सर्वप्रकारिणोऽस्य कश्चित्प्रकार्यन्तरं भवेत्तदा प्रकार्यन्तरेण तस्य भेदसत्वेनान्योन्याभावप्रतियोगित्वरूपवस्तुपरिच्छेदोभवेन्नत्वेवं किन्तु तस्य सर्वात्मकतया भेदानुयोगिनोऽभावेन वस्तुपरिच्छिन्नत्वं नास्तीति वस्तुपरिच्छेदः, इत्येवं देशकृतकालकृतवस्तुकृतश्च परिच्छेदो नास्तीति अपरिच्छिन्नत्वरूपमनन्तत्वम्, एतद्भिन्नलौकिकवस्तूनामनित्यत्वात्-अव्यापकत्वात् प्रकारत्वात्त्व देशकृतकालकृतवस्तुकृतपरिच्छेदवत्वेनापरिच्छिन्नत्वं नास्तीति ज्ञेयम् ।

ननु यदि परमेश्वरोऽन्तर्यामितया जैवीयशरीरे जीवेचानुप्रविश्य तिष्ठति तदा जीवगतविकारादिदोषेण परमेश्वरोपि दोषभाक् भवन् जीवमर्यादां नातिक्रामेदिति चेत् भावानबोधात् । अयं भावः-यथा जीवो देवमनुष्यादिशरीरेऽनुप्रविश्य विद्यमानोपि शरीरस्य छेदनभेदनविकारेण शरीरी जीवो विकारवान् न भवति तथैव जीवशरीरी परमात्मा स्वशरीरभूतजीवगतदोषेण संपृक्तो न भवति । यथा सर्वत्र व्याप्यवस्थितोप्याकाशः पार्थिवजलीयधूलिवर्षातपादिभिः संपृक्तो न भवति तद्वत् । तदुक्तम्-'वर्षातपाभ्यां किं व्योम्नः' इत्यादि ।

न च मनुष्यादिशरीरवतो मनुषादिजीवस्य बाल्ययौवनादिविकाराभा-

Scanned by CamScanner ankurnagpal108@gmail.com

वेऽपि शरीरकृतकर्मफलसंबन्धः तथा शरीरमूलकाज्ञानादयो दोषा भवन्त्येवेति दृश्यते तथैव परमेश्वरस्य जीवशरीरिणः कतिपयदोषाभावेऽपि कतिपयजीव दोषाणां परमेश्वरे शरीरिणि संक्रमो भवेत्ततश्चेश्वरस्येश्वरत्वमपगच्छेदिति वाच्यम् शरीरे प्रवेशभेदेनादोषात् । तथाहि मनुष्यशरीरावच्छिन्नमनुष्यशरीरे प्रथम प्रवेशः स्वसंपादितकर्मफलसुखाद्यनुभवाय मिथ्याज्ञानकर्ममूलकः प्रवेशः, अर्थात् जीवः कर्मफलभोगाय भवपरंपरोपार्जितकर्मबलेन प्रविशति तस्य तादृशप्रवेशे मुख्यं कर्मैव निमित्तं न तु स्वेच्छया प्रविशति किन्तु तत्तत्कर्मस्वा नुकूलतत्तद्देहे प्रवेशयतीति कर्मकारणको जीवस्य तत्तद्देहे प्रवेशः । परमेश्वरस्य तत्र मनुष्यादिशरीरे प्रवेशस्तु न कर्ममूलकस्तस्य कर्माभावात् किन्तु कृपा-पूर्वकः । अर्थात् भगवान् भक्तोपरि-अनुग्रहं कृत्वा शरीरे अनुप्रविश्य शरीर मूलकफलभोगाय तं प्रेरयतीति न भगवतः शरीरेऽनुप्रवेशः कर्ममूलकोऽपितु जीवोपरि-अनुग्रहपूर्वकः । यद्यपि जीवः कर्मबलेन तत्र देहेऽनुप्रविश्य स्वयमेव तत्तफलं भुनक्ति तत्रेश्वरः किं करीष्यतीति तथापि परमेश्वरस्तत्र देहेऽनुप्रविष्टस्तत्त कर्म कुर्वन्तं जीवं प्रेरयत्यनुमोदयति च 'शत्रूनगमयत्स्वर्गं वेदार्थं स्वानवेदयत्, आशयत्सलिले पृथिवीम्' इत्यादिवद् । शरीरे जीववत्प्रविष्टस्यापि परमेश्वरस्य जीववत् फलभोगादिकविकारदोषो न भवतीति श्रुतिरेवावेदयति, तथाहि-

'ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे ।
छायातपौ ब्रह्म विदो वदन्ति पंचाग्नयो ये च त्रिणाचिकेताः ॥
द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्ति-अनश्नन्नन्योऽभिचाकशीति' ॥

'एष सर्वभूतान्तरात्मा' 'अपहतपाप्मा विजरोविमृत्युर्विजिधित्सोऽपि-पासः' 'विष्णवे सर्वजिष्णवे'

'विकारञ्च रामो दयाब्धिस्तथात्वे दयाशून्यतां पक्षपातञ्च नैति ।
प्रकारे विकारस्तथा चित्रसृष्टौ च हेतुर्यतः प्राणिनां प्राच्यकर्म ॥'
'प्रसन्नतां या नगताभिषेकतस्तथानमम्लौ वनवासदुःखतः'

इत्यादिश्रुतिभिर्जीवस्यैव कर्मफलभोक्तृत्वलक्षणं विकारं प्रदर्शितं भवति प रमेश्वरस्य तु सर्वविकारराहित्यं प्रदर्शितमिति विस्तारोऽन्यत्र द्रष्टव्य इति संक्षेपः ।

Scanned by CamScanner ankurnagpal108@gmail.com

स च परमेश्वरः श्रीसीतानाथो ज्ञानानन्दैकस्वरूप इतिकथितम् । तत्र ज्ञानानन्दैकस्वरूप इत्यस्यानन्दरूपज्ञानात्मक एव । यद्यपि ज्ञानानन्दैकस्वरूपं यस्य स ज्ञानान्दः इतिविग्रहेऽपि उक्तार्थोपलब्धिर्जायते तथापि ज्ञानामात्रमेव परमेश्वरस्वरूपमिति बोधयितुमानन्दंरूपज्ञानात्मकं तच्चानुकूलं भवतीत्यानन्दरूप त्वात्, आनन्दरूपज्ञानमिति तत्रानुकूलं ज्ञानस्यैव स्वरूपत्वेपि ज्ञानानन्देति पार्थक्याभिधानमुभयोरुपपादनायेति । तदानन्तरूपं ज्ञानं कार्त्स्न्येनानुकूलं प्रकाश रूपं च, तत्र कार्त्स्न्येनेत्यस्य यावत्स्वरूपमनुवर्तमानत्वमेव, अनेकस्वरूपेऽननुकू लप्रदेशः प्रकाशरहितप्रदेशश्च नास्तीति सिद्ध्यति । तत्रानुकूलत्वमाल्हादकत्वं प्रकाशरूपत्वं स्वयं प्रकाशत्वमेव, ततश्च अनन्याधीनप्रकाशत्वविलक्षणसुखात्म काल्हादकत्वरूपज्ञानमेव स्वरूपं यस्य स ज्ञानानन्दैकस्वरूपः परमेश्वर इत्युक्तं भवतीति भावः ।

यथोक्तप्रकारेण ज्ञानानन्दस्वरूपस्य परमेश्वरस्य ज्ञानशक्तिबलैस्वर्यतेजो वात्सल्यशौर्यादयश्च ये कल्याणगुणाः सन्ति ते स्वस्वरूपेण नित्या न तु न्याय मतवज्जीवस्य नित्यत्वेऽपि तदीयज्ञानादिका अनित्याः । तत्र ज्ञानादीनां नित्यत्व मुत्पादविनाशराहित्यमेव, स्वरूपानुबन्धित्वात् यावदाश्रयभाविनो भवन्ति । अर्थात् यावत्पर्यन्तं गुणिनोऽवस्थानं तावत्पर्यन्तं यो गुणो यस्मिन्नवस्थानं लभते स गुणो यावदाश्रयभावी यथा जलतेजोवायुनां स्पर्शाः यावत् कालंजलादेर वस्थानं तावत्कालं ते स्पर्शास्तेषु भवन्त्येव, न तु जलादिकं परित्यजन्ति न वा तादृशाश्रयं परित्यज्यान्यत्र गच्छन्ति, तथैव भगवतो ज्ञानादिका गुणा यावत्कालं भगवतोऽवस्थानं तावत्पर्यन्तं ज्ञानादिकाः कल्याणगुणा भगवन्त्येवस्थिताः, भगवांश्च स्वरूपतो गुणादितश्च नित्य इति ते गुणास्तदीया अपि नित्या एव, अन्यथा यावदाश्रयभाविनो न भवेयुः पाकजरूपादिवत्, शब्दवच्च, यथा वि लक्षण तेजः संयोगलक्षणपाकादिजनितो रूपादिर्गुण आश्रयस्य घटादेर्यथावद वस्थानेपि पूर्वस्वरूपं परित्यज्य स्वरूपान्तरं च प्राप्नुवन् न यावदाश्रयभावी किन्तु अयावद्द्रव्यभावीति भवति । यथा वा आकाशगुणः शब्द आकाशस्य यथावदस्थानेपि क्षणिकत्वात् विपद्यमानोऽयावद्द्रव्यभावी । यावदाश्रयभावि नस्तु स्वरूपानुबन्धिगुणा एव, यथा भगवतो ज्ञानादिकाः तत्र परमेश्वरस्योत्पाद

Scanned by CamScanner
ankurnagpal108@gmail.com

विनाशरहिततयानित्यत्वेन तदीयस्वरूपानुबन्धिगुणा यावदाश्रयभावित्वान्नित्या एव । अन्यथैतादृशरूपत्वं न स्यादिति एतेषां ज्ञानादिकल्याणगुणानामुत्पाद विनाशरहितत्वरूपं नित्यत्वं ते इमे 'सत्याः कामा अनृतापिधानाः' इत्यादिका श्रुतिसिद्धाः । तत्र काम्यन्तेऽअभिलाषाविषयीभूता भवन्तीति कामाः कल्याण गुणा ज्ञानादयस्ते च सत्याः त्रिकालाबाध्यास्तदाश्रयस्य नित्यत्वात्, तेषां च स्वरूपानुबन्धिगुणत्वात् तेपि नित्याः । तथा ते भगवतस्तादृशाः यथा मेघाच्छन्न दृष्टिमेघतिरोहितत्वादादित्यं न पश्यति तथा मिथ्याज्ञानाच्छादितबद्धजीवा मिथ्या ज्ञानतिरोहितत्वात्परमेश्वरस्य कल्याणगुणान् न विजानन्तीति । यथा ते भागवता ज्ञानादिकल्याणगुणा नित्यास्तथा निः सीमाः प्रत्येकमवधिरहिताः । 'यतो वाचो निवर्तन्तेऽप्राप्यमनसा सहेति' श्रुतेः । तथा 'निवर्तते खल्वानन्दगुणावधिं द्रष्टुमुद्यतो वेदः' इति वचनात् । तथा भगवतो ज्ञानानन्दादिकाः कल्याणगुणाः निःसङ्ख्याकाः इयत्तया परिच्छेत्तुमशक्याः सङ्ख्यारहिता इत्यर्थः सङ्ख्ये-यानामसत्यत्वात् । यदि तत्संख्येयस्यात्तदा तथा स्यादिति । तथोक्तम्-

यथा रत्नानि जलधेरसङ्ख्येयानि पुत्रक ?

तथा गुणा ह्यनन्तस्य असङ्ख्येया महात्मनः ॥' तथा

'वर्षायुतैर्यस्य गुणा न शक्या वक्तुं समेतैरपिसर्वलोकैः ।' इति च ।

अर्थात् हे तातः ! जलधेः समुद्रस्य अर्थात् समुद्रसम्बन्धिरत्नानि अ संख्येयानि संख्यातुमयोग्यानि अर्थात् तानि इयत्तया परिच्छेत्तुमशक्यानि तथा तेनैव प्रकारेण अनन्तस्य महात्मनो भगवतो रामचन्द्रस्य गुणाः कल्याणगुणा आनन्दादयः, असंख्येयाः संख्यातुमशक्या एव । अर्थात् परमेश्वरस्यानन्दप्रमुखा ये कल्याणगुणाः सन्ति तेषां परिसङ्ख्यानं नास्तीति ।

ननु भगवतः कल्याणगुणानां सङ्ख्यानिर्द्धारणं द्वित्रैःपुरुषैर्न भवतु किन्तु मिलितैरनेकैस्तु कल्याणगुणसङ्ख्यानिर्द्धारणं कर्तुं शक्यते एवेत्या शङ्क्य अनेकैः संभूयापि तदीयसंख्यानिर्द्धारणं कर्तुं नैव शक्यमित्यत्राह' वर्षा युतैर्यस्य गुणान् इत्यादि । समेतैः संमिलितैः सर्वलोकैः निखिलैरपि मानवदेवा दिभिर्वर्षायुतैरपि यस्य सर्वजननशीलस्य विष्णोः सर्वव्यापकस्य सर्वशरीरिणो रघुपुंगवस्य तदाख्यवंशे दशरथापत्यस्यसर्वेश्वरस्य संख्यातकल्याणगुणा आनन्दा

Scanned by CamScanner ankurnagpal108@gmail.com

दिका वक्तुं नैवशक्या अर्थात् नित्यनिस्सीमनिःसङ्ख्यकभगवत् कल्याणगुणा नैव वक्तुं शक्या इति, एवमुदाहरणान्तरमपि समुदाहरणीयम् । तथा ये इमे भगवतो ज्ञानादिकाः कल्याणगुणास्ते निरूपाधिकाः सर्वोपाधिविवर्जिताः न तु सोपाधिका । जलपवनादौ समुपलभ्यमानपार्थिवगन्धवत् । यथा पृथिवी संबन्धात् जलादौ प्रतिभासितो गन्धगुणो जलस्य न निरूपाधिकः किन्तु पृथिवी संबन्धात्मकोपाध्यधीनः तथा न भगवति, अपि तु स्वाभाविकाः पृथिव्यां गन्ध वत् । 'स्वाभाविकीज्ञानबलक्रिया च' इत्यादिश्रुतेः । तथा इमे भगवतो गुणाः निर्दोषाः सर्वदोषरहिता अहेया इत्यर्थः । 'समस्तहेयरहितविष्णवाख्यम् परमं पद म्' तथा 'ज्ञानानन्दमयोऽमलः' 'अपहतपाप्मा' इत्यादिश्रुत्या सर्वदोषाराहित्यस्य प्रतिपादनात् । तथा भगवत इमे कल्याण गुणा आनन्दादिकाः समाम्यधिकवि वर्जिताः 'न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते । परास्य शक्तिर्विविधैव श्रूयते स्वभाविकी ज्ञानबलक्रियाच' इत्यादिश्रुतेः । तथैव श्री मद्भागवते श्रीशुकार्य-नेदं यशो रघुपतेः सुरयाञ्चयात्त लीलातनोरधिकसाम्यवि मुक्तधाम्नः' इति । अधिकसमाभ्यां विमुक्तं धाम प्रभावो यस्य निरतिशयाधिक प्रभाववत इत्याशयः (श्रीशुकार्यमतदीपिका) यदि भगवदपेक्षया कश्चित्समा-नोऽधिको वा भवेत्तदा समाम्यधिकविवर्जितत्त्वं न भवेत् परन्तु नैतादृशः कश्चित् दृश्यते श्रूयते यो हि परमेश्वरापेक्षया सदृशोऽधिको भवेत् तत्समाधिकस्य श्रुत्यैव निषेधादिति, परमेश्वरस्वरूपवत् पारमेश्वरा आनन्दादिकाः कल्याणगुणाः स-माम्यधिकविवर्जिता एवेति संक्षेपः ।

अथ ये पारमेश्वरा ज्ञानादयः कल्याणगुणास्तेषां तत्तत्स्थले उपयोगित्व ञ्चेत्थम् । तथाहि, ज्ञानं चेतनानां हिताहितनिरूपणोपयोगिगुणत्वेन हितादिनि रूपणद्वारेणाज्ञानामुपयोगि भवति, शक्तिरघटितघटना सामर्थ्यम्, शक्तिविरहि तानां कार्यसिद्ध्युपयोगिनी, सा च सापराधे समुपयोगिनी । कृपा दुःखितानां दुःखापनोदने उपयोगी भवति । वात्सल्यं सदोषाणाम् । तत्र वात्सल्यं नाम आ श्रितप्रपन्नानां दोषस्य भोग्यतया स्वीकाररूपो गुणविशेषात्मकमेव, यथा गौः सद्योजातवत्सस्य शरीरे स्थितमलंजिह्वयालेढि तद्वत्, अतस्तदविद्याकर्मादिदोष सहिततया स्वात्मनोऽनुसन्दधत उपयोगी भवति । एवमेव शीलादिका अपि वि

Scanned by CamScanner ankurnagpal108@gmail.com

वेचनीयाः संप्रदायानुसारेणेति संक्षेपः । विशेषस्तु जगद्गुरुश्रीमधुराचार्यप्रणीत भगवद्गुणदर्पणनामकग्रन्थतोमत्कृतविवरणतोऽनुसन्धेयः । एवं सर्वकल्याण गुणेषु ज्ञातव्यम् एतादृशकल्याणैरनेकैर्गुणैर्युक्तो भगवान् श्रीसीतानाथो दुःखीज नानां प्रपन्नानां दुःखं दृष्ट्वा तं दयापात्रं कृत्वा सर्वदुःखमपनीय स्वपदप्रदानेन जीवान् सुखयति तथा स्वकीयकैङ्कर्यकरणाय स्वदृष्टिसन्निधावेवस्थापयन् तमुप करोति परमेश्वरः ।

तदित्थं कल्याणादिगुणविशेषणतया विशेषणीकृतो ब्रह्मपदवाच्यो भग वान् श्रीसीतानाथः सर्वस्यापि स्थावरजङ्गमजगतः कारणं नान्यः । अर्थात् पूर्वक थितविलक्षणस्वरूपगुणविशिष्टः परमेश्वरो जगत्कारणतया गृह्यते । वेदान्ते ज गत्कारणविचारपरकप्रकरणे 'सदेव सोम्येदमग्रे आसी (छा. ६।२।१) दिति छान्दोग्यस्य षष्ठप्रपाठकेऽभिहितम् । 'ब्रह्म वा इदमग्रे आसीत्, इति च वाज सनेयके प्रतिपादितम् । 'आत्मा वा इदमेक एवाग्रे आसीत् नान्यत् किञ्चनमिषत्' (ऐ-१।१) अर्थात्-हे सोम्य ? इदं परिदृश्यमानं जडचेतनात्मकं जगत् अग्रे उत्पत्तेः पूर्वं प्रलयकाले सदेवासीत् सता परमेश्वरेण तादात्म्यापन्नमासीत् पर मेश्वरस्य शरीररूपेणावस्थितमभवत्, अत्र सत्पदेनास्यैव परमेश्वरस्य ग्रहणं भ वति । तथा इदं परिदृश्यमानं जगत् प्रलये ब्रह्मैवासीत् ब्रह्मणः शेषतयैवाभवत्, अत्र जगत्मूलकारणं ब्रह्मपदेनाभिव्यञ्जितम् । अग्रे उत्पत्तेः पूर्वं प्रलयकाले एक आत्मैवासीत् तदन्यत् किञ्चिदपि न समभवत् । तदाहुराचार्याः-श्वेतकेतो ? इदं परिदृश्यमानं विभक्तनामरूपमनेकावस्थं घटपटादिजगदग्रेसृष्टिकालात्पूर्वमेक-मेवाविभक्तनामरूपतया एकत्वावस्थापन्नमेवाद्वितीयं कर्तृत्वान्तरकारकरहितं स देव सदाकारकप्रतीतिविषयतापन्नमेवासीत् । अत्र सच्छब्दो घटादिनामसम्बन्ध योग्यतालक्षणं सत्वं शक्यतावच्छेदकीकृत्याखण्डब्रह्माण्डनायके श्रीमतिरामे परमात्मनि वर्तते । यद्यप्ययं सच्छब्दो विशेष्यलक्षणपरमात्मबोधकस्तथापि का रणविषयत्वसामर्थ्यात्कारणताप्रयोजकगुणविशिष्टप्रकृतिपुरुषकालशरीरकं परमात्मानमेव समुपस्थापयति' (आनन्दभाष्यम् ६।२।१) अत्रात्मपदेन जगन्मूल कारणस्य कथनं कृतम् । किन्तु मूलकारणविषये कुत्रापि कृतः तत्र सूत्रकारो गतिसामान्यन्यायेन गतिसामान्यादितिसूत्रे श्रुत्यादिबलेन श्रीसीतानाथ एव

Scanned by CamScanner
ankurnagpal108@gmail.com

जगतां हेतुरिति निर्णयं कृतवान् । ततश्च पूर्वोदितसकलकल्याणगुणगणविशिष्टः श्रीसीतानाथो जगत उत्पत्तिस्थितिलयकारणतया हेतुर्नान्यकश्चिज्जगद्धेतुः ।

अस्य जड़तयोपलभ्यमानस्य जगतः कश्चिज्जड एव पदार्थो हेतुः समवायिकारणं नतु चेतनः परमेश्वरो हेतुः, यतो जगतोऽजडकारणं कारणत्वेऽर्थात् यदि जगच्चेतनं समवायिकारणं भवेत्तदा यथा तन्तुषु विद्यमानं शुक्लादिरूपं कार्ये-पटेशुक्लरूपमेवारभते, नहि शुक्लेभ्यस्तन्तुभ्यो नीलः पीतो वा पटो जायतेऽपितु शुक्ल एव प्रादुर्भवति' कारणगतागुणाः स्वसजातीयानेव गुणान् कार्ये आरभन्ते' इति न्यायेन । यदि जडात्मकस्य जगतः समवायिकारणं परमेश्वरः स्यात्तदा स चेतन इति तद्गता चेतना कार्ये जगति चैतन्यमुत्पादयेदिति, ततश्च घटादिजगदपि चेतयेत् नत्वेवं भवति प्रत्यक्षविरोधादननुभवाच्च । तस्मात् यथा पटं प्रतिपटसजातीयास्तन्तवः समवायिकारणं तन्तुसंयोगोऽसमवायिकारणं कुविन्दवेमादिकं निमित्तकारणम्, तत्र यस्मिन् समवायसम्बन्धेन सम्बद्धं सत्कार्यमुत्पद्यते तत्समवायिकारणं, तथा समवायिकारणे समवेतं सत् यत् कार्यस्योत्पादकं तदसमवायिकारणम्, तदसमवायिकारणं द्विविधं, कार्यैकार्थप्रत्यासत्या, कारणैकार्थप्रत्यासत्त्या च यथा घटं प्रतिकपालसंयोगोऽसमवायिकारणम् तत्र घटस्य समवायिकारणं कपालं तस्मिन्नेव कपाले समवायेन घटकार्यं तिष्ठति तथा तत्रैव कपाले कपालसंयोगोऽपि भवतीति, एकत्रस्थित्वा संयोगोऽसमवायिकारणं भवति घटादिद्रव्यात्मककार्यं भवति, अर्थात् कपालादिकारणसंयोगो घटादिकारणतयाऽभिमतः स घटादिकार्यस्य समवायिकारणे वर्तमानः सन् समवायेन तत्रैव कपालादौ वर्तमानोभूत्वा घटादिकार्यं जनयति । एतादृशस्थलेऽसमवायिकारणं भवतीति प्रथमं समवायिकारणम् द्वितीयमसमवायिकारणं यथा घटादिरूपे जनयितव्ये कपालनिष्ठरूपादिकं घटादिरूपरसादेरसमवायिकारणम्, तत्र कारणद्वारा कार्यस्यैकत्राधिकरणे प्रत्यासत्तिर्भवति, यथा घटरूपस्यासमवायिकारणं कपालरूपादिकम् तत्र घटीयरूपस्य समवायिकारणं घटस्तेन समवायिकारणभूतेन घटेन सहैव कपालगतनीलादिरूपस्यैकस्मिन् कपाले सम्बन्धोऽस्तीति कपालरूपस्य समवायिकारणं भवति आभ्यां समवाय्यसमवायिकारणाभ्यां भिन्नोऽन्यथासिद्धिशून्यो हेतुर्निमित्तकारणम् । तत्र

Scanned by CamScanner ankurnagpal108@gmail.com

समवायिकारणं द्रव्यमेवेति नियमः । असमवायिकारणत्वं गुणकर्मणोरेव निमित्तकारणत्वं सप्तपदार्थसाधारणम् । इत्थं सर्गकाले कार्यकारणभावः । सर्गादौ तु परमेश्वरेच्छावशात् परमाणौ कर्म, तत एकः परमाण्वन्तरेण संयुज्य द्व्यणुकमुत्पादयति, त्रिभिर्द्रव्यणुकैश्चतुरणुकं ततो घटाद्यन्तकार्यजातस्योत्पत्तिर्भवति। तत्र परमाणवः पार्थिवजलीयतैजसवायवीयाश्चतुःप्रकारकाः । तत्र परमाणवः पृथिव्यादिकार्यजनने समवायिकारणं सजातीयत्वात्सजातीयमेव समवायिकारणमिति नियमात् । परमेश्वरस्तु कर्तृरूपतया निमित्तकारणं भवति, यथा सर्गकाले घटादितत्तकार्योत्पादने कपालादिकं समवायिकारणं कुलालस्तु चेतनो निमित्तमर्थात् कर्ता 'उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत एव कर्तृत्व नियमात् । यथा सर्गस्य मध्ये तथा सर्गादौ पृथिव्याद्युत्पादने परमाणुः समवायिकारणमसमवायिकारणं तत्तसंयोगादिर्निमित्तकारणञ्च परमेश्वर इत्येवं सर्गप्रारम्भकालिककार्यकारणभावमाश्रित्य सर्गप्रक्रियायां परमेश्वरस्योपयोगो न तु तस्योपादानकारणमिति नैयायिकादयः ।

तदत्र वेदान्तिनः लुताकीटनिदर्शनेन परमेश्वरस्यैवोपादानत्वं तस्यैव च निमित्तत्वमपीच्छन्ति, इदमीयोविशेषविचारः 'प्रकृतिश्च प्रतिज्ञा दृष्टान्तानुपरोधा' दित्यादिसूत्रे, तथा 'इदं सर्वं यदयमात्मा' इत्यादिश्रुत्यर्थविचारावसरे तत्तत्स्थले कृतः श्रीआनन्दभाष्यकारैर्न तथा न्यायमते परमेश्वरस्य जगत उपादानत्वमभिमतम् । यत उपादानस्थगुणस्य कार्ये समानजातीयगुणान्तरोत्पादकत्वनियमेन जडजगत्यपि चेतनत्वप्रसंगात् तस्मान्नेश्वरो जगतो निमित्तकारणमुपादानञ्चेति न्यायसमयः । बौद्धजैनावपि परमाणुमेव जगत उपादानं कल्प्य तत एव जगतः सर्गादिकमभ्युपगच्छतः । ते परमाणवः खरस्निग्धोष्णोरणस्वभावाः, तेभ्यो जगत उत्पत्तिरिति । न च परमाणुनामतीन्द्रियत्वेनाप्रत्यक्षत्वात् तत्समुदायात्मक घटादिकार्याणां प्रत्यक्षता न स्यादिति वाच्यम्, एकस्य परमाणोरप्रत्यक्षत्वेऽपि ततः समुदायरूपघटादिकार्यस्य प्रत्यक्षत्वसंभवात् यथातिदूरेऽवस्थितस्यैककेशस्याप्रत्यक्षत्वेऽपि केशसमुदायस्य प्रत्यक्षता भवति तथैव प्रत्येकस्य परमाणोरप्रत्यक्षत्वेऽपि परमाणुञ्जात्मकघटादेः प्रत्यक्षत्वे नास्ति कश्चिद्बाधकः । एवं बौद्धाः स्वमते परमाणुकारणवादमेव स्वीकुर्वन्ति न तु परमेश्वरस्य कारणता

Scanned by CamScanner ankurnagpal108@gmail.com

मिच्छन्ति' एवमादित्यनाथानुयायिश्वेतांवरीया जैना अपि परमाणोः कारणता मेवेच्छन्ति न तु परमेश्वरस्य कारणतां स्वीकुर्वन्ति, यदि परमेश्वरः कारणं स्यात्तदा स्वकीयादृष्टद्वारा जनयिष्यतीति तस्यापि अदृष्टसद्भावेऽनीश्वरत्वमेव तथा न्यायमतोक्तदोषोऽपि स्यादेवेति, बौद्धजैनयोरेतावान् भेदः, यद्यपि पर माणुकारणवादः सर्वेषामनुमतस्तथापि बौद्धमतेः चत्वारः खरस्निग्धोष्णोरण स्वभावाः पार्थिवादिपरमाणवः परस्परं विभिन्नाः जैनमते सर्वोऽपि परमाणुः समान एव न तु तत्र पार्थिवादिभेदः एकत्वेऽपि शुभाशुभकर्मादिनिमित्तभेदात् ते एव परमाणवः पृथिवीरूपेण कदाचिज्जलरूपेण तेजोरूपेण वायुरूपेण वा परिणता भवन्ति, एतत्तत्वम् अन्ययोगव्यवच्छेदिकायाः 'आदीपमाव्योमसमस्व भावं स्याद्वादमुद्रानतिभेदिवस्तु । तन्नित्यमेवैकमनित्यमन्यदितित्वदाज्ञां द्विषतां प्रलापाः' इत्यादिश्लोकव्याख्यानावसरे मल्लिषेणेन स्पष्टीकृतम् । पृथिव्यादि कार्याणामपकर्षगतो यो भागः स एव परमाणुः स च नित्यः तस्याप्यनित्यत्वे तदवयवानपि अन्वेषणीयतयाऽनवस्थापातात् । तस्माद् यत्रावयवधाराया वि श्रामस्तस्य नित्यत्वं परमाणुत्वञ्च । तस्यानित्येऽसमवेतभावकार्योत्पादप्रसंगात् । अर्थात् अवयवधाराया विश्रामाभावेऽनवस्थेतिचरमस्यापि कार्यत्वे तदा तेऽवय वान्तरस्य अभावेन अवयवित्वादुत्पादस्यावश्यं वक्तव्यतया समवायिकारणस्य चाभावेनासमवेत एव स उत्पद्येत, परन्तु नैवं संभवति भावकार्यस्य समवे तत्वनियमात् । तस्मादवयवधारा यत्र विश्राम्यति स एव परमाणुः । एतादृश परमाणुरेव कार्यजातस्य कारणं न तु परमेश्वर इति ।

तदयमत्रसंक्षेपः सौत्रान्तिकवैभाषिकबौद्धश्वेतांबरदिगम्बरजैनन्यायवै-शेषिका एवं प्रतिपादयन्ति, तत्र बौद्धजैनयोः परमाणुरेव सकलप्रपञ्चस्य का रणम् । वैशेषिकादिमते परमाणुर्जगतः समवायिकारणम् 'क्षित्यंकुरादिकं सकर्तृकं कार्यत्वाद्घटादिवदित्यनुमानगम्यपरमेश्वरो जगन्नियन्ता कर्तृरूपं नि मित्तकारणं भवति घटादिकार्ये मृत्तिकाकुलालवत् अर्थात् यथा घटादिकार्ये मृत्तिकाकपालादिकमुपादानकारणं समवायिकारणं चेतनस्तु कुलालतन्तुवाय प्रभृतिकः कर्तृतया निमित्तकारणं भवति चेतनमन्तरेण कस्यापि कार्यस्योत्पत्तेर दर्शनात् । न च मेघमालादौ कस्यचिच्चेतनस्यादर्शनेपि तत्र कार्यं सावयव

Scanned by CamScanner ankurnagpal108@gmail.com

मुत्पद्यते इति वाच्यं तत्रापि सर्वदर्शिनः सर्वशक्तिमतः परमेश्वरस्यैव कर्तृत्वात् । क्षित्यंकुरादिवत् मेघमालादीनामपि साध्यकुक्षिनिक्षेपात् । नहि दृष्टान्तमादाय व्यभिचार उद्भाव्यते तथा सति अनुमानविलोपप्रसंगात् । यद्यपि बौद्धजैन नैयायिकेषु पदार्थविषये प्रक्रियायां च परस्परवैमत्यं विद्यते तथापि परमाणु कारणता विषये सर्वेषामैकमत्यमेव । एते सर्वेऽपि वादिनः पृथिव्यादिसर्वकार्याणां परमाणुकार्यत्वमेवेच्छन्ति न तु परमेश्वरोपादानकत्वमिति व्यक्तम् ।

एतन्नैयायिकादिमतं न समीचीनम् यतो जगत्कारणतया सर्वसंसारोपादान कारणरूपेणांगीकृतपरमाणूनामतीन्द्रियतया सर्वप्रत्यक्षसाधारणकारणमहत्त्वस्याभावेन प्रत्यक्षप्रमाणाभावात् । तथा च कूर्मरोमशशविषाणादिविषयेऽप्रवर्तमानं प्रत्यक्षं तेषां शशविषाणकूर्मरोमादीनामभावं गमयति न तु प्रत्यक्ष प्रमाणेन कूर्मरोमादेः सिद्धिस्तथैवातीन्द्रियतया सर्वाभिमतपरमाणावप्रवर्तमान प्रत्यक्षं परमाणूनामभावमेव गमयेदिति परमाणावप्रवर्तमानप्रत्यक्षं परमाणूनामभावमेव गमयेदिति प्रत्यक्षप्रमाणाभावात् परमाणोः सिद्धिर्न भवतीत्यतः प्रमाणासिद्धस्य परमाणोः स्वरूपस्यैवासिद्ध्या न परमाणुभ्यो जगदुत्पत्तिः । न चैतत्कथनं तदा शोभते यदि प्रत्यक्षमात्रं प्रमाणं भवेत् तथात्वे 'प्रत्यक्षमात्रं प्रमाणम्' इति वदतश्चार्वाकस्य त्वं भ्राता स्याः । तथा यदि प्रत्यश्रमात्रं प्रमाणं तदभाववस्तुनोऽभावाभ्युपगमे वियति पतन् पतत्री अतिदुरत्वात् विद्यमानचक्षुरादिप्रत्यक्षेण नोपलभ्यते इतितदभावः स्यात् । तथा लोचनस्थमञ्जनमतिसमीपे लोचने वर्तमानः समीप्यान्नोपलभ्यते इति किं तदभावो भवति । यथा वा सदेव घटादिरूपमन्धस्य प्रत्यक्षविषयं न भवतीति एतावता किं तदभावो निश्चीयते, तथा मनसोऽनवस्थानात्सदपि वस्तु तादृशपुरुषो न पश्यति । तथा यदतिसूक्ष्मं वस्तु तदपि प्रत्यक्षेण न गृहीतं भवति यथा द्व्यणुकधूमनीहारादयः । तथा यद् वस्तु भित्त्यादिव्यवहितं तत्समीपस्थं प्रत्यक्षेण न गृह्यते यथा कुड्ड्यादिव्यवहितं राजदारादिकं न पश्यति साधारणो जनः । तथा सदपि वस्तु अभिभवान् न पश्यति, यथाहनि विद्यमानमपि ग्रह-नक्षत्र-मण्डलं दिवसे सूर्यप्रभाभिरभिभूतं दृष्टं न भवति तथा समभिहारादपि विद्यमानस्य ग्रहणं न भवति, यथा कपोतराशौ प्रक्षिप्तः न परिचीयते, यथा वा जलराशौ प्रक्षिप्तं कमण्डलुजलं

Scanned by CamScanner ankurnagpal108@gmail.com

पार्थक्येन न ज्ञायते । यदि प्रत्यक्षमात्रनिवृत्त्या वस्तूनामभावः स्यात्तदा उपर्युक्तपदार्थानां प्रत्यक्षेनिवृत्तिरेव स्यात्, न तु निवर्तमानं भवति । यत्र वस्तु योग्यमन्यतमप्रतिवन्धकं भवति, तत्रैव तस्याभावो भवति, न तु सर्वत्र । तस्मान्न प्रत्यक्षतः परमाणूनामग्रहणे तदभावः कथमग्रहस्तेषां सूक्ष्मत्वात् । अथ यदि सूक्ष्मत्त्वान्न गृह्यन्ते तदा तदस्तित्वे किं प्रमाणमिति चेत् अनुमानमेव, अन्य थानुपपत्तिश्चेति गृहाण, तथाहि यदि मूलकारणं जगतोऽस्ति घटादिकार्यदर्शनात् कपालादितो घटादिवत् ।

तथाहि यथा घटादिकार्यं दृष्ट्वा तत्कारणभूतकपालादिकं ज्ञातं भवति तथैव महीमहीधरादिकं प्रात्यक्षिकं वस्तु दृष्ट्वा तत्कारणं चरमावयवरूपं पर माणुरूपकार्यमनुमितं भवति-अस्ति परमाणुः तत्कार्यान्यथानुपपत्तेः कारणसत्वे एव कार्यं भवति कारणाभावे कार्योत्पादायोगादिति । एवं क्रमेण परमाणोः सिद्धिसंभवेन प्रमाणाभावात्परमाणूनां सिद्धिर्नभवतीति कथनमयुक्तमिति चेदत्रोच्यते-वैदिकोऽयं मार्गः अत्रागमसिद्धस्यैव वस्तुनः सिद्धिराद्रियते । यथा स्वर्गापूर्वादिनां तत्र न प्रत्यक्षस्य न वाऽनुमानस्य प्रसरः । वेदस्य परमाणु कारणता प्रतिपादकादर्शनात् । नहि परमाणोः कारणताप्रतिपादकाः काचन श्रुतयः समुपलब्धा भवन्तीत्यागमप्रमाणेन तु परमाणूनां जगत्कारणत्वं नैव संभवति । तथा नानुमानेन जगत्कारणत्वं परमाणोः साधयितुं शक्यम् ? शुष्क तर्कस्यासाधकत्वात् तदाहुरानन्दभाष्कारा:-'अपि चान्यत्रप्रतिष्ठितस्यापि श्रुति विरोधिनस्तर्कस्य प्रकृतेऽप्रतिष्ठानात् । श्रुत्यानुकूलस्य तर्कस्य तु श्रुत्यर्थनिश्चा यकत्वादुपादेयत्वमेवेति हृदयम् । तथा च

'प्रत्यक्षमनुमानञ्च शास्त्रञ्च विविधागमम् ।
त्रयं सुविदितं कार्यं धर्मशुद्धिमभीप्सता' मनु. १२।१०५।

आर्षं धर्मोपदेशञ्च वेदशास्त्राविरोधिना ।
यस्तर्केणानुसन्धत्ते स धर्मः वेद नेतरः ॥ मनु. १२।१०९।

इत्यादिवचनैर्वेदाविरोधितर्कस्यैव तत्त्वनिर्णयसहकारित्त्वमुक्तम् । प्रकृते तु केवलं तर्कवादमाश्रित्य प्रधानकारणतायां नाप्रतिष्ठितत्वरूपदोषान्मोक्ष इति शुष्कतर्कनिराशः । अत एव 'अचिन्त्या खलु ये भावा न तांस्तर्केण योजयेत्'

Scanned by CamScanner
ankurnagpal108@gmail.com

इत्येवं श्रौतार्थनिर्णये शुष्कतर्काणां पौराणिकनिषेधोऽपि दृश्यते । तस्माच्छ्रौत मार्गमवलम्ब्य ब्रह्मण एव जगत्कारणत्वमास्थेयमितिदिक्' (आनन्दभाष्य २।१।११) इति । तथैव 'यत्नेनानुमितोप्यर्थः कुशलैरनुमातृभिः । अभियुक्ततरै रन्यैरन्यथैवोपपाद्यते' इत्यादिनामहताप्रक्रमेण तर्काप्रतिष्ठानादिति सूत्रेभामतिका रेणाचार्यान्तरभाष्यकारेणापि खण्डनादिति नानुमानेन परमाणूनां जगत्का रणत्वं कथमपि सिद्ध्यति ।

किञ्च तदेव वस्तु अनुमानेन साधयितुं शक्यते यत्रागमविरोधो न भवेत् यथा, 'सुमेरुः प्रस्तरमयः पर्वतत्वात् पर्वतान्तरवत्' इत्यनुमानं 'सुमेरुः स्वर्ण मयः' इत्यागमेन वाधितंसत् स्वसाध्यसाधनाय नालं भवति । यथा वा 'न रास्थिपवित्रम् प्राण्यङ्गत्वात् शङ्खवत् इत्यनुमानम् 'नारास्थिस्पृष्ट्वा सचैलं जलमाविशेदित्यागमवाधितं सत् मनुष्यास्थिनि पवित्रतां साधयितुं न शक्यते तत्कस्य हेतोः ? आगमबाधितत्वात् तथैव परमाणोर्जगत्कारणता साधकमनु मानमागबाधितत्वात् तद्विरुद्धार्थस्य साधनायोगात् अनुमानेनापि परमाणोर्ज गत्कारणत्वस्यासिद्धिर्भवतीति परमाणुसद्भावे एव प्रमाणं न भवति यदा तदा परमाणूनां जगत्कारणत्वमिति विचारस्य दूरोत्साहितत्वमेवायातीतिसारः ।

अपि च न्यायविदः परमाणोः परमकारणस्य नित्यत्वमणुत्वं च स्वी-कुर्वन्ति तद्विरुद्धं रूपरसादिमत्वं चेच्छन्ति न चैवं तस्य नित्यत्वं साधयितुं शक्यम् । तथा हि ये इमे गन्धादिकागुणास्ते सर्वपरमाणुगता भवन्ति अथवा एकैकोगुणः सर्वत्र ? तत्रैकैकगुणसद्भावे पृथिव्यां गन्धमात्रमुपलभ्येत जले स्नेहमात्रं तथा तेजोवायौ चापि इति पृथिव्यां गन्धमात्रमुपलभ्येत जले स्नेहमात्रं तथा तेजोवायौ चापि इति पृथिव्यां रूपं न स्यात् जलादौ स्पर्शादीनां सत्वं न स्यात् । यदि सर्वगुणः सर्वत्र तदावायावपि रूपगन्धादीनां सत्वं स्यात् ततश्च यत्र गुणाधिक्यं द्रव्यस्योपचय इतिपरमाणोरणुत्वं न स्यात् । तथा एकस्य परमाणोः षड्भिर्देशैः सम्बन्धेन सदशत्वादित्यणुत्वविपर्ययः प्राप्नोति, तथा परमाणुर नित्योरूपादिमत्वात् घटादिवत् यथा घटादिकपदार्थोरूपादिमानिति तत्रानित्य मिति अनित्यत्वव्याप्यरूपादिमान् घट इत्यादिपरामर्शबलेन घटादावनित्यं सिद्धं भवति तथैव परमाणौ रूपादिमत्वहेतो विद्यमानत्वेन अनित्यत्वव्याप्यरूपादि

Scanned by CamScanner ankurnagpal108@gmail.com

मान् परमाणुरिति परामर्शबलेन परमाणावप्यनित्यत्वं सिद्ध्येदिति गतं परमाणोर्नित्यत्वकथेति न परमाणुर्नित्यो यथोक्तानुमानेन तेषामनित्यत्वसाधनात् ।

न च 'परमाणुरनित्यो रूपवत्वादित्यत्र रूपवत्वहेतुरेवासिद्धोऽर्थात् रूपाभाववान् परमाणुरिति निश्चयेन रूपवानिति पक्षधर्मताया अभावस्तदभावात् अनित्यत्वव्याप्यरूपवान् परमाणुरितिपरामर्शाभावेनानित्यत्वसिद्धिर्न स्यादिति यथा 'शब्दो गुणश्चाक्षूषत्वादित्यत्र चाक्षुषत्वाभाववान् शब्द इतिनिश्चयकाले गुणत्वव्याप्यचाक्षुषत्ववान् शब्द इत्याकारकपरामर्शाभावेन शब्दोगुण इत्यनुमितिर्न भवति तथैव परमाणौरूपाभावेन हेत्वभावात्तादृशानुमानेन' 'परमाणुरनित्यत्वानुमानं न स्यात्ततश्च कथं परमाणावनित्यत्वमुच्यते इति वाच्यम् । भावानवबोधात् । अर्थात् यदि परमाणौ पार्थिवादित्रितयेरूपवत्वं न भवेत् तदा रूपरहितजलादिपार्थिवादिपरमाणुतो जायमानद्व्यणुकादिकमपिरूपवन्न स्यात् । ततश्चरूपादिरहितद्व्यणुकादिपरम्परया घटजलादिमहाभूतेऽपि रूपवत्वासिद्ध्या घटादेश्चाक्षुषत्वादनुपपत्तिरेव स्यात् । यतो द्रव्यचाक्षुषप्रत्यक्षे उद्भूतरूपस्य महत्वस्य तथा द्रव्यस्पार्शनप्रत्यक्षे च स्पर्शस्य कारणताया आवश्यकतया परमाणौरूपस्पर्शयोरभावे महाभूतपर्यन्तघटादीनां प्रत्यक्षता नस्यादिति । 'परमाणुरनित्योरूपत्वा' दित्यनुमानमसिद्धमिति तादृशानुमानेन परमाणोरनित्यत्वं न सम्भवतीति चेत्तत्रोच्यते श्रुत्या परमेश्वरव्यतिरिक्तस्य सर्वपदार्थस्य जन्यत्वविनाशवत्वयोः प्रतिसर्वान्तर्गतपरमाणोर्नित्यत्वासिद्ध्या तादृशपरमाणोर्जगतकारणता न भवतीति । यतः श्रुतिविरुद्धस्यसाधनमनुमानेनासिद्धमेव, अनुमानेन परमाणुं प्रकल्प्य तस्य जगत्कारणत्वप्रकल्पनं सर्वथैवानुचितमितिभावः ।

किंच 'सदेवसोम्येदमग्रे आसीदेकमेवाद्वितीयम्' 'आत्मा वा इदमेक एवाग्रे' 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति' तद् ब्रह्म तद्विजिज्ञासस्व' इत्यादि 'अहं सर्वस्य प्रभवो मत्तःसर्वं प्रवर्तते' । 'अहमादिश्च मध्यं च भूतानामन्त एव च 'कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम्' इत्यादिश्रुतिः स्मृतिश्च परमेश्वरस्य जगदुत्पत्तिस्थितिविनाशकारणत्वं प्रतिपादयन्ति । ततश्च यदि परमाणोरचेतनस्य जगत्कारणत्वं मन्येत तदा श्रुत्या स्मृत्या च विरोधः समुत्पद्यते इति परमेश्वरस्य जगत्कारणत्वप्रतिपादक

Scanned by CamScanner ankurnagpal108@gmail.com

श्रुत्यादिविरोधात्परमाणूनां जगत्कारणत्वं न संभवति । श्रुत्यनुमानयोर्विरोधे श्रुतिविरोधस्यैव ज्यायस्त्वमर्थात् बाधकत्वं तदितरस्य बाध्यत्वमिति श्रुतिबाधितमनुमानं परमाणोर्जगत्कारणत्वसाधनाय न भवतीति ध्येयम् । ननु भवतु श्रुतिरनुमानस्य बाधिका परन्तु प्रकृते तथा न संभवति यतः प्रकृतेऽनुमानं लौकिकं कार्यकारणभावं बोधयति श्रुतिस्त्वलौकिकं धर्माधर्मादिकं बोधयतीत्युभयोर्विभिन्नविषयत्वात् न वाध्यबाधकभावो विषयैक्ये विरोधे भवति विरोधे च बलीयसा दुर्बलो बाधितो भवति । इहतूभयोर्विषयौ विभिन्नौ, अनुमानस्य विषयोलौकिककार्यकारणभावः श्रुतेस्तुधर्माधर्मादिकः । तत्कथमुभयोर्विरोधादनुमानस्य श्रुतिबाध्यतेतिचेत्सत्यम् ।

स्वर्गापूर्वादिकजनको धर्मादिस्तत्कारणं वाजपेयादिर्यागो वेदैकसमधिगम्यत्वं न वेदस्य विषयो विभिन्नस्तद्भिन्नश्च विषयोऽनुमानस्य तत्र विषयभेदे बाध्यबाधकभावो न भवति नहि भवति घटाभाववद्भूतलमिति घटाभावप्रकारकभूतलत्वावच्छिन्नविशेष्यकनिश्चयस्य संयोगेन घटत्वावच्छिन्नप्रकारकभूतलजलादिविषयज्ञानविरोधित्वम् तत्कथम् ? भूतलधर्मिकघटाभावप्रकारकनिश्चयस्य भूतलधर्मिकघटवत्वप्रकारज्ञानस्यैव विरोधिता न तु जलधर्मिकघटप्रकारकज्ञानस्य तद्वात्ता बुद्धि प्रति तदभाववत्तानिश्चयस्यैव विरोधिताया अन्यत्र व्यवस्थापनात् । तद्वत् प्रकृते भवदुदीरितक्रमेण श्रुत्यनुमानयोर्विभिन्नविषयता प्रतिभासमानत्वेऽपि यथा आगमस्य पूर्वकाण्डविषययागादिप्रतिपादकत्वमिति यागादिवेदैकसमधिगम्यस्तथैव परमेश्वरस्तस्मिन् जगत्कारणत्वादिप्रतिपादनमपि श्रुतेर्विषय एव कुतः ? नहि लोकसिद्धः परमेश्वरलोकोत्तरस्वरूपगुणविशिष्टः प्रत्यक्षेणानुमानादिप्रमाणेनाधिगन्तुं योग्यः, 'यतो वाचो निवर्तन्तेऽप्राप्य मनसा सह' 'अस्थूलमनणु' सपर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम्' इत्यादिश्रुतेः । किन्तु वेदैकसमधिगतः समानविषयतया विरोधो भवति तथा विरोधे सति प्रबलयाश्रुत्या दुर्बलस्यानुमानस्य बाधो भवतीति श्रुतिबाधितेनानुमानेन परमाणूनां जगत्कारणत्वसाधनं न युक्तमितिदिक् विस्तरस्तु 'अपरिग्रहाच्चात्यन्तमनपेक्षेति' सूत्रीयजगद्गुरुश्रीरामानन्दाचार्यप्रणीतभाष्यीयसौरभे द्रष्टव्यमिति संक्षेपः ।

Scanned by CamScanner ankurnagpal108@gmail.com

तदत्र सांख्याः-ननु न परमेश्वरो क्षरजगत उपादानम् यतः परमेश्वरस्य सर्व विकाररहिततया जगदाकारेण परिणामरूपविकारासंभवात् । तस्मात् सदृशविसदृशपरिणामात्मकमूलप्रकृतिरेव जडात्मिका जगदाकारेण विसदृशपरिणामवती जडजगदाकारेण परिणता भवतीति सैव प्रकृतिर्जगत आकाशादिप्रपञ्चस्योपादानम् । तदुक्तम्-

'मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकस्तुविकारो न प्रकृतिर्नविकृतिः पुरुषः ॥ इति ।'

तदयमर्थ सांख्यशास्त्रे चत्वारः पदार्थाः कश्चिदर्थं प्रकृतिरेव यथा मूल प्रकृतिः सा च सर्वदा प्रकृतिरूपैव न तु कदाचित् विकाररूपा सा सर्वस्य जनयित्री, अत एव सा मूलप्रकृतिरिति कथ्यते तस्या अपि मूलान्तरत्वेऽनवस्थानापातादिति प्रथमः पदार्थः । महत्तत्वाहंकारपञ्चतन्मात्रारूपाः सप्तप्रकृतिविकृत्युभयरूपाः । तथाहि महत्तत्त्वं मूलप्रकृतेः कार्यमिति विकारात्मकं कार्यं कारणञ्चाहंकारस्य । एवमहंकारो महतत्वस्य कार्यं विकारः कारणञ्चाकाशतन्मात्रायाः सूक्ष्माकाशस्तन्मात्रापदप्रतिपादितोऽहंकारस्य कार्यं कारणं च वायुतन्मात्रायाः कारणं वायुतन्मात्रं चाकशतन्मात्रकार्यं कारणञ्च तेजस्तन्मात्रस्य तेजस्तन्मात्रं पृथ्वीतन्मात्रस्य कारणं कार्यं च तेजस्तन्मात्रस्येत्येवं क्रमेण महत्तत्वादारभ्य पृथिव्यन्ततन्मात्रा सप्तप्रकृतिविकृतयो भवन्ति कस्यचिदपेक्षया प्रकृतिः कस्यचिदपेक्षया विकृतिर्यथापूर्वं प्रदर्शितम् ।

तथा षोडपदार्था विकाररूपा एव भवन्ति न तु कस्यापि कारणम् । तत्र चक्षुरादिनि पञ्चज्ञानेद्रियाणि वाक्पाणिपादपायूपस्थाख्यानि पञ्चकर्मेन्द्रियाणि, उभयात्मकं मनः तथा आकाशादिपञ्चमहाभूतानि एतानि सर्वदा कार्याण्येव न तु कस्यापि कारणानि । अर्थादेते षोडशसर्वदा कार्यरूपा एव न तु कारणरूपाः ।

न च महाभूतपृथिव्या गोघटवृक्षादयोऽनेके विकाराभवन्तीति गोघटवृक्षादिनां कारणत्वमिति तदपेक्षया पृथिवीभूतं कारणमिति कथमुच्यते न कस्यापि कारणमिति वाच्यम् भावानवबोधात् । अर्थात् स्थूलत्वमिन्द्रियग्राह्यत्वं च यथा पृथिव्यां तथैव घटादिष्वपि समानरूपेणैव विद्यते न तु यादृशं स्थू

Scanned by CamScanner ankurnagpal108@gmail.com

लत्वमिन्द्रियग्राह्यत्वं मृथिव्यां तदपेक्षया विलक्षणं गोघटादिषु । अथ च तत्त्वान्तरोत्पादकत्वमेव प्रकृतित्वम् । न च पृथिव्यपेक्षया तत्त्वान्तरत्वं गोघटवृक्षादिनाम् । अत्र तत्त्वान्तरोत्पादकत्वाभावादेते षोडशविकारा एवेति ।

तथा पुरुष आत्मा न प्रकृतिरूपोऽर्थात् न कस्यापिकारणमपरिणामित्वात् । न वा विकृतिः कस्यापि कार्यपरिणामित्वाभावात्तस्मान्नपुरुषः प्रकृतिर्विकृतिर्वेति ।

सेयं मूलप्रकृतिः सत्वरजस्तमसां गुणत्रयाणां साम्यावस्थारूपैव सा मान्येनैषामवस्थानं प्रलये सर्गे तु वैषम्यम् । अर्थात् प्रलयकाले सत्वं सत्व रूपतयैव परिणमते रजो रजो रूपतया तमस्तमोरूपतया अयमेव सदृशपरिमाणो गुणानाम् । तदुक्तमीश्वरकृष्णेन-

सत्वं लघुप्रकाशकमिष्टमुपष्टम्भकं चलं च रजः ।
गुरुवरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिरिति ॥

सत्वं सर्वदैव लाघवप्रकाशाभ्यां युक्तं भवति अयमेव सत्वगुणो लाघवान्वितोऽग्नेरूर्ध्वज्वलने वायोश्च तिर्यग् गमने हेतुर्भवति प्रदीपज्ञानादेः प्रकाशात्मककार्ये रजोगुणश्चलनस्वभावक उपष्टम्भकश्च तमस्तु गुरुरावरणकंचेति । रजोगुणश्चलनस्वभावकः सर्वदैवसत्वं प्रवर्तयेत् यदि गुरुणातमसानाव्रियेत तमसाऽवृत्तं तु क्वचिदेवप्रवर्तयति न सर्वत्रेति । न च गुणानां परस्परविरोधशीलनां परस्परविरोधात् सर्वेध्वस्ताभवेयुस्ततश्च सर्गकथैवास्तमियात् ? तत्राह, 'प्रदीपवच्चार्थतो वृत्तिरिति' सत्यं गुणाः परस्परविरोधभाजस्तथापि अर्थतः पुरुषार्थ भोगापवर्गमाकलय्य विरोधं परित्यज्य मिलिताः सन्तः स्वस्वकार्यं करिष्यन्ति यथा प्रदीपः । अर्थात् वर्तितैलानलाः परस्परविरुद्धा अपि मिलिताः सन्तः प्रदीप पदवाच्या भवन्तः प्रकाशलक्षणं कार्यं कुर्वाणा दृश्यन्ते अर्थकारित्वसमये विरोधरहिता भवन्ति ।

यद्यपि सुन्दोपसुन्दौ परस्परं विवदन्तौ ध्वस्तौ अभवतां सैवस्थितिः प्रकृतेः तथापि प्रदीपदृष्टान्तेनायं दोषो मार्जनीयः ।

यद्यपि प्रकृतिरचेतना आलोचनसाध्यकार्यकरणेऽसमर्था तथापि पुरुष संयोगात्प्राप्तचैतन्याऽलोच्यकार्यं सर्गात्मकं करोति । तदुक्तम्-

Scanned by CamScanner ankurnagpal108@gmail.com

तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम् ।
गुणकर्तृत्वेऽपि तथा कर्तेव भवत्युदासीनः ॥' इति ।

प्रकृतिर्ज्ञानरहिता पुरुषश्च कर्तृत्वादिधर्मरहितः, 'तस्माच्च विपर्यासात् सिद्धं साक्षित्वमस्य पुरुषस्य । कैवल्यं माध्यस्थं द्रष्टृत्वमकर्तृभावश्च' इत्यादिना प्रदर्शितस्ततश्च पुरुषस्य कर्तृत्वं प्रकृतेर्ज्ञानादिमत्वं कुतः ? इत्याशङ्क्य कथितम् 'तस्मात्तत्संयोगादचेतनम्' इत्यादि । यस्माज्ज्ञानकर्तृत्वादिनां पूर्वप्रकरणेन वैयधिकरण्यं प्रदर्शितं ततश्च सर्गाभावोदोषस्तस्मात् कारणात् तत्संयोगात् अचेतनं चेतनारहितमपि लिङ्गे बुद्धिश्चेतनावदिव भाति यथा अयः पिण्डः स्वभावतः शीलतोपि वह्निसंयोगात्तप्त इवाभाति । तथैव पुरुषसंयोगात्प्रकृतिः चेतनेव विभाति न तु वस्तुतस्तत्र चैतन्यं स्वभावतस्तु जडत्वमेव । तथा गुणानां सत्वादीनां कर्तृत्वेपि उदासीनः पुरुषः कर्तृगुणविशिष्टप्रकृतिसंयोगात् कर्त्ता इव भवति न तु वस्तुतः कर्त्ताकृतिमान् पुरुषो भवति । अर्थात् वास्तविककर्त्तृत्वमचेतनायां प्रकृतौ पुरुषे तु प्रकृतिसंसर्गात् । तथा वस्तुतश्चैतन्यं पुरुषे तिष्ठति । किन्तु पुरुषसंयोगात् प्रकृतिश्चेतना वद्विभाति । एतादृशी प्रकृतेः सकाशाज्जडात्मकं जगद्भवतीति तत्र सर्गे प्रकृतिरेवोपादानम् । तदुक्तं,

'प्रकृतेर्महान् ततोऽहंकारस्तस्माद्गणश्च षोडशकः ।
तस्मादपि षोडशकात्पञ्चभ्यः पञ्चभूतानि'

एतेषां महदादीनां स्वरूपगुणादिकं यथा शास्त्रमवगन्तव्यम् । न चाचेतनायाः प्रकृतेः कथं प्रवृत्तिः नह्यचेतनस्य क्वचित्प्रवृत्तिर्दृष्टेति साम्प्रतमचेतनस्यापि दुग्धस्य पयसश्च प्रवृत्तिदर्शनात् । तदुक्तं-

'वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य ।
प्रतिपुरुषविमोक्षार्थं प्रवर्तते तद्वदव्यक्तम् ॥

यथा दुग्धमचेतनमपिवत्सपोषणाय गोस्तनात्क्षरति यथा वा जलं स्वयमेव लोकोपकाराय प्रवर्तमानं भवति न तु कश्चिच्चेतनः प्रवर्तको भवति तद्वदनागतभोगापवर्गाय अचेतनापि प्रवर्तते एव । तस्मात् न परमेश्वरो जगत्सर्जकः प्रकृत्यैव संभवात् ।

तदेवमत्र प्रश्नस्याशयः कपिलमतानुयायिनः, यथा मृत्तिकया जायमा-

Scanned by CamScanner ankurnagpal108@gmail.com

नस्य घटादिद्रव्यस्याचेतनस्याचेतनजातीयं मृत्तिका द्रव्यमुपादानकारणं भवति तथैव सत्वरजस्तमोगुणमयस्य सुखदुःखमोहसमन्वितस्य परिदृश्यमानसकल जगतो गुणत्रयसाम्यलक्षणं मूलप्रकृतिपर्यायं प्रधानमेव कारणं भवति यथा हि मदध्यादिपरिणममानस्य पयसः स्वेतरनिरपेक्षं प्राथमिकपरिस्पन्दप्रभृतिपरिणा मप्रवाहः स्वतएव भवति न तत्र स्वेतरचेतनस्याचेतनस्यवाऽवश्यकता दृश्यते यथा वा तोयदविमुक्तस्य स्वभावत एकरसस्य जलस्य नारिकेलहरीतकी आम लकादितत्तद्भूविकारानासाद्य मधुराम्लतिक्ताद्यनेकप्रकारेन परिणामप्रवृत्तिपरि दृश्यते-तेनैव प्रकारेण सततपरिणामस्वभावस्य प्रतिसर्गावस्थायां प्रलये सदृशपरिणामतया वर्तमानस्य मूलप्रकृत्यपरपर्यायस्य प्रधानस्य गुणत्रयात्मकस्य चेतनाद्यनधिष्ठितस्य केवलस्यैव सर्गाद्यवस्थायाम् गुणत्रयवैषम्यमूलकविचित्रो विलक्षणपरिणामः स्यादेवेति न कापि क्षतिरित्यतः प्रधानमेव जगतः स्वतन्त्रं स्वेतरानपेक्षं संभवत्येवेति प्राश्निकानामाशयः संक्षिप्तः ।

समाधाता इत्थं प्रतिपादयति-परपरिकल्पितमचेतनमचेतनत्वादीश्व राधिष्ठानमन्तरेण प्रवर्तितुं नोत्सहते रथादिवत्यथाऽवेतनरथादिपदार्थोऽश्वाश्ववाह मन्तरेणगमनाय पर्याप्तं न भवति । तथैवेश्वरस्याधिष्ठातृत्वमन्तरेण जडस्य प्रधा नस्य परिणामानुपपत्त्या सर्गाद्यभाव एव स्यात् तदुक्तम्-

'प्रकृतिं पुरुषंचैव प्रविश्यात्मेच्छया हरिः ।
क्षोभयामास सम्प्राप्ते सर्गकाले व्ययाव्ययौ' इति ।

अर्थात् हरिः शरणागतजनसर्वपापहारकसर्वेश्वरश्रीसीतानाथः स्वकी येच्छया न तु कस्यापि प्रेरणादिना प्रकृतिं पुरुषं च प्रविश्य अन्तर्यामित्वात्तदुभ यान्तः प्रवेशं कृत्वा 'व्ययाव्ययौ' व्ययौ विनाशः प्रलयः, अव्ययस्तद्भिन्नः सर्गस्त दर्थंसर्गकाले समागते सति सर्गाय क्षोभयति प्रेरयति प्रलयकाले समागते तु भगवान् प्रकृतिं प्रधानपुरुषं जीवात्मानं प्रेरयतीति ततश्च प्रकृतिपुरुषाभ्यामीश्व राधिष्ठितत्वाभ्यामेवोत्पत्तिप्रलयौभवत इति ।

अनेन वचनेनेदमायाति यत् परमेश्वराधिष्ठानमन्तरणाचेतनस्य प्रधानस्य परिणामो नैव भवति यदा च प्रवृत्तिस्तदेश्वराधिष्ठितत्वेनैव भवति । न च य थाऽयस्कान्तकणिर्वाह्याभ्यन्तरेण चेतनाचेतनयोः सहकारमन्तरेणैव स्वसमीपस्थं

Scanned by CamScanner ankurnagpal108@gmail.com

लौहादिकं स्वाभिमुखं प्रवर्तयति तथैवानपेक्ष्यैवेश्वरं प्रकृतिः सर्गकालावसरे सर्वं परिणामयिष्यतीति वाच्यम् अयस्कान्तादिस्थलेपि परमेश्वराधिष्ठानत्वस्यैव विद्यमानत्वान्नकोऽपि दोषः । परमेश्वरो हि सर्वस्य नियमाक इति परमेश्वरः नियन्तृत्वे नायस्कान्तादिस्थलेऽपि प्रवृत्तेः । अन्यथा दण्डाद्यचेतनानामपि स्वतः प्रवृत्तिसंभवप्रसंगात् । न च कण्टकतैक्ष्ण्यादिवत् स्वभावत एव चेतनस्य प्रवृत्तिः संभवेदित्युच्यते तदा लौकिककार्यकारणभावावलंबनं सर्वत्रास्तमियात् स्वभावादेव सर्वत्र संभवात् । तस्मात्परमेश्वराधिष्ठितत्वैनैवाचेतनस्य प्रवृत्तिर्नतु स्वातन्त्र्येणेति न प्रकृतिर्जगत उपादानमपितु परमेश्वरः श्रीरामः सर्वशक्तिमानेव जडचेतनजगतः कारणं न परमेश्वरातिरिक्ताः प्रकृतिः परमाणुर्वाकारणमिति राजमार्गः । तदाहुर्जगद्गुरवः श्रीश्रुतानन्दाचार्याः-

त्रिधापि श्रुतौ सर्ववित् सर्वशक्तिर्जगत्कारणं जानकीनाथ एव ।
ततः कापिलं गौतमीयञ्च शैवं च शाक्तं तथाऽन्यन्मतं नानवद्यम् ॥

(श्रौतसिद्धान्तविन्दुः) अपि च कदाचित्साङ्ख्यश्रद्धामनुरुध्य परमेश्वराधिष्ठानमन्तरेणस्वयमेव जगदाकारेण प्रकृतिः परिणमते इति स्वीक्रियेत तदा सर्गनियामकस्य कस्यचिदप्यभावेनानवरतं सृष्टिरेवस्यादिति स्थितिसंहारयोर्विलोप एव प्राप्तो भवेत् । अथवा प्रलय एव सर्वदा भवेत् न तु कदाचिदपि सर्गः स्यात् न चेष्टापत्तिः सर्गान्तरमेव प्रलयस्य शास्त्रे श्रवणात् अनुभवाच्चलोके घटाद्युत्पादानन्तरमेव तद्विनाशस्य संभवात् । 'प्रतियोगिता सम्बन्धेन विनाशं प्रति तादात्म्यसम्बन्धेन प्रतियोगिनः कारणत्वनिश्चयात् । दृश्यते श्रूयते च जगत उत्पत्तिस्थितिसंहारो भवतीति । तस्मात् जगत उत्पत्यादीनामभावोव्यत्यासोऽनियमोदुर्भावो वा न कल्पयितुं शक्य इति कालभेदेन जायमानसर्गतदीयसंहारव्यवस्थाया अनुपपत्तिरेवस्यादिति न परमेश्वरस्याधिष्ठानमन्तरेण स्वातन्त्रेण प्रधानं जगतः कारणमपितु परमेश्वर एव ।

अपि च यथा परमाणवो न जगत्कारणं प्रधानं चाचेतनत्वाज्जगतः सर्गादिकारणं न भवति तथैव ब्रह्मरुद्रभृतयो जीवा अनादिकालिका अपि न जगतोऽभिन्ननिमित्तोपादानकारणानि संभवन्ति कुतः ? जीवानां कर्मपराधिनत्वात् स्वयं दुखादिमत्वाच्चेति । अर्थात् हैरण्यगर्भाः पाशुपताश्च ब्रह्मादिकं जीवं प्रजा.

Scanned by CamScanner ankurnagpal108@gmail.com

पतिमागमसिद्धम्, 'हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिः' इत्याद्यागम सिद्धं निमित्तकारणं मन्यते अर्थात् उपादानं जगतः किमप्यन्यम् ब्रह्मारुद्रा दिको देवो जगतो निमित्तकारणमिति । तन्न मनोरमम्, रुद्रादिनां कर्मपराधि नत्वात् । अर्थात् ब्रह्मादिको जीवः जीवत्वात् संकुचितविज्ञानशक्तिः सन् यथा स्वेच्छामात्रेण नकिञ्चिददि कर्तुं समर्थो जीवान्तरवत्, तथैव हिरण्यगर्भस्य कर्मा धिनतया जगद्व्यापारकार्येनैव शक्तः, अर्थात् कर्माधीनतया संकुचितविज्ञा नो ब्रह्मा परमेश्वरव्यतिरिक्तेन मनसाप्यालोचयितुमशक्यस्य जडचेतनसकल-जगत उत्पत्यादिकार्यकरणे सर्वथा ब्रह्मादिको देवोऽशक्त एव । ततो ब्रह्मारुद्रो वा जगदुत्पत्यादौ कर्तृकारको न स्यात्, उपादानगोचरापरोक्षज्ञानचिकीर्षाकृति मत्वस्यैव कर्तृत्वेन एतादृशजगत्कर्तृत्वस्य रुद्रादावभावात् । किन्तु भगवान् पर मेश्वरश्रीराम एवोत्पत्यादिकं कर्तुं समर्थो नान्यस्तद्व्यतिरिक्तः । किञ्च 'अ-पहतपाप्मा विजरो विमृत्युः' इत्यादिश्रुतिकथितप्रकारेण कर्मानधीनः तथा 'सत्यंज्ञानमानन्दं ब्रह्म' इत्यादिश्रुतिप्रतिपादितप्रकारेण निरतिशयानन्दयुक्त इतितादृशपरमेश्वर एव स्वेच्छया जगतः स्थावरजङ्गमस्य सकलप्रपञ्चस्य सर्गक रणे समर्थः न ततो व्यतिरिक्तो ब्रह्मा वा रुद्रादिर्वेति । उभेदेवा जगदन्तर्वर्तिनः कर्माधीना इति न स्वेच्छया जगद्व्यापारे समर्थाः । तदुक्तम्-

ब्रह्माद्याः सकलादेवा मनुष्याः पशवस्तथा ।
विष्णोर्माया महावर्तमोहान्धतमसावृता ॥
आब्रह्मस्तंव पर्यन्ता जगदन्तर्व्यवस्थिताः ।
प्राणिनः कर्मजनिताः संसारवशवर्तिनः ॥' इति ।

अर्थात् ब्रह्माद्या इत्यादि ब्रह्मादया हिरण्यगर्भप्रमुखा देवा देवकोट्यन्त र्गताः सकला समस्ता अपिचेतनवर्गाः तथा ततो हीना मनुष्या मनुष्ययोनौ स मुत्पन्ना ब्राह्मणाद्यवान्तरभेदभिन्नास्तथा मनुष्याद्यपेक्षयापि हीनाः पशवो लोमवल्लाङ्गूलावछिन्नगोमहिषजाऽजाविगर्दभोष्ट्रप्रभृतयश्चतुष्पदा द्विपदा वा उभ यतो दत एकतोदन्ता वा इत्याद्यनेकाः सर्वेपि जीवाः विष्णोः परमात्मनो माया महावर्तमोहात्मकान्धतमोभिरावृत्ताः मायात्मकान्धतमसा तादृशान्धकारेण संछन्न मतयो भवन्ति तथा हिरण्यगर्भादारभ्य तृणादिपर्यन्ताः सर्वेपि जीवाः-स्वकृत

Scanned by CamScanner ankurnagpal108@gmail.com

कर्मोत्पादितसंसाराधीना जगतोऽन्तर्गता एव अर्थात् ये केचनजीवाः सन्ति ते सर्वेऽपि स्वकृतकर्मपराधीनाः संसारे वसन्ति । अनेन वचनेन कर्मपराधीनत्वं संसारमध्ये निविशमानत्वं तृणादिजीवानां कथितं तथैव रुद्रहिरण्यगर्भादिनामपि कर्मपराधीनत्वं संसारान्तर्गतत्वं प्रतिपादितमित्येवं हिरण्यगर्भादेः कर्मवश्यतां प्रतिपाद्येतरजीववत् दुखादिमत्वमपि वचनान्तरेण प्रतिपादयति-

ततः क्रोधपरीतेन संरक्तनयनेन च ।
वामाङ्गुष्ठनखाग्रेण छिन्नं तस्य शिरो मया ॥
यस्मादनपराधस्य शिरश्छिन्नं त्वया मम ।
तस्माच्छापसमाविष्टः कपालीत्वं भविष्यसि ॥' इति ।

इत्थं हि श्रूयते पूर्वं कश्मिंश्चित्कल्पे हिरण्यगर्भस्य मुखपञ्चकमासीत् अथ च किमपि कारणमादाय कोपकुपितः शिवो ब्रह्मणः पञ्चमं मुखमच्छिनत्, ततः प्रभृति स ब्रह्मा चतुर्मोखो जातः । ततश्छिन्नशिरो ब्रह्मा शिरश्छेदनजनितं दुःखमनुभूय शिवाय शापं दत्तवान् यत्त्वं सर्वथाघरहितस्य शिरश्छित्वाऽदुखयः ततोऽद्यप्रभृतिः भूतप्रेतादिगणविभूषितोऽपवित्रशरीरकपाली भवेति शशाप । अत्र प्रथम पचनं शिवस्य स कमपि कथयति ततो मया शिवेन क्रोधजनित कमलवत् ताम्रजनयनेन वामांगुष्ठनखद्वारा न तु त्रिशूलादिना शस्त्रान्तरेण वा तस्य व्यलीकाचरणवतो ब्रह्मणरेवं शिरश्छिन्नं कर्तितमिति ।

द्वितीयवचनं ब्रह्मणः, ततः शिवेन कृतशिरश्छेदनजनितदुःखदुखितो ब्रह्मा शिवमपि शशाप हे विरूपलोचन ! सर्वथापराधरहितस्य मे मम त्वया कपालीवत् निर्दयोभूत्वा मदीयशिरश्छेदनं कृतवान् तस्मात् कारणात् मम शाप समाविष्टोभूत्वाऽद्यप्रभृतिकपालिनो रूपं विभ्राणः श्मशानात् श्मशानान्तरं भ्रमन् भवेति ।

एतावता प्रदर्शितपौराणिकवचनेन हिरण्यगर्भशिवप्रभृतिप्राथमिकजीवा नामपि जगदन्तर्गतत्वेन कर्मपराधीनत्वं तथा कर्माधीनत्वेन दुःखादिमत्वं च प्रदर्शितं भवति ततश्चावृतज्ञानाः शिवादयो विशिष्टतत्तद्गुणवन्तश्चेतनाभ-वन्तोऽपि न जगत उत्पत्यादिकरणे समर्थाः, इतरजीवादिवत् यथेतरे जीवाः संकुचितविज्ञानत्वेन कर्मवशाद्दुःखादिमन्तश्च जगत उत्पादनादिकं कर्तुं न समर्था

Scanned by CamScanner ankurnagpal108@gmail.com

अपितु संकोचरहितविज्ञानवान् कर्मानधीनः कर्मणोऽपि प्रेरकः सर्वान्तर्यामी सर्वशक्तिः परमेश्वरः श्रीसीतानाथो जगन्नायकः कर्तुमकर्तुं समर्थः सन् फलविशेषमाप्तसर्वकामतयाऽनभिसन्धाय जगद् व्यापारेऽधिकृतो भवतीति विज्ञेयम् ।

अयं च भगवान् यज्जगतः कारणं भवति तत् स्वेच्छया नत्वेतस्य जगत् कारणत्वमविद्याकर्मपरनियोगादिकारणकं भवति अयं तु स्वेच्छातिरिक्तं सर्वमविद्यादिकं तिरस्कृत्य पुरस्कृत्य च स्वकीयेच्छां जगदुत्पादयन्भवति सर्वशक्तिमत्वात् ।

अर्थात् यदिदं कारणत्वमविद्याकर्ममूलकं तत्सकलजीवसाधारणम् । लोके कार्यकारणभावतयाऽवगते कारणत्वं विषयसंपर्कजनितसुखकारणेनाविद्यया च भवति । तत्र शास्त्रानुकूलं फलं कर्मप्रधानकं भवति, लौकिकानां फलमविद्याप्रधानकमेव । ये च सर्गादौ परमेश्वरेणाधिकारिहिरण्यगर्भादयस्तत्कार्ये विनियोजितास्तेषां तत्तत्कार्ये कारणत्वंस्वेतरपरमेश्वरनियोगगम्यं भवतीति विवेकः । तदुक्तं-

'प्राजापत्यं त्वया कर्म मयि पूर्वं निवेशितम् ।
एतौ द्वौ विबुधश्रेष्ठौ प्रसादक्रोधजौ स्मृतौ ॥'
'तदा दर्शितपन्थानौ सृष्टिसंहारकारकौ ॥' इति ।

अर्थात् हे भगवन् ! पूर्वं सर्गादिकाले एव त्वया सर्वान्तर्यामिणा सर्वशेषिणा च प्राजापत्यं प्रजापतित्वसंपादकं कर्मपुण्यविशेषलक्षणं मयि हिरण्यगर्भे निवेशितम्, अर्थाद् भवन्निवेशितकर्मबलेन जीवोप्यहं प्रतिबद्धज्ञानबलेन यथावत् सर्वमुत्पादयामि विष्णुश्च सर्वं यथावत् परिपालयति, रुद्रश्चविनाशकाले मत्कृतसर्गस्य विनाशं करोतीति । एतौ ब्रह्मरुद्रौ द्वावपि विबुधश्रेष्ठौ देवविशेषौ परमेश्वरस्य प्रसादांशेन क्रोधांशेन च समुत्पन्नाविति शास्त्रे प्रतिपादितौ यत इमौ परमेश्वरेण जातौ तस्मात् परमेश्वरप्रदर्शितमार्गौ सर्गस्य संहारस्य च संपादकौ भवतः । एतावता ज्ञायते यत् आधिकारिकहिरण्यगर्भादीनां जगदुत्पादनस्थितिसंहारकर्मणि यत्काणत्वं तत्परमेश्वरनियोगेनैव भवति न तु स्वातन्त्र्येणेति ब्रह्मादिवाक्यादेव ज्ञायते । परमेश्वरश्रीराम जगदुत्पत्यादिकारणत्वं तु न तथा तत्तु स्वातन्त्र्येणेति ।

Scanned by CamScanner ankurnagpal108@gmail.com

अयमर्थः-यदयं परमेश्वरो जगतः सर्गादिव्यापारं करोति स व्यापारः अविद्या कर्मपूर्वको भवति यथा लौकिकानाम् ? अथवा व्यसनितया जगद् व्यापारं करोति अथवा केचनित् प्रेरितः सन् करोति आधिकारिकपुरुषवदिति शङ्कायामुत्तरं दत्तवान् स्वेच्छयैव करोति जगद्व्यापारं परमेश्वरः । अयमाशयः परमेश्वरस्य सर्गादिकरणे किमविद्याकारणं व्यसनो वा कारणं कस्यचिदीश्वर व्यतिरिक्तस्यादेशविशेषो वा आधिकारिकादिवत् यथा लौकिकपुरुषस्य लौकि कसुखाद्यर्थं मिथ्याज्ञानं कर्म वा हेतुर्भवति, यथा वा कस्यचिद्व्यसनिनस्तमा लभक्षणादौ प्रवृतिः, हिरण्यगर्भादि वा सगोत्रोत्पादनाय परमेश्वरप्रवर्तितः प्रवर्तते इति । उत्तरंतु स्वेच्छा न कर्मादितो व्यसनतः परप्रेरितो वा किन्तु परमेश्वरप्रवृत्तौ तदीयेच्छैव केवलम् । अर्थात् 'निरवद्यं निरञ्जनम्, अमृतस्य परं सेतुर्दग्धेन्धनमि वानलम्' 'अपहतपाप्मा विजरो विमृत्युर्विजिघित्सोऽपिपासः, 'न तस्येशकश्चन' 'नतस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्चदृश्यते । परास्य शक्तिर्वि विधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' इत्यादिश्रुतिकथितप्रकारेण अवि द्यादिदोषप्रतिकूलस्य नियमकान्तररहितस्येश्वरस्य स्वकीयेच्छातिरिक्तं कार- णान्तरं न भवतीति । तदत्रानुसन्धेयाः-

'संक्षिप्य हि पुरा लोकान्मायया स्वयमेव हि ।
महार्णवे शयानोऽप्सु मां त्वं पूर्वमजीजनः ॥

पद्मे दिव्येऽर्कसंकाशे नाभ्यामुत्पाद्यमामपि ।
प्रजापत्यं त्वया कर्म मयि सर्वं निवेशितम् ॥

सोऽहं संन्यस्तभारो हि त्वामुपास्य जगत्पतिम् ।
रक्षां विधास्यन्भूतानां विष्णुत्वमुपजग्मिवान् ॥'

श्रीमद्रामायणस्योत्तरकाण्डस्था ब्रह्मणः सर्वेश्वरश्रीरामंप्रतिनिवेदिताः श्लोकाः सावधानेन विशेषतत्त्वार्थिभिः ।

ननु तथापि तस्येच्छोत्पादनायासः स्यादेवेतिचेत् संकल्पमात्रेण संपादना देतस्य सर्वथाऽयासरहितत्वात् । यद्यपीश्वरः सर्गादिकं करोति तत्र प्रयत्नरूपका यिकव्यापारं न कदापि करोति अयत्नरूपमानसव्यापारात्मकसंकल्पेन निस्पा दयति अतोऽस्य जगत्सर्जनादिव्यापारोऽयत्नसिद्ध एव । अर्थात् सङ्कल्पस्य कार

Scanned by CamScanner ankurnagpal108@gmail.com

णत्वकथनेन कायिकवाचिकव्यापारराहित्यं दर्शितम् । अनुदराकन्येतिवल्लेशतोप्यायासो न भवति ।

'सोऽकामयत बहुस्यां प्रजायेय' तथा-

'मनसैव जगत्सर्गं संहारञ्च करोति यः'

तस्यारिपक्षक्षपणे कियानुद्यम विस्तरः'

'विकारञ्च रामो दयाब्धिस्तथात्वे दयाशून्यतां पक्षपातञ्च नैति ।

प्रकारे विकारस्तथा चित्रसृष्टौ च हेतुर्यतः प्रणिनां प्राच्य कर्म ॥'

इत्यादिश्रुतिस्मृत्या परमेश्वरस्य जगत्सर्जने आयासराहित्यं दर्शितं भवतीतिसारः ।

अथैवमपि विचित्रानेकजगत्सर्गादिकं कुर्वत ईश्वरस्य तेन किञ्चित्प्रयोजनं विद्यते नवा ? आद्ये सकलकामावाप्तस्य तदसम्भवात्संभवे वा अस्मदादिवदनीश्वरत्वप्रसङ्गात् श्रूयते हि सकलकामावाप्त इति । यदि प्रयोजनं नास्तीति पक्षस्तदा निष्फले कर्मणि प्रवृत्तेरसम्भावात्, 'न कुर्यान्निष्फलं कर्म नात्यायामसुखोदयमित्यादिस्मृस्या निष्फलकर्मकरणस्य निषेधात् । 'प्रयोजनमनुद्दिस्य मन्दोऽपि न प्रवर्तते' इतिन्यायाच्चेति, चेदत्रोच्यते, अवाप्तसकलकामस्य लीलामात्रस्यैव प्रयोजनसद्भावात्, राजबालवत्, यथा कश्चिद् राजा सर्वर्द्धिसंपन्नोपि प्रयोजनविशेषमनभिसन्धायैव द्यूतादिके कर्मणि मनोरंञ्जनाय प्रवर्तते, यथा वा बालः प्रयोजनान्तरमनभिसन्धायैव बालुकादिगृहं निर्माय वयस्यैः सहक्रीडति, तथैव परमेश्वरस्यावाप्तसकलकामत्वेन प्रयोजनान्तराभावेपि जगत्सर्गादिकं कृत्वा भृत्यैःसह क्रीडति । एतत्तत्वं 'लोकवत्तुलीलाकैवल्यमितिसूत्रे विशेषतो निर्णीतवन्तोऽस्मदाचार्या जगद्गुरुश्रीरामानन्दाचार्यश्रीरामप्रपन्नाचार्याः श्रीआनन्दभाष्यव्याख्यानावसर इतिततोऽनुसन्धेयम् । 'क्रीडतोबालकस्येव चेष्टास्तस्य निशायेत्यभिधाय ।' प्रस्फुटितमिदं तत्त्वं महर्षिश्रीपराशरेण । 'अप्रमेयोऽनियोज्यश्च यत्रकामगमोवशी । मोदते भगवान् भूतैर्बालः क्रीडनकैरिव' इति च भगवान् व्यासः । तस्मादीश्वरस्य जगद्व्यापारं कुर्वतः प्रयोजनं लीलैव नान्यत्तदतिरिक्तम् ।

न च जगत् सर्गादिव्यापाराणां लीलामात्रप्रयोजनकत्वे प्रलयकाले लीलाया अवसानं स्यादितिवाच्यम् ? संहारस्यापि लीलारूपत्वादेवादोषात् ।

Scanned by CamScanner ankurnagpal108@gmail.com

यथा कश्चिद्बालको लीलाकरणायबालुकादिगृहं निर्माय क्रीडति क्रीडयति च वयस्यान्तरमपि, तादृशगृहोद्यानादिनिर्माणं लीलाभवति यथा तादृशक्रीडार्थं निर्मितबालुकागृहादीनां विनाशो लीलैव भवति बालानां तथैवेश्वस्य सर्गसंहारोऽपि लीलैवेति ।

अथ 'यतोवा इमानि भूतानि जायन्ते येन जातानि जीवन्ति' इत्यादि श्रुत्या परमेश्वरस्य जगदात्मककार्यं प्रति कारणत्वं कथितम् । तत्र कारणत्वं त्रिविधमुपादानं निमित्तं सहकारि च यथा घटादिकार्ये जनयितव्ये मृद्द्रव्यं कार्यसजातीयमुपादानं भवति कुलालादिकं चेतनः निमित्तमर्थात् कर्तृकारणं भवति, तत्र स्वेतरसकलकारकाप्रयोज्यत्वे सति स्वेतरसकलकारकप्रयोजकत्वरूपमेव कर्तृत्वमितिकर्तृलक्षणात् अथवोपादानविषयकापरोक्षज्ञानचिकीर्षादिमत्वमेव कर्तृत्वम् तादृशं निमित्तान्तर्गतकर्तृत्वं घटादिकंप्रति कुलालतन्तुवायादीनाम् । दण्डवेमादिकमेतस्य सहकारिकारणं भवति तद्वत्प्रकृते घटादिकंप्रति कुलालस्येव निमित्तत्वं भवति परमेश्वरस्य अथवा कारणान्तरत्वमपि भवतीतिचेत् ? अत्रोच्यते, परमेश्वरः स्वयमेव जगदाकारेण परिणमनात् कर्त्तृवदुपादनकारणमपि भवति अर्थात् लौकिकघटादिकार्ये मृद्द्रव्यमुपादानम् कुलालः कर्त्ता दण्डादिकं सहकारि च भवति प्रकृते तु मृद्रव्यवत् परमेश्वर एवोपादानम् जगदाकारेण परिणतत्वात् ।

न चान्यत्र उपादानकारणात् व्यतिरिक्तं निमित्तकर्त्ता भवति तद्व्यतिरिक्तं च सहकारी निमित्तं भवति तथैवात्र प्रकृतेपि भाव्यं कार्यकारणभावस्य सर्वत्र समानत्वात् तत्कथमत्र परमेश्वर एव त्रितयं भवति, अन्यत्र सिद्धकार्यकारणभावस्य विलोपयितुमशक्यत्वात् । अर्थात् यदीश्वरः कर्त्ता तदोपादानं न स्यात्, तदुपादानं स्यात् तदा कर्त्ता नस्यात्, सहकारिकारणमपि न स्यात् त्रयाणामपि काणानां परस्परभेददर्शनादितिवाच्यं भावानभिज्ञत्वात् । अयंभावः लोके लोकसिद्धकार्यकारणभावो भवतु नाम ? परन्तुशास्त्रसिद्धकार्यकारणभावे तु शास्त्रमेव प्रमाणं नतु लौकिकं कारणं कारणं भवति, किन्तु ततो विलक्षणमेव कारणं कारणं भवति । इह च शास्त्रप्रमाणं परमेश्वरश्रीरामस्यैव त्रिवीधकारणत्वं दर्शयति ततो न कस्यापि विरोधस्यावकाशो भवति । तथा च-लोके

Scanned by CamScanner ankurhagpal108@gmail.com

उपादाननिमित्तसहकारिणां लोकसिद्धत्वात्परस्परं भेदो भवतु, अर्थात् यदुपादानं तदन्य निमित्तं ततोपिभिन्नं सहकारि प्रकृते तु त्रिविधमपिकारणं सर्वशरीरी सर्व शक्तिको भगवान् श्रीसीतानाथ एव भवति । लोके सामान्यतः कार्योत्पत्तौ निमित्तोपादानसहकारिरूपेण त्रिप्रकारकं भवति । तत्र कर्तृव्यतिरिक्तं निमित्तमु पादानं च कार्यरूपेणपरिणामयिता कर्त्ता भवति, कार्यरूपेण परिणामयोग्य द्रव्यंमुपादानं भवति तथा कार्योत्पत्तौ यदुपकरणं तत्सहकारिकारणम् । तत्र घटपटादीनां कर्त्तृकारणं कुलालादयः, मृदादिकमुपादानं दण्डवेमादयस्सहका रिकारणं भवति । प्रकृते तु स्थावरजङ्गमात्मककार्योत्पत्तौ परमेश्वर एव त्रिप्र कारकमपि कारणं भवति तथाहि-'एकोहं बहुस्यां प्रजायेय' इत्यादिश्रुतिसिद्धवि लक्षणसङ्कल्पविशिष्टो भगवान् 'सर्वेषामवताराणामवतारी रघूत्तमः' 'परान्नाराय णाच्चैव कृष्णात्परतरादपि । यो वै परतमः श्रीमान् रामो दाशरथिः स्वराट्' इत्याद्यागमप्रतिपादितः सर्वशरीरी सर्वेश्वरश्रीरामः कर्तारूपो निमित्तकारणं भ वति, सङ्कल्पविशिष्टत्वेन कर्तृत्वात्, 'तर्ह्येदमव्याकृतमासीत्' इत्यादिश्रुतिसिद्ध नामरूपविभागानर्हतयास्वविशेषणीभूतसूक्ष्मचिदचिद्विशिष्टः सन् स भगवान् श्रीराम एव जगदुपादानकारणं भवति तथा 'परास्यशक्तिर्विविधैव श्रूयते स्वाभा विकीज्ञानबलक्रिया च' इत्यादिश्रुतिशतबोधितज्ञानशक्त्यादिविशिष्टो भगवान् श्रीसीताभिन्नस्वरूपः श्रीदाशरथिः स्थावरजङ्गमात्मकजगतः सहकारिकारणं चापि भवतीत्येवं क्रमेणैक एव भगवान् जगतः त्रिविधं कारणं भवति तदे तच्छास्त्रानुकूलमितिभावय ।

ननु तथापि निमित्तोपादानत्वमेकस्यैव भवतीति न लोकसिद्धं नवा तादृ शीकाचनश्रुतिरप्युपलभ्यते यद्बलेन तथात्वं स्वीकुर्मः ? इत्थं सन्दिहानं श्रुति स्मृतिप्रदर्शनेन परितोषयामि 'सदेवसोम्येदमग्रे आसीदेकमेवाद्वितीयम्' तदा- त्मानं स्वयमकुरुत सच्च त्यच्चाभवदित्यादि-

'स्त्रष्टा सृजति चात्मानं विष्णुः पाल्यं च पाति च ।
उपसंह्रियते चोपसंहर्ता च स्वयं हरिः ॥
'स एव सृज्यः स च सर्गकर्त्ता स एव पात्यत्ति च पाल्यते च ।
ब्रह्माद्यवस्थाभिरशेषमूर्तिर्विष्णुर्वरिष्ठोवरदोवरेण्यः ॥'

Scanned by CamScanner ankurnagpal108@gmail.com

इत्यादिश्रुतिस्मृतिप्रभृतिभिः प्रमाणैर्निमित्तकारणोपादानकारणयोरेकत्वं स्पष्टमेव प्रतिपादितम् । ततश्च कथमैकस्यैव निमित्तत्वमुपादानत्वं चेति प्रश्नोऽश्म क्षिप्तलोष्टवद्विशीर्यत एवेति भावः ।

अथैवमपि यदि परमेश्वरः स्वयमेव परिणमते, तदापरिणामिनो देहगेहा-देर्विकारित्वदर्शनेन भगवतोऽपि विकारिता स्यात्, न चेष्टापत्तिः ? तदा 'निर्गुणं निरञ्जनं' 'निष्कलंनिष्क्रियं शान्तं निरवध्यं निरञ्जनम्' 'अस्थूलमनण्वह्रस्वं 'सत्यं ज्ञानमानन्दं ब्रह्म' इत्यादिश्रुतिविरोधप्रसङ्गात् । अर्थाज्जगद्रूपेण परिणमनाद् ब्रह्म णो विकारित्वानित्यत्वेस्याताम् तदा नित्यत्वविशुद्धत्वादिप्रतिपादकश्रुतिवि रोधः प्रसज्येतेति चेत् सत्यम् । ब्रह्मजगत्रूपेणपरिणमते तदानैतस्य स्वरूपेण परिणामः । अतः तत्स्वरूपेण न विकारादिदोषो भवति । किन्तु चिदचिद्रूपवि शेषणविशिष्टस्वरूपस्य जगद्रूपेण परिणामो भवतीति विशेष्यस्य भगवत्स्व रूपस्य विकाराभावेन निर्विकारत्वप्रतिपादकश्रुत्यादेर्विरोधोनैव भवति । तदाहुः श्रौतप्रमेयचन्द्रिकायां चगद्गुरुश्रीश्रियानन्दाचार्याः-'रामस्य परिणामो हि चिद चिद्द्वारको जगत्' इति । तथैव जगद्गुरुश्रीद्वारानन्दाचार्या अपि परिणामविमर्शे ब्रह्मणस्तु विकारो यन्न स्वरूप स्वभावयोः ।

व्याकोपावसरः कश्चिच्छ्रुतीनां वर्तते नतत्' 'इति च ।

अर्थात् न शुद्धस्य भगवतो जगत्प्रतिपरिणामित्वं किन्तु जडचेतनविशे षणविशिष्टस्यैवेति विशेषणांशे एव परिणामो विकारित्वं वा भवति नतु विशेष्यांशे परिणामो विकारित्वंवेति । न च यदि स्वरूपस्य विकाराभावे स्वशरीरभूतविशेषणद्वारा कार्यमात्रस्यायं परमेश्वरः कथमुपादानं भवतीति वाच्यम्, लूताकीटवदिति गृहाण । यथाल्पशक्तिकस्य लूताकीटस्यायं भावो यत् स्वरूपे विकाराभावेऽपि स्वकीयशरीररूपविशेषणद्वारेण तन्तुजालरूपकार्यं प्रति उपादानकारणं भवतीति तस्य स्वभावस्तथैव सर्वशक्तिरीश्वरोऽपि स्वविशे षणद्वारा जगत्कार्यंप्रति उपादानकारणं भवतीति स्वस्वभावः । यदा त्वत्यल्प शक्तिकस्य कीटस्यैतादृशः स्वभावस्तदा 'परास्यशक्तिर्विविधैव श्रूयते स्वाभा विकी ज्ञानबलक्रिया चेत्यादिश्रुतिप्रतिपादितसर्वशक्तिमतो भगवत एतादृशस्व भावस्वीकारे किं तव छीन्नम् ? । तदुक्तं-

Scanned by CamScanner ankurnagpal108@gmail.com

'यथोर्णमाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सभवन्ति ।
तथाऽक्षराद्विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापियन्ति' ।
ऊर्णनाभिर्यथा सृष्ट्वा स्वयं तद्ग्रसते पुनः ।
तथासृष्ट्वेदमखिलं स्वयं तद् ग्रसते हरिः' इत्यादि ।

अर्थात् यथा लूताकीटस्वशरीरद्वारा सहायकान्तनिरपेक्ष एव तन्तूनुत्पादयति तत्र शरीरद्वारेणोपादानं भवति तत्र जीवकीटशरीरं तूलाजीवस्य शरीरतयोपादानं भवति तादृशकटिश्च स्वप्रधानतया कर्तृकारणात्मकनिमित्तं भवति तत्र स्वेतरसहायकान्तरस्यापेक्षा न भवति किन्तु स्वेच्छयैतत्तन्तूनुत्पादयति स्वेच्छयैवान्तः काले स्वस्मिन्नेव संहरति-तथैव परमेश्वरः सर्गकाले सूक्ष्मचिदचित् शरीरकः स्वशरीरचिदचिदपेक्षयोपादानं भवति तथा स्वापेक्षया अर्थात् स्वस्वरूपापेक्षया निमित्तं भवति । ततश्च सूक्ष्मचिदचिद्रूपस्येश्वरशरीरस्यैव परिणामो भवति, नतु भगवत्स्वरूपस्य परिणामो जायते येन भगवति परिणममानत्वेन विकारित्वं स्यात् । परिणममानत्वं तथा परिणममानत्वाद्विकारित्वदोषो भगवति नापततीत्यर्थः । 'निष्कलं निष्क्रियं शान्तं निरवद्यं निरंजनम्' 'सत्यं ज्ञानमानन्दं ब्रह्म' इत्यादिश्रुतयो भगवत्स्वरूपस्य निर्विकारत्वं प्रतिपादयन्ति न तु भगवत् शरीररूपविशेषणभूतयोश्चिदचितोः परिणामित्वविकारित्वयोस्तत्रैव श्रुतत्वात् लुताकीटशरीरवदिति भावः ।

अथैवमपि, 'अजामेकं लोहितशुक्लकृष्णाम्' 'गौरनाद्यन्तवती' त्रिगुणं तज्जगद्योनिरनादिप्रभावाप्ययम्, 'प्रकृतिं पुरुषञ्चैव विद्ध्यनादी उभावपि' 'अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः 'ज्ञाज्ञौ द्वावजावीशानीशौ' 'अजोनित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीर' इत्यादि श्रुतिस्मृतिभ्यां परमेश्वरशरीरभूतयोः सूक्ष्मचिदचितोर्नित्यत्वस्य प्रतिपादनेन तत्परिणामद्वारा जगद्सर्गं करोति भगवान् इति कथं युज्यते अर्थात् नित्ययोः सूक्ष्मचिदचितोरीश्वरेण क्रियमाणः सर्गःकीदृशः अर्थात् नित्ययोरुत्पादनं कथमपि न भवतीति प्रश्नः ।

तत्रोच्यते नहि जडपदार्थमीश्वर उत्पादयति येन नित्यस्य कथं सर्ग इति शंकास्यात् किन्तु परमेश्वरस्य सृष्टिर्जडपदार्थस्य परिणामकरणमेव । यथा

Scanned by CamScanner ankurnagpal108@gmail.com

दुग्धावस्थायामपरिदृश्यमानमपिदधि कारणव्यापारेण दध्यात्मना परिणतं भवति दुग्धावस्थां परित्यज्य न तु तत्र दुग्धस्य विनाशो दध्नश्चोत्पादः किन्तु दध्नोऽभिव्यक्तिमात्रं भवति । तथैव प्रकृतेऽचित्पदार्थस्य परिणामकरणमेवेश्वरस्य सृष्टिरिति कथ्यते । अर्थात् सूक्ष्मतयाऽवस्थितमेवाचित्सूक्ष्मं वस्तु स्थूलरूपेणाभिव्यक्तं भवति, येन नित्यस्योत्पादविरोधः स्यात् । तथा चेतनानां शरीरेन्द्रियप्रदानज्ञानशक्तिविकाशकरणं चेश्वरस्यचेतनसृष्टिः । नहि भगवान् कमप्युत्पादयति विनाशयति वा किन्तु तिलेऽवस्थितस्य तैलस्य कारणव्यापारेणाविर्भावयति कर्ता तदा तैलमुत्पद्यते इति कथ्यते पुनश्चविनाशकाले कारणमाविशत् कार्यतिरोभूयते इति विनस्यतीति व्यवहार स्तथैव प्रकृतेऽपि आविर्भावमात्रं सर्गस्तिरोभावमात्रं प्रतिसर्ग इतिसारः ।

अर्थात् जगदुत्पत्तेः पूर्वं प्रलयकाले सृज्यमानजगत् कारणतयाऽभिमतपरमेश्वरेण जडचेतनात्मकजगतः सर्गः । तत्र सर्गो नाम 'तमः परे देवे एकीभवति' इतिकथितप्रकारेण स्वस्मादविभक्ततयास्थितस्य तमःपदप्रतिपादितस्यास्य

ततः स्वयंभूर्भगवान् अव्यक्तोव्यञ्जयन्निदम् ।
महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः ॥'

इति कथितप्रकारेण स्वकीयप्रेरणयाऽस्य जगतः स्वस्माद्विभज्य विभक्तस्य व्यक्तपदप्रतिपाद्य समष्टिव्यष्टिरूपसमस्तकार्यरूपेण परिणमनमेव जगतः सर्गो नाम न तु जगत उत्पादनम् । तथा तत्तुल्यस्यान्धेतसि मज्जमानस्य शरीरेन्द्रियरहितस्य भोगमोक्षवार्तानभिज्ञस्य जीवराशेः प्रलयस्त्रोतसि समुह्यमानस्य भोगाधिष्ठानं देवमनुष्यादिशरीरं भोगसाधनानीद्रियाणि च प्रदाय पूर्वज्ञानसंकुचिततया ज्ञानविकाशं च करोति परमेश्वरः । अयमेव जगत्सर्गोनाम प्रागनवस्थितस्य वस्तुन उत्पादः । नत्वसत उत्पादनं सतो वा विनाशः । तदुक्त-

'नासतो विद्यते भावो ना भावो विद्यते सतः' इतिगीतायां श्रीकृष्णेन

तथैवाहुराचार्या गीतार्थचन्द्रिकायम्-

'असतो देहादेर्भावः सद्भावो नैव विद्यते
सत आत्मनश्चाभावोऽसद्भावो न विद्यते ।'

नात्र तन्त्रे आरम्भवादोऽभिममो येनापूर्वस्योत्पादः क्रियेत समर्थितंश्च

Scanned by CamScanner ankurnagpal108@gmail.com

स्यात् । किन्तु वेदान्ते सर्वत्र श्रुत्यनुसारेणोपवृंहकपुरणानुसारेण च परिणामवाद स्यैवादृतत्वादितिसर्गः क्रमः ।

तदेवं नित्ययोरपि जडचेतनपदार्थयोः परमेश्वरादाविर्भावः प्रदर्शितः । तद नुतत्सृष्ट्वातदेवानुप्राविशदित्यादिश्रुत्यनुसारेण सर्जितसर्वपदार्थेषु अनुकूलतया तदन्तः प्रविश्य सर्वस्य रक्षणकरणमेवस्थितिकरणं पालनं केदारानुप्रविष्टजल वत् । यथा संरोपितकेदारीयधान्यादिषु जलसमुदायोऽनुकूलतयाकेदारान्तर्गत-सस्यानां संरक्षणं करोति पालयति तद्वद् भगवान् स्वसृष्टपदार्थेष्वन्तरनुकूलतया प्रवेशं कृत्वा सस्यादिराशीन्पालयति ।

तथैव संहारकाले समुपस्थिते यथोन्मार्गगामिनं पुत्रं शिष्यं वा बलाद्बध्वा यथाकालमवस्थापयति तथैव लौकिकविषयेष्वासक्तिविशेषं दृष्ट्वा विषयान्तरे संसक्तानीन्द्रियाणि संहृत्य संस्थापनमेव संहारोनामेति ।

जगत एतदुत्पत्तिस्थित्यादिकं त्रयमपि एकैकं चतुर्धाविभिद्यते ।

'चतुर्विभागः संसृष्टौ चतुर्धा संस्थितः स्थितौ ।
प्रलयं च करोत्यन्ते चतुर्भेदो रमापतिः' ॥ इत्युक्तेः ।

ततः सर्गकाले परमेश्वरः चतुर्दशभुवनसर्जकहिरण्यगर्भलक्षणस्तथाहि रण्यगर्भसृष्टानां नियमतः सर्गकर्तृणां दशानां दक्षादिप्रजापतीनां तथा सर्गानुकूल कालस्य तथा परस्परमुत्पादकानां सर्वप्राणिनां च सर्वजगतोऽन्तर्यामीभूत्वा सर्जकरजोगुणविशिष्टः सन् सर्जयति । तदेवं सर्गे चत्वारो विधा भवन्ति। तदुक्तं-

'एकेनांशेन ब्रह्मासौ भवत्यव्यक्तमूर्तिमान् ।
मरीचिमिश्राः पतयः प्रजानामन्यभागतः ॥'

'कालस्तृतीयस्तस्यांशः सर्वभूतानि चापरः ।
इत्थं चतुर्धा संसृष्टौ वर्तते स रजोगुणः ॥ इति ॥

तथास्तिकाले सम्प्राप्ते 'मध्ये विरंचिगिरिशः प्रथमावतार' इत्यादिप्रकारेण स श्रीसीतानाथो विष्णुप्रभृतिकाननेकावतारं कृत्वा 'सर्वेषामवताराणामवतारी रघूत्तमः' इत्यागमोक्तेः । ततो मनुपराशरव्यासादिद्वारेणानेकशस्त्रं शास्त्रञ्च कृत्वा, उन्मार्गगामिनामपि सन्मार्गं प्रदर्श्य रक्षणानुकूलस्य कालविशेषस्य सर्व स्यान्तरात्मतयाऽवस्थितः ज्ञानप्रकाशादिकारणीभूतसत्त्वगुणसमाविष्टः सर्वं पाल

Scanned by CamScanner ankurnagpal108@gmail.com

यति । तदुक्तम्-

एकांशेनास्थितो विष्णुः करोति परिपालनम् ।
मन्वादिरूपीचान्येन कालरूपोऽपरेण च ॥
सर्वभूतेषु चान्येन संस्थितः कुरुते स्थितिम् ।
सत्त्वं गुणं समाश्रित्य जगतः पुरुषोत्तमः ॥ इति ।

तथा संहारे जगतः प्रवृत्ते स संहारकर्तृषु सर्वप्रधानस्य रुद्रस्य तथाऽवान्तरसंहारकर्तृणामग्निकृतान्तकादीनां तथा संहारोपयुक्तस्य समाधेयस्य समयापरनामककालस्य तथा परस्परविनाशकानां सर्वजन्तूनां चान्तर्यामीभूत्वा तमोगुणेनातिक्रमेण सर्वान् संहरति । यत्रोक्तं-

'यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः ।
मृत्युर्यस्योपसेचनं क इत्थावेद यत्र सः ॥ इतिकाठके
आश्रित्यतमसो वृत्तिमन्तकाले तथा प्रभुः ।
रुद्रस्वरूपो भगवानेकांशेन भवत्यजः ॥
अग्न्यन्तकादिरूपेण भागेनान्येन वर्तते ।
कालः स्वरूपोभागोऽन्यः सर्वभूतानि चापरः ॥ इति ।

एवमन्यत्रापि भगवतः स्थित्यादिकारणत्वरूपमाहात्म्यं वर्णितं श्रीपराशरमहर्षिणा-

'ब्रह्मादक्षादयः कालस्तथैवाखिलजन्तवः ।
विभूतयो हरेरेता जगतः सृष्टिहेतवः ॥'
'विष्णुर्मन्वादयः कालः सर्वभूतानि च द्विज ?
स्थितेर्निमित्तभूतस्य विष्णोरेता विभूतयः ॥
रुद्रकालोऽन्तकाद्याश्च समस्ताश्चैव जन्तवः ।
चतुर्धाप्रलये ह्येता जनार्दनविभूतयः ॥ इत्यादि ।

ननु भगवान् जगतः सर्गादिकं लीलायैव करोति सहायकान्तरनिरपेक्ष एवेति एतावता प्रकरणेन परमेश्वरतत्त्वानुकूलं विचारितम् । तत्र यदीश्वरः स्वयमेव करोति तदा कथं कमपि सुखिनं करोति कमपि दुःखिनं कुर्वन् वैषम्यनैर्घृण्यदोषयुक्तो भवेत् मनुष्यादिवत् न च कारणान्तरप्रयोज्यं प्राणिनां सुखादि

Scanned by CamScanner ankurnagpal108@gmail.com

कमिति वाच्यम् परमेश्वरव्यतिरिक्तस्य तदाऽसत्त्वादिति चेन्न कर्मसापेक्षत्वात्-
विकारश्च रामो दयाब्धिस्तथात्वे दयाशून्यतां पक्षपातञ्च नैति ।
प्रकारे विकारस्तथाचित्र सृष्टौ च हेतुर्यतः प्राणिनां प्राच्यकर्म' इत्याचार्योक्तेः ।

अर्थात् निम्नोन्नतानि कर्मजालानि पूर्वभवोपार्जितानि जीवकर्माण्यपेक्ष्य विषमसृष्टिकरणेनोपर्युक्तदोषाभावात् । अथवा यथा कश्चिद्धितेच्छुरपथ्यसेवनतो निवर्तयितुं रोगिणं तिक्तौषधं पाययित्वाऽपथ्यसेवनेन निवर्तयति तथैव विभागोन्मुखं प्राणिनं दृष्ट्वा ततो निवर्तयितुं कदाचित्प्रतिकूलफलेन तं निवर्तयति शास्त्र प्रतिषिद्धकर्मभ्य इति नेश्वरे कश्चिद्दोषः । कर्मणो दुःखदत्वं न कथमपि परमेश्वरस्य तस्य निर्विकारत्वश्रवणादिति । तदत्र विशेषतो विवरणन्तु वैषम्यनैर्घृण्येन सापेक्षत्वादितिसूत्रीयानन्दभाष्ये-परमेश्वरो जीवकृतपूर्वशुभाशुभकर्मानुसारेण देवमनुष्यादिरूपां विषमां सृष्टिं तत्संहारञ्च करोति' अतस्तत्तत्कर्मैव तत्तद्वैषम्ये तत्संहारे च हेतुर्न परमेश्वरः । तथाहि दर्शयति पूर्वार्जितकर्मानुसारेणशुभामशुभाञ्च सृष्टिं दर्शयति श्रुतिः 'पुण्यः पुण्येन कर्मणा भवति पापः पापेन' (बृ. ४।४।५) (आनन्दभाष्यम् २।२।३४) इत्यादिरूपं द्रष्टव्यम् ।

अथ यो हि कर्त्ता भवति स शरीरमास्थायैव अशरीरस्यकर्तृत्वासम्भवात् । यथा तत्तच्छरीरयुक्त एव कुलालतन्तुवायादिशरीरमधिष्ठाय शरीरद्वारा तन्त्वादिकं व्यापारयन् घटादीनां कर्त्ता भवति प्रकृते ईश्वरशरीरसद्भावे प्रमाण मश्रुतत्वात्, प्रत्युत 'अस्थूलमनण्वह्रस्व' मित्यादिना पारमेश्वरशरीरस्य निराकरणे शरीरसाध्यजगत्सर्गादिकं कथङ्करोतीति चेत् ? अत्राहुः 'नदीजलसमुद्रजल वर्षाजलयुक्तां पृथिवीं सविग्रह एव सृजति' इत्यादिकथितप्रकारेण विलक्षण विग्रहयुक्त एव सर्वस्य जगतः सर्गादिकं करोति । एतावान् विशेषो यत् देवमनुष्यादीनां सकलप्राणिनां शरीरं प्राकृतत्वाद्दृश्यं लोकगम्यं च भवति, भगवतस्तु लोकोत्तरत्वान्नसर्वगम्यमपितु नित्यसूरिभिरेवदृश्यम्, 'सदापश्यन्तिसूरयः' इतिवचनात् । भगवत्स्वरूपस्य निर्वचनं स्वसयूथ्यैः कृतम् 'भगवतो विग्रहश्च स्वरूपगुणेभ्योऽत्यन्ताभिमतः स्वानुरूपोनित्य एकरूपः शुद्धसत्वात्मकश्चेतन देहवज्ज्ञानमस्य स्वरूपस्याऽच्छादनमकुर्वन्माणिक्यमयपात्रेस्थापितसुवर्णवत्स्वर्ण रूपदिव्यात्मस्वरूपस्य प्रकाशको निरवधिकतेजोरूपः सौकुमार्यादिकल्याणगुण

Scanned by CamScanner ankurnagpal108@gmail.com

गणनिधिर्योगिध्येयः सकलजगन्मोहनः समस्तभोगवैराग्यजनको नित्यमुक्तानु-भाव्यो वासनातडागवत्सकलतापहरोऽनन्तावतारमूलः सर्वरक्षकः सर्वाश्रयः सर्वशेषीसर्वास्त्रसर्वभूषणवस्त्रपरिवृतो भगवद्विग्रह इति' ।

तदेदं विलक्षणविग्रहविशिष्टं भगवतः सर्वशेषिणः स्वरूपम् परव्यूहविभवान्तर्याम्यर्चावतारभेदात्पञ्चप्रकारं भवति । विष्वक्सेनसंहितायामुक्तं स्वयमेव भगवता तथाहि-

'मम प्रकाराः पञ्चेति प्राहुर्वेदान्तपारगाः ।
परोव्यूहश्च विभवो नियन्ता सर्वदेहिनाम्'

'नियन्तृपदेनान्तर्यामिणो ग्रहणं भवति, तथा-

'अर्चावतारश्च तथा दयालुः पुरुषा कृतिः ।
इत्येवं पञ्चधा प्राहुर्मां रहस्यविदो जनाः ॥ इति ।

तदुक्तं श्रीबोधायनमतादर्शे जगद्गुरुश्रीपूर्णानन्दाचार्येण-

'परव्यूहादिभेदेन विज्ञेयः स च पञ्चधा ।
बहुभिर्द्वारपालैश्च कोट्टपालैश्च संयुतः ॥ ३२२॥

महामणिसमाकीर्णे मण्डपे च विराजितः ।
शोभया परया युक्तः किरीटमुकुटादिभिः ॥३२३॥

महाराज्ञा च जानक्या भूनीलाभ्यां च सेवितः ।
सङ्कर्षणश्च प्रद्युम्नोऽनिरुद्ध इति भेदतः ॥३२४॥

विज्ञेयश्च तथा व्यूहो जगत्सृष्ट्यादिकारकः ।
पूर्णोज्ञानबलाभ्यां च 'सङ्कर्षणः, इति स्मृतः ॥३२५॥

वीर्यैश्वर्ययुतस्तत्र 'प्रद्युम्न' इति कथ्यते ।
शक्तितेजोविशिष्टस्तु 'ह्यनिरुद्ध' इतीरितः ॥३२६॥

तत्तत्साजात्यरूपेण ह्याविर्भावः परस्य वै ।
'विभवः' स च विज्ञेयो मुख्यो गौणश्च स द्विधा ॥

उपास्यः पुरुषैर्मुख्यो न च गौणः कदाचन ।

Scanned by CamScanner
ankurnagpal108@gmail.com

सर्वत्र सर्वदा यस्तु जीवांस्त्यक्तुं न च क्षमः ॥३२८॥

'अन्तर्यामि' सविज्ञेयो जीवदोषैरदूषितः ।

देशकालादिनियमै रहितः स महाप्रभुः ॥३२९॥

धातुपाषाणकाष्ठादिकृतविग्रहमाश्रितः ।

श्रीरामः स परं ब्रह्म जानक्या सहितः प्रभुः ॥३३०॥

'अर्चावतारो' विज्ञेयः कृपाशीलो गुणाम्बुधिः ।

एवं पञ्चप्रकारेण ह्येकोऽपि स महाप्रभुः ॥३३१॥

विभक्तो भगवान् रामः सर्वलोकैकरक्षकः ।

सेवितः परया भक्त्या सन्तुष्टः स हरिस्तदा ॥३३२॥

स्वाश्रितेभ्यश्च दासेभ्यः सायुज्यं सम्प्रयच्छति ।

श्रीवाल्मीकिसंहितायामेवं रामोहि पञ्चधा ॥३३३॥ इति ।

एतत्पञ्चप्रकारेषु परत्वं नाम, 'न कालस्तत्र वै प्रभुः' 'कलामुहूर्तादिमयश्च कालो न यद्विभूतेः परिणामहेतुः' इत्यादिवचनप्रतिपादितकालपरिच्छेदरहित निरवधिकानन्दयुक्तश्रीसाकेताख्ये वैकुण्ठलोके 'यत्र पूर्वे साध्याः सन्तिदेवाः' 'यत्रर्षयः प्रथमजा ये पुराणाः' इत्यादिवचनप्रतिपादितप्रकारेण नित्यासंकुचित-ज्ञानानां श्रीहनुमदादीनाम्-

'सूर्यकोटिप्रतीकाशाः पूर्णेन्दुयुतसंनिभाः ।

'यस्मिन् पदेविराजन्ते मुक्ताः संसारबन्धनैः ॥

'इत्यादिवचनप्रमाणेन संसाररहितानां संकोचविरहितविज्ञानवतां मुक्तानां च ज्ञानविषयतयाऽवस्थानम् । तदुक्तम्-

'वैकुण्ठे तु परेलोके नित्यत्वेन व्यवस्थिताः ।

पश्यन्ति च सदादेवं नेत्रैर्ज्ञानेन चामराः ॥ इति ।

तदाहुर्जगद्गुरवः श्रीअनुभवानन्दाचार्याः-तत्र परोनामनित्यधाम्नि श्रीसा केते जगज्जनन्या श्रीसीताम्बया सहदिव्यसिंहासनोपरि विराजमानो दिव्यायुधा लङ्कारविशिष्टविग्रहशाली नित्यं नित्यमुक्तपरिसेवमानः सर्वावतारीपरिपूर्णब्रह्म

Scanned by CamScanner ankurnagpal108@gmail.com

भगवान् श्रीरामः ।' (श्रौतार्थसंग्रहः)

द्वितीयो व्यूहोनामसंसारस्योत्पत्तिस्थितिविनाशाय संसारिणांपरिपालनाय भक्तानुग्रहाय च संकर्षणप्रद्युम्नानिरुद्धरूपेणावस्थानम् । तदुक्तम्-

'चतुर्विधः सभगवान् मुमुक्षुणां हिताय वै ।
अन्येषामपिलोकाय सृष्टिस्थित्यन्तसिद्धये ॥
आनन्त्यात्तवसेनाने व्यूह आद्योमयेरितः ।
अनादिकर्मवश्यानां संसारेयततामधः ॥'

इत्यादिशास्त्रे प्रपञ्चितं तत्रैवाधिकं द्रष्टव्यम् ।

तत्र सङ्कर्षणो हि ज्ञानबलयुक्तोऽधिष्ठितजीवस्तत्त्वः जीवं प्रकृतेः पृथक् कृत्य प्रद्युम्नावस्थां प्राप्य शास्त्रं प्रवर्तयति करोति च संसारस्य संहारम् । तत्रोक्तं 'तत्रज्ञानबलद्वन्द्वाद्रूपं सङ्कर्षणं हरेरिति । भगवानच्युतोपीत्थं षड्गुणेन समेधितः । बलज्ञानगुणौ तस्य स्फुटौ कार्यवशान्मुने' ॥ अथ प्रद्युम्नस्तु ऐश्वर्यवीर्येणयुक्तो मनसोऽधिष्ठापकः धर्मोपदेशकः मनुचतुष्टयप्रभृतिकशुद्धवर्गसर्जकश्चेति । तदुक्तं-'ऐश्वर्यवीर्यसंभेदाद्रूपं प्रद्युम्नमुच्यते' इति । तथा-'पूर्णषड्गुणएवायमच्युतोऽपि महामुने । गुणावैश्वर्यवीर्याख्यौ स्फुटौ तस्य विशेषः ॥' इति ।

अनिरुद्धस्तु सर्वदाशक्तितेजोभ्यां समन्तितो लोकरक्षायास्तत्वज्ञानप्रदानस्य कालसृष्टेः मिश्रितसर्गस्य च जनको भवतीति । तदुक्तं-'शक्तितेजः समुत्कर्षादनिरुद्धतनुर्हरिः' इति । तथा-'पुरुषोपि महाध्यक्षः पूर्णषाड्गुण्य उच्यते । शक्ति तेजो गुणौ तस्य स्फुटौ कार्यवशान्मुने ॥' तथा-'शक्त्याजगदिदं सर्वमनन्ताण्डं निरन्तरम् । विभर्ति घाति च हरिर्मणिसानुरिवाण्डकम् ॥'

'तेजसा निखिलं तत्वं ज्ञापयदात्मनो हरिः' इत्यादिवचनेन समस्तस्यापि स्थावरजङ्गमसंसारस्य परिपालनतयोज्जीवनकारणतत्वप्रदानमपि करोत्यनिरुद्धः । एवं 'त्रुट्यादिद्विपरार्द्धान्तं कालसर्गमथाकरोदिति वचनेन लवादिकालादारभ्य द्विपरार्द्धकालपर्यन्तकालस्य सर्गमपि करोति भगवाननिरुद्धः ।

तत्र विभवो द्विप्रकारको भवति गौणोमुख्यश्चेति । तदुक्तं-'विभवोपि

Scanned by CamScanner ankurnagpal108@gmail.com

तथाऽनन्तो द्विधैव परिकीर्त्यते । गौणमुख्यविभागेन शास्त्रेषु च हरेर्मुने ? प्रादुर्भावो द्विधा प्रोक्तो गौणमुख्यविभेदतः ।' इत्यादिस्थले कथितप्रकारेणा नन्तो विभवोऽसंख्येय एव । संक्षेपतो गौणमुख्यभेदेन द्विप्रकारकः प्रातिस्विक रूपेणानन्तः । तत्र विभवत्वं नाम स्वेतरसजातीयतयाऽविर्भावः । स च गौण मुख्यभेदेन द्विप्रकारक एव तत्र गौण आवेशावतारः मुख्यः साक्षादवतारः । पुन रपि आवेशावतारो द्विप्रकारकः स्वरूपावेशः शक्त्यावेशश्चेति । तत्र स्वरूपा वेशः स्वकीयरूपेण सहैवावेशः यथा परशुरामादीनां सचेतनानां देहेषु स्वकीय विग्रहेणैवावेशः शक्त्यावेशस्तु कार्यकरणकाले ब्रह्माशिवादिचेतनशरीरमध्ये शक्तिमात्रेण स्फुरणमिति ।

अत्र गौणविभवस्य मुख्यविभवस्य च समत्वं विषमत्वं भवति, मनुष्य त्वादिवत् गौणत्वमपि तदीयेच्छयैव भवति न तु स्वरूपेण तदुक्तं-

'मदीच्छया हि गौणत्वं मनुष्यत्वमिवेच्छया ।
शूकरत्वं च मत्स्यत्वं नारसिंहत्वमेव च ॥'

'यथा वा दण्डकारण्ये कुब्जाम्रत्वं ममेच्छया ।
यथा वाजिमुखत्वञ्च मम सङ्कल्पतोऽभवत् ।
सेनापते ममेच्छातो गौणत्वं न च कर्मणा ।'

इत्यादिवचनानुसारेण मनुष्यत्वं यथा श्रीवामनकृष्णादिषु मत्स्यावतारादौ तिर्यक्त्वं वृक्षादौ स्थावरत्वम् । एतत्सर्वं यथेश्वरेच्छया जातम् । तथा आवेशरूपं गौणत्वं ममेच्छयैव जातम् । इत्यादिकं बहुतरं सिद्धान्तमन्विष्यैव ज्ञातव्यम् ।

मुख्यप्रादुर्भावस्तु अप्राकृतविग्रहोऽपरित्यक्तस्वभावविभवः प्रदीपात्प्रदी पान्तरवदभिव्यज्यवर्तमानोऽप्राकृतशरीरः । यथोक्तम्-

'प्रादुर्भावास्तुमुख्या ये मदंशत्वाद्विशेषतः ।
अजहत्स्वभावा विभवा दिव्या प्राकृतविग्रहाः ॥
पाद्दीपा इवोत्पन्ना जगतो रक्षणाय ते ।
अर्च्या एव हि सेनेश संसृत्युत्तरणाय ते ॥'

Scanned by CamScanner ankurnagpal108@gmail.com

'मुख्या उपास्या सेनेश ? अनर्च्यानितरान् विदुः ॥'

इत्यादिना मुख्यावदस्यैव मुमुक्षूपास्यत्वं शास्त्रे प्रतिपादितम् । गौणप्रादुर्भावास्तु ब्रह्माशिवाग्निव्यासप्रभृतिकाः सन्ति ते सर्वेऽहङ्कारयुक्तजीवाधिष्ठातृत्वान् मुमुक्षुभिरनुपास्या एवेति यदुक्तम्-

अनर्च्यानपिवक्ष्यामि प्रादुर्भावान् यथा क्रमम् ।

चतुर्मुखस्तु भगवान् सृष्टिकार्ये नियोजितः ॥' इत्यारभ्य-

अनर्च्याः सर्व एवैते विरुद्धत्वान्महामते ।

अहंकृतियुताश्चे मे जीवा मिश्रा व्यधिष्ठिताः ॥'

इत्यन्तप्रकरणेन ब्रह्मादीनामनर्च्यत्वं कथितम् । एवं गुणस्वरूपाभ्यां संक्षेपत ईश्वरनिरूपणं कृतम् तदवतारोपिदर्शितः, भगवतोस्त्रविवेचनन्तु जगद्गुरुश्रीरामभद्राचार्यप्रणीतश्रीरामबाणस्तवश्रीरामचापस्तवप्रभृतितः एवं वस्त्रादिनिरूपणञ्च साम्प्रदायिकान्यग्रन्थेभ्यो ज्ञातव्यम् ।

तत्र यथा लोकमनुष्यादिनां जन्मकर्मनिमित्तकं भवति तथा भगवतो न कर्ममूलकोऽपितु भगवदिच्छैव नान्यदिति । अर्थात्-'अजायमानो बहुधाविजायते' बहुनि मे व्यतीतानि जन्मानि तवाचार्युन' इत्यादिना प्रतिपादितावताराणां भगवदिच्छैय 'इच्छागृहीताभिमतोरूदेहः' इत्यादिवचनप्रामाण्यात् । तथा अवतारप्रयोजनञ्च स्वाश्रितपरित्राणादिकमेव । तथोक्तं-

'परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।

धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥' इति ।

तदेवमतिसंक्षेपतस्तत्त्वत्रयान्तर्गततत्त्वशेखरेश्वरतत्त्वस्य निर्वचनमितिदिक् ॥९॥

卐 इति प्रभाटीकायामीश्वरनिरूपणम् 卐

❋ प्रथमपरिच्छेदश्चसमाप्तः ❋

ψ श्रीरामः शरणं मम ψ

સમરીતિર્મહાતેજાઃ પરબ્રહ્મ સનાતનઃ ।
કાયતાઽજા નવી નાથો વેદવેદ્યો મહામતિઃ ॥
Ankur Nagpal

Scanned by CamScanner
ankurnagpal108@gmail.com

पूर्वोक्त षष्ठ तथा सप्तम श्लोकरूप दो श्लोकों से तत्त्वत्रय के अन्तर्गत चित् स्थूल-सूक्ष्म साधारण चेतनवर्ग अर्थात् बद्ध-मुक्त तथा नित्य सूरि साधारण जीववर्ग का तथा अचित् जड़तत्त्व प्रकृति महदहङ्कारादिक स्थूलसूक्ष्म का यथावत् प्रतिपादन करके श्रुतिस्मृति पुराण तथा इतिहास से प्रतिपाद्य सारभूत त्रिरूपात्मक अर्थात् चिदचिद्विशिष्ट तत्त्वशेखर सर्वान्तर्यामी सर्वज्ञ सर्वजगत् कारण सर्वशेषी भगवान् श्रीसीतापति के स्वरूप तथा गुण के निर्वचन द्वारा निर्वचन करने के लिये चिदचिद्विशिष्ट परमेश्वर मुक्त प्राप्य तथा नित्यसूरियों से सर्वदा दर्शन के योग्य परतत्त्व का उपदेश करने लिए उपक्रम करते हैं-'**विश्वं जातं यतोऽद्धा**' इत्यादि अष्टम तथा नवम श्लोकों से।

स्थूल सूक्ष्म जङ्गमात्मक सकल जायमान विश्व सर्वशक्तिमान् सर्वज्ञ सर्वान्तर्यामी महापुरुष श्रीरामजी से सर्ग के आदिकाल में उत्पन्न होता है। अर्थात् सर्गादि काल में जिससे आविर्भूत होता है। जिस तरह तिलों से तेल का आविर्भाव होता है। और उत्पन्न होने के वाद जिस परतत्व में अवस्थित रहता है। अर्थात् स्थिति मध्य काल में जिससे पालित-पोषित होता हुआ सर्वदा रक्षित रहता है।

एवं आविर्भूत तथा रक्षित जगत् संहारकाल में जिस परमतत्त्व में प्रलीयमान हो जाता है। एतादृश जगत् का अभिन्न निमित्तोपादान कारण जो है वही परमतत्त्व भगवान् का लक्षण है। और जिस परमात्मा के प्रकाश से प्रकाशित होकर के दिन मणि सूर्य, चन्द्रमा, ग्रह, नक्षत्र तथा अग्निदेव, इस जगत् को प्रकाशित करते रहते हैं। तथा जिसके भय से भयभीत होकर के अत्यन्त वेगवान् वायुदेव दिनरात चलते ही रहते हैं। कभी भी अपने कार्य में आलस्य नहीं करते हैं। तथा जिससे विधारित रहने के कारण पृथिवी स्थान को छोड़ करके रसातल में प्रविष्ट नहीं हो जाती है।

और जो परमेश्वर सदा सर्वत्र पर्वत के समान अचल होकर के स्थिर है। अत एव समस्त स्थावरजङ्गमात्मक जगत् का साक्षी अर्थात् द्रष्टा है। और चित् अचित् तथा चिदचिद्विशिष्ट-इन तीनों तत्त्वों में प्रधान है तथा सर्वज्ञत्व शरणागत वत्सलता प्रभृति अनन्त कल्याण गुणों से सर्वदा युक्त रहते हैं। तथा जो जन्ममरणादि विकारों से रहित होकर के सम्पूर्ण जगत् का भरणपोषण कर्त्ता हैं। और जनकजा रूपलक्ष्मी से सम्बद्ध हैं। तथा जगदुत्पादक तथा जगत् संहारक ब्रह्मा रुद्र प्रभृतिक देवों से आराधित रहते हैं। और शरण में आये हुए व्यक्तियों का भेदभाव के विना

Scanned by CamScanner ankurnagpal108@gmail.com

रक्षण करने में सदा तत्पर रहते हैं। और जिस करुणानिधान के चरणकमल का परम प्रेमारूप भक्तिवाले पुरुष विशेष ही प्राप्त करते हैं। अर्थात् भगवत्प्राप्ति का साधन केवल शुष्क ज्ञान नहीं है न वा केवल कर्म है। किन्तु ज्ञानकर्म समुचित भक्ति योग सहकृत प्रपत्तिमात्र है। इस बात को अभिव्यक्त किया गया। और भगवान् क्लेशकर्म विपाक और आशयों से अपरामृष्ट हैं। अत एव महानुभाव भगवान् के यश को श्रीवाल्मीकि प्रभृति महामुनियों के द्वारा लोक में उदीरित है।

और जो ज्ञानी श्रेष्ठ नित्यसूरि श्रीहनुमान् प्रभृतिक महाज्ञानियों के ध्यान का केन्द्र हैं। अर्थात् ध्यान का विषय होते हैं। योगियों से ध्येय हैं। तथा जो भगवान् अजन्मा जन्मरूपभाव विकार से सर्वथा रहित हैं। दशरथादिकों के कुलों में प्राकृत मनुष्य के समान आद्य क्षण सम्बन्ध जन्म नहीं हुआ है किन्तु भक्तानुग्रह के लिए आविर्भाव मात्र हुआ है। अत एव भक्त प्रवर श्रीतुलसीदासजी ने कहा है-'रोदन तब ठाना' इत्यादि। और जिसका जन्म होता है उसका मरण अवश्यंभावी है।

'मृत्युर्जन्मवतां वीर देहेन सह जायते।

अद्यवाद्वशतान्ते वा मृत्युर्वै प्राणिनां ध्रुवः'

इस प्रमाण से सिद्ध होता है कि जन्मशील का मरण अवश्यंभावी है। तथा-**'जातस्य हि ध्रुवो मृत्युः'** यह भी प्रमाण है कि जन्मवान् का मरण होता ही है। परन्तु महर्षि श्रीवाल्मीकिजी ने श्रीमद्रामायण में कहा है कि **'विवेश वैष्णवं तेजः सशरीरः सहानुजः'** अपने छोटे भाइयों तथा शरीर के साथ-साथ वैष्णव तेज स्वदिव्यधाम श्रीसाकेत में प्रवेश कर गये। इस प्रमाण से सिद्ध होता है कि परमेश्वर का मरण नहीं होता है। तब मरण व्याप्त जन्म भी भगवान् का नहीं होता है किन्तु स्वेच्छा से भगवान् का प्रादुर्भाव मात्र होता है। अर्थात् भगवान् का अभिव्यक्त होना ही जन्म कहलाता है।

अत एव मरण रहित होने से जन्म रहित भी है। एतावता भगवान् में जन्म-मरण एतदुभयराहित्य सूचित किया गया। अर्थात् न तो भगवान् प्राकृत पुरुष की तरह अदृष्टादिरूप कारणों से उत्पन्न होते हैं। न वा प्रकृत पदार्थों की तरह आयु समाप्त होने पर अथवा प्रलयकाल में विनष्ट होते हैं। क्योंकि भगवान् कर्माधीन नहीं है यानी उनका शरीर कर्माधीन नहीं है न वा प्राकृत है। किन्तु अप्राकृतिक लोकोत्तर

Scanned by CamScanner ankurnagpal108@gmail.com

निर्मल ज्ञानानन्द स्वभावक हैं। भगवान् का वह तादृश शरीर देशकाल तथा वस्तु परिच्छेद रहित होने से उत्पादविनाशशील नहीं है अपितु नित्य है। इसलिए भगवान् का जन्म तथा मरण नहीं होता है। वह सर्वदा अविनाशी अजन्मा हैं।

तथा जिस परमेश्वर श्रीसीतानाथजी के माहात्म्य महत्त्व का समस्त वेदराशि अर्थात् अङ्गोपाङ्ग पुराणादि सहित वेद समुदाय अनुक्षणगान करते आये हैं। तथा अभी भी गान करते हैं और यावत् काल की सत्ता है। तब तक भविष्य काल में भी गान करते रहेंगे। तथा जिस परमेश्वर जगत्कारण के अनन्त समाभ्यधिक विवर्जित ज्ञानादिक स्वाभाविक शक्ति तथा ज्ञानबलवीर्य स्वाभाविक हैं।

तथा जो भगवान् जरा वृद्धावस्था तथा पाप कर्म कुत्सित शास्त्र प्रतिषिद्ध कर्मों से रहित हैं। सर्वथा विवर्जित हैं। ब्रह्मादिक देव देवों के भी मन तथा वाणी का अविषय हैं। क्योंकि **'यतो वाचो निवर्तन्तेऽप्राप्य मनसा सह'** इत्यादिश्रुति समुदाय कहती है कि परमेश्वर मन वाणी के व्यापार का विषय नहीं होता है। इससे सिद्ध होता है कि परमेश्वर वाङ् मनसातीत है। ऐसा जो पुरुष विशेष है जो कि सकल वसुधाधिप होने पर भी अयोध्याधिपति हैं, वे भगवान् श्रीसीतारामजी सकल जगत् का कारण सर्व नियामक सर्वशेषी परमेश्वर हैं। इसप्रकार से भगवान् श्रीरामानन्दाचार्यजी ने श्रीसुरसुरानन्दाचार्यजी को परमतत्त्वज्ञेय ध्येय तथा प्राप्य के स्वरूप का निर्वचन करके समझाया। ऐसा इन दोनों श्लोकों का अन्वयार्थ हुआ।

इसके पूर्व में तत्त्वत्रयान्तर्गत चित् तथा अचेतन जीव प्रकृति रूप दो तत्त्वों का निरूपण किया गया है। इसके वाद जड़चेतन का धारक सर्वनियामक सर्वशेषी सर्वज्ञत्व सर्वशक्तित्वादिक सकल कल्याण गुणों का आकर समाभ्यधिक विवर्जित सकल शास्त्र विहित कर्म के द्वारा आराध्य सकल कर्मफल प्रदाता योगि गम्य तथा ज्ञेय मुक्त प्राप्य समस्त वेदान्तगम्य पुरुषोत्तम मर्यादा सागर तत्त्वत्रयों में तत्त्वशेखर ईश्वरतत्त्व भगवान् श्रीसीतापति रूप परमेश्वर का निरूपण करने के लिए उपक्रम करते हैं-**'विश्वं जातं यतोऽद्धा'** इत्यादि श्लोकद्वय से।

जिस सर्वशक्ति सर्वज्ञ सर्वान्तर्यामी सर्वशेषी भगवान् श्रीसीतारामजी से यह परिदृश्यमान स्थूल जड़चेतन जगत् प्रलयावसान काल में अर्थात् सर्गकाल में उत्पन्न होता है। तथा स्थिति काल में भगवान् से पालित होता है तथा अवसान में अर्थात्

Scanned by CamScanner ankurnagpal108@gmail.com

प्रलयकाल में जिस परमात्मा में लीन हो जाता है, वे परमेश्वर भगवान् श्रीरामचन्द्रजी हैं। इस श्लोक के प्रथम चरण से आचार्यश्री ने ईश्वर में जगत्कारणता का प्रदर्शन कराया है। कारण दो प्रकार का होता है निमित्तकारण तथा उपादानकारण उसमें से चैतन्य मूलक निमित्तकारण अर्थात् कर्तृत्व ईश्वर में बतलाया तथा सर्वशरीरक भगवान् में, उत्पत्ति स्थिति प्रलय भगवान् से होता है यह कह करके उपादान कारणत्व का सूचन किया है। क्योंकि घटादि कार्यों का उत्पाद स्थिति और विनाश ये तीनों उपादानकारण मृत्तिका में ही होता है। केवल पदार्थों का उत्पादन तो कर्त्ता कारण तथा सहकारी कारण से भी होता है। जैसे घटादि का उत्पादन कुलाल तथा दण्डादि सहकारी से भी होता है। परन्तु उत्पादविनाश तो उपादानकारण से ही होता है। ऐसा ही लोक में देखा जाता है। नतु मृत्तिका से घट का उत्पाद हो, मृदतिरिक्त में घट का अवस्थान हो तथा मृदतिरिक्त जलादिक में प्रलीयमान होता हो। किन्तु मृत्तिका ही में उत्पादादिक सब होता है। इसलिए उत्पाद स्थित्यादिक मृत्तिका ही में होने से मृत्तिका घट का उपादान सिद्ध होता है। इसी तरह जगत् का उत्पाद स्थिति विनाश जिससे होता है वही परमेश्वर है। ऐसा कहकर जगदाचार्यजी ने बतलाया कि भगवान् से जगत् का उत्पाद स्थिति एवं विनाश है।

इस विषय का समर्थन श्रुति भी करती है-'**सदेव सोम्येदमग्रे आसीदेकमेवा द्वितीयं ब्रह्म**' '**आत्मा वा इदमेकमग्रे आसीन्नान्यत् किञ्चनमिषत्**' यह परिदृश्य मान जगत् उत्पत्ति के पूर्व एक अद्वितीय सजातीय विजातीय रहित ब्रह्मरूप ही था। उत्पत्ति के पूर्व में समाभ्यधिक विवर्जित आत्मा मात्र था। तदतिरिक्त अर्थात् भगवत् शरीर व्यतिरिक्त क्रियाशील कोई भी पदार्थ नहीं था। इत्यादि श्रुतियों से सर्गपूर्व में सत् आत्मादि पदों के द्वारा सदाद्यात्मक ईश्वर सत्ता का प्रतिपादन करके पुनः श्रुति कहती है-'**यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभि संविशन्ति तद्विजिज्ञासस्वतद्ब्रह्म**' जिस सर्वशक्ति समन्वित सदात्मक सर्वशेषी परमेश्वर रूप कारण से प्रलयावस्था में प्रसुप्त के समान यह परिदृश्यमान जगत् जायमान होता है। अर्थात् रात्रि में नीड़ निविष्ट पक्षीगण जिस तरह रात्रि के व्यतीत हो जाने पर प्रभात समय में नीडों से अभिव्यक्त होते हैं। यथा वा तिलों से जिस तरह तेल कारक व्यापार से अभिव्यक्त होता है। उसी तरह यह जगत् जिससे

Scanned by CamScanner
ankurnagpal108@gmail.com

सर्गावस्था में क्रमिक अभिव्यक्त होता है तथा अभिव्यक्त होकर के स्थिति अवस्था में जिससे पालित पोषित होता है, एवं संहारावस्था में जिसमें विनष्ट हो जाता है अर्थात् तिरोहित हो जाता है, यह जगत् वही ब्रह्म स्वरूप है। तादृश जगत् कारणीभूत ईश्वर की जिज्ञासा करो। इन उपर्युक्त श्रुतियों से सिद्ध होता है। इस विषय का स्मृत्यादिक ग्रन्थों से भी स्पष्टीकरण होता है। तथाहि-

'यतः सर्वाणि भूतानि भवन्त्यादि युगागमे।
यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये ॥'

'यतः सर्वाणि भूतानि प्रभवन्त्यहरागमे
रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके' इति।

अर्थात् आदि युग सर्ग के आदिकाल में जिस सर्वशक्ति समन्वित परमात्मा से ये सब भूत अर्थात् जड़चेतन साधारण सकल स्थूल पदार्थ आविर्भूत होते हैं। इन सब पदार्थों का आविर्भाव होता है। तथा पुनः कल्प के विरामकाल में जिस परमात्मतत्व में प्रलय-तिरोभाव को प्राप्त कर जाते हैं वह ईश्वर है। दिन के प्रारम्भ काल में सभी भूत जिस परमेश्वर से अभिव्यक्त होते हैं। रात्र्यागम-कल्पक्षयकाल में जिसमें तिरोभूत हो जाते हैं, वह परमेश्वर है। इन स्मृतियों से सिद्ध होता है कि भूतों का उत्पाद विनाश तथा पालन परमात्मा से हो जाता है। इस बात को प्रथम चरण से बतलाया है।

'सूर्योयत्तेजसेन्दुः सकलमविरतभासयत्येतदेषः'

सूर्य तथा चन्द्रमा ग्रहनक्षत्रादिक तैजस पदार्थ जिस भगवान् के प्रकाश से प्रकाशित होकर के इस जगत् को प्रकाशित करते हैं अर्थात् सूर्यादिक देव भगवान् के प्रकाश से स्वयं प्रकाशित होकर के तब अपने-अपने प्रकाशों से सूर्यादिक देवों चराचर सकल जगत् को प्रकाशित करते हैं। न तु सूर्यादिको में पर प्रकाशकत्व सामर्थ्य स्वाभाविक है किन्तु परोपाधिक है। वह श्रीराम तत्त्व ही ईश्वर है।

परमेश्वर से प्रकाशित होकर के सूर्यादिक जगत् को प्रकाशित करते हैं इस विषय का पुष्टीकरण श्रुती करती है-**'न तत्र सूर्यो भाति न चन्द्र तारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः। तमेव भान्तमनुभातिसर्वं तस्य भासा जगदिदं विभाति।'** इति।

Scanned by CamScanner
ankurnagpal108@gmail.com

अर्थात् तत्र उस परमात्मा में सूर्य प्रकाशित नहीं होते हैं। अर्थात् सूर्य के प्रकाश से परमात्मा प्रकाशित नहीं होते हैं। तथा चन्द्रमा और तारागण भी अपने-अपने प्रकाश से परमात्मा को प्रकाशित नहीं कर सकते हैं। तथा विद्युत के प्रकाश से भी परमात्मा का प्रकाश नहीं होता है। ये जो भौम काष्ठादिकगत अग्नि है इसकी तो गणना ही क्या है। किन्तु उस परमात्मा के प्रकाशित होने पर ही सभी पदार्थ सूर्यादिक अनुभासित होते हैं। परमात्मा के प्रकाश से ही सारी दुनिया प्रकाशित होती है। अर्थात् प्रकाशरूप धर्म परमात्मा में ही है। तदितर सूर्यादिक में जो देखने में आता है वह परमात्मा की कृपा से ही प्राप्त हुआ है। इसलिए सूर्यादिक के प्रकाश से परमात्मा प्रकाशित नहीं होते हैं। किन्तु परमात्मा के प्रकाश से सब प्रकाशित होते हैं। इसलिए आचार्यश्री ने कहा कि-'**सूर्योयत्तेजसेन्दुः**' इत्यादि।

इसीप्रकार स्मृति भी कहती है कि परमात्मा के प्रकाश का आश्रय लेकर ही सूर्यादिक प्रकाशक कहलाते हैं। तथाहि-

'यदादित्यगतं तेजो जगद्भासयतेऽखिलम्।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धिमामकम्॥'

आदित्य सूर्य में रहने वाला ` प्रकाश सकल जगत् को प्रकाशित करती है। तथा चन्द्रमा में, विद्युत में और अग्नि में रहनेवाला जो प्रकाश समस्त जगत् स्थित पदार्थ को प्रकाशित करता है हे अर्जुन! वह विलक्षण प्रकाश मेरा ही है अर्थात् वह प्रकाश परमात्मा का प्रकाश है। पर आदित्य चन्द्रमा प्रभृति का नहीं है। एतादृश गुणगण विशिष्ट जो है वह परमात्मा है। यही ब्रह्म का लक्षण है।

इतना ही नहीं कि भगवान् श्रीरामचन्द्रजी जगत् का कारण है तथा सर्व प्रकाशक है किन्तु स्वस्व अधिकारों में परमात्मा से नियुक्त जो वायु इन्द्रादिक आधिकारिक पुरुष हैं वे सब जिसके भय से भयभीत होकर के अपने अपने अधिकार कार्य में सर्वदा संलग्न रहते हैं इस बात को जगदाचार्यजी कहते हैं-'**यद्भीत्यावाति वातः**' इत्यादि। जिस परमात्मा के भय से स्वकीय अधिकार में नियुक्त वायुदेव जो कि जगत् के आयुरूप है ऐसा कहा है। इस रीति से सम्पूर्ण जगत् के प्राण रूप परम पुरुष वायुदेव देवमनुष्यतिर्यक् प्रभृतिक प्राणी समूह में श्वासोच्छास रूप से संचरित होते रहते हैं। यह वायु दो प्रकार का होता है-बाह्य तथा आभ्यन्तर।

Scanned by CamScanner ankurnagpal108@gmail.com

इसमें शरीराभ्यन्तर संचरणशील वायु को प्राण कहते हैं। तथा बाहर में संचरणशील वायु प्रकम्पन महावात प्रभृतिक नाम से प्रथित होता है। इसप्रकार के ये वायु जिसके भय से अतन्द्रित होकर के अपना कार्य करते हैं। श्रुति भी कहती है-

'भयादस्याग्निस्तपति भयात्पतिसूर्यः,

भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः'

अर्थात् सकल जगत् का जो नियामक है परमेश्वर ब्रह्माख्य श्रीरामजी उनके भय से अग्निदेव स्वकीय तपन क्रिया में संलग्न रहते हैं। तथा उस परमेश्वर के भय से भयभीत होकर के सूर्य तपन प्रकाशन कार्य को करते रहते हैं। तथा उस परमेश्वर के भय से ही इन्द्र वर्षणाधिपति वर्षण कार्य को तथा वायु स्वकीय कार्य में संलग्न रहते हैं। और क्या ! यह जो मृत्यु यमराज है जो कि प्रजामात्र का संहार कारक है वह भी जिसके भय से भयभीत होकर के स्वकीय अधिकार प्राप्त संहार कार्य में सर्वदैव संलग्न रहता है उस कार्य में थोड़ा भी आलस्य नहीं करता है।

इस श्रुति प्रतिपादित अर्थ को बतलाते हुए कहा-**'यद्भीत्यावातिवातः'** इति। **'अवनिरपि सुतलं यातिनैवेति'** जिस परमात्मा के भय से डर करके पृथिवी सर्व जड़चेतन का आधार रूपास्थिरा पृथिवी सुतल-रसातल में प्रवेश नहीं करती है। अथवा जिस परमेश्वर से अधिष्ठित-धारित होने के कारण पृथिवी स्वस्थान से विचलित होकर के रसातल में प्रवेश नहीं करती है।

'एतस्याक्षरस्य प्रशासने द्यावा पृथिवी विधृते तिष्ठतः'

अर्थात् इस अक्षर महापुरुष के प्रशासन में व्यवस्थित द्यु पृथिव्यादिक यथा स्थान में आधारित रहते हैं। स्वस्थान से कभी भी विचलित होते नहीं है। इससे ईश्वर में सर्वधारकत्व का कथन किया गया है।

एतादृश गुणविशिष्ट परमेश्वर पुनः किसप्रकार के हैं ! इस प्रश्न के उत्तर में कहते हैं। **'ज्ञः'** एतादृश परमेश्वर पुनः 'ज्ञ' रूप है अर्थात् त्रिकाल स्थित सभी जड़चेतन पदार्थ को जाननेवाला जो ज्ञान स्वप्रकाश है तादृश ज्ञान स्वरूप तथा तादृश ज्ञान का अधिकरण है। इसलिए ज्ञाता सर्वज्ञ सर्ववित् है। श्रुति कहती है-**'यः सर्वज्ञ स सर्ववित्'** जो पुरुष विशेष सर्वजड़चेतन पदार्थ को द्रव्यत्वादि सामान्य रूपसे जानता है तथा जो सकल पदार्थ के विशेष रूपसे तत्तद्व्यक्तित्व रूपसे जानता है।

Scanned by CamScanner ankurnagpal108@gmail.com

देशकाल तत्तद्गुण तत्तत्स्वरूप से जानता है तथा जगद्व्यापार में सर्वथा शक्तिमान् है वेही परमेश्वर श्रीरामजी हैं।

पुनः जो सर्वसाक्षी है। अर्थात् भवपरम्परा से सम्पादित जो अग्निहोत्रादिक वेद विहित कर्म तादृश कर्मफल के भोक्ता जो जीव समुदाय उन जीवों का जो शुभाशुभ कर्म है तादृश कर्म का, इस शुभाशुभ कर्म को पूर्वप्रमाणान्तरागम्य कहते हैं। तथा वह कर्म अतीन्द्रिय है। इसलिए एतादृश कर्म को कोई प्रमाणान्तर से नहीं जाना जाता है। किन्तु ईश्वर मात्र उसको देखते हैं। इसलिए ईश्वर सर्व कर्मफल का द्रष्टा साक्षी कहलाते हैं। श्रुति भी इस विषय को लेकर के कहती है-

'साक्षी चेता केवलो निर्गुणश्च' इति

अर्थात् सर्वजगत् का कारण सर्वशक्तिमान् परमेश्वर साक्षी है। अर्थात् स्वकीय कर्मफल के भोक्ता जीवराशि का जो फलजनक कर्म शुभाशुभरूप अतीन्द्रिय प्रमाणान्तरागम्य है तादृश जीव कर्म को सदा देखनेवाले हैं।

तथा परमेश्वर चेता ज्ञान रूप है। तथा केवल-मलरहित ज्ञानानन्द रूप है। क्योंकि-**'ज्ञानानन्दमयोऽमलः'** इत्यादि वचन के बल से मल रहित ज्ञानानन्दात्मकत्व सिद्ध होता है तथा परमेश्वर केवल है। अर्थात् प्राकृतिक सर्व विकार रहित होने से केवल कहलाते हैं। और, **'निर्गुणश्च'** निर्गुण हैं अर्थात् **'नेति नेति' 'अस्थूल मनणु'** इत्यादि श्रुति सिद्ध प्राकृतिक विकारी सकल गुण से रहित होने से निर्गुण कहलाते हैं। नतु असंख्येय श्रुतिप्रतिपादित अनन्त कल्याणगुण रहित हैं। अन्यथा गुणवत्व प्रतिपादक श्रुतिविरोध होगा। इस श्रुति घटक, **'निर्गुण'** विशेष का यथार्थ रूप से अर्थ न समझ करके अनेक पण्डितंमम्यवादि ईश्वर को निराकार मान करके साकार वाद का निराकरण प्रयत्न से पथभ्रष्ट हो गये भक्ति-प्रपत्ति रहित हो जाने से। प्रकृत शब्द की व्याख्या आचार्य चरण ने ऐसा ही किया है-

'निर्गता निकृष्टाः सत्वादयः प्राकृतागुणा यस्मात्तन्निर्गुणमिति व्युत्पत्तेर्निकृष्टगुणराहित्यमेव निर्गुणत्वम्' (आनन्दभाष्य १।१।२।)

तथा **'कूटस्थः'** इति। वह जगत्कारण परमेश्वर कूटस्थ है। कूट नाम है पत्थर के खण्ड का अथवा अयोघन का। उसकी तरह सर्वदा एक रूप से अवस्थित रहता हो। जिस तरह प्रस्तर खण्ड पर पानी पडे, कि सूर्यनारायण का प्रखर किरण पडे तथापि

Scanned by CamScanner ankurnagpal108@gmail.com

उस प्रस्तर खण्ड में किसी प्रकार का विकार नहीं होता है। उसी तरह परमेश्वर सर्वदा सुखदुःखादि रूप विकार से रहित होने के कारण कूटस्थ कहलाते हैं।

(सुखदुःखाद्युपाधिसंभेदरहित इति ।) तथा **'एकः'** परमेश्वर एक है। नतु जड़ तथा जीव के समान अनेक अनन्त है। क्योंकि ईश्वर में अनेकता न लोक सिद्ध है न वा शास्त्र सिद्ध है। अथवा एक है अद्वितीय है, सजातीय द्वितीय रहित है अथवा द्वितीय शब्द का अर्थ होता है सहायक, 'असिद्वितीयोनुससारपाण्डवम्' यहाँ द्वितीय शब्द सहायक वाची है। तो ईश्वर अद्वितीय सर्वसहायक रहित है। स्वयमेव सर्व सहाय रूप है। समाभ्यधिक विवर्जित है।

'बहु शुभगुणवानिति' तथा सर्वेश्वर वे श्रीरामजी अनेक शरणागतवत्सलत्वा दिक रूप जो कल्याण शुभगुण हैं तादृशानन्त कल्याण गुणवान् है। अनन्त कल्याण गुणवान् कथन से हेय सकलगुण रहितत्व अभिव्यञ्जित होता है। तथा वह **अव्यय** है। सर्वप्रकारक विनाश रहित है। न तो गुण द्वारा इनका विनाश होता है नवा घटा दिवत् स्वरूप से विनाश होता है। **'अजोपिसन्नव्ययात्मा भूतानामीश्वरोपिसन्'**

इत्यादि स्मृतियों में अव्ययत्व-अविनाशित्व का प्रतिपादन किया गया है। **'विश्वभर्ता'** इति। यह परमात्मा समस्त चराचर जगत् का भर्ता स्वामी है। भरण पोषण करनेवाले हैं अर्थात् उत्पन्न इस जगत् का स्थितिकाल में रक्षक पालक हैं। भक्त के ऊपर आनेवाला आपद से रक्षण करते हुए पालक हैं ॥८॥

'श्रीमानर्च्यः' इत्यादि। वह परमेश्वर श्रीमान् है अर्थात् लीलाविभूति, भोगविभूति तथा नित्यविभूति रूप जो श्री, तादृश श्री से नित्य युक्त हैं। श्रीमान् में नित्य योगार्थक मतुप् प्रत्यय है अर्थात् इन विभूतित्रय से भगवान् श्रीरामजी सर्वदा युक्त रहते हैं। नतु लौकिक श्रीमान् की तरह अव्याप्यवृत्ति श्रीमान् हैं, अर्थात् कभी श्रीयुक्त रहते हैं, कभी नहीं ऐसा नहीं किन्तु सर्वदा श्रीसमेत ही रहते हैं। अथवा विदेहजा रूप श्री से सर्वदा संयुक्त हैं।

'अनन्याराघवेणाहं भास्करेण यथा प्रभा' इत्यादि वचन प्रामाण्य से श्रीसीता लक्षण श्री से सर्वदा युक्त हैं। अथवा शोभारूप श्री से युक्त हैं। अथवा धनधान्यादिक श्री से सर्वदा सम्मिलित हैं।

'भगवान् रामचन्द्रोऽर्च्यः पूजनीयः' वे भगवान् श्रीरामचन्द्रजी अर्च्य हैं।

Scanned by CamScanner ankurnagpal108@gmail.com

अर्चन पूजन करने के योग्य हैं। अर्थात् सर्वशेषी परब्रह्म के शरीररूप जो ब्रह्मा विष्णु रुद्र प्रभृतिक प्रभावशाली देव हैं उनसे भी पूजनीय हैं। **'तीर्थास्पदं शिवविरञ्चिनुतं शरण्यम्'** (भागवत) इस महर्षि वचन से जब सर्वशरीरी भगवान् श्रीरामजी ब्रह्मादिक के भी पूज्य हैं तब तो साधारण देवों तथा मनुष्य प्रभृतिक सर्व प्राणियों से पूज्य हैं यह बात कैमुतिक न्याय से सिद्ध होता है। तथा भगवान् श्रीरामजी शरण्य हैं। अथवा शरण में आये हुए व्यक्ति को सांसारिक तापों से विमुक्त करके सर्वदा भय वर्जित परम पद को प्रदान करते हैं। ऐसा महर्षि वचन है-

'सकृदेव प्रपन्नाय तवास्मीति च याचते।
अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम ॥'

ऐसा स्वयं श्रीकोसलेन्द्र सरकार का फरमान है। इससे यह सिद्ध होता है कि श्रीकोसलेन्द्र सरकार के समान अथवा उनसे बड़ा कोई शरणागतवत्सल नहीं है। क्योंकि ये तो अनेक भवोपार्जित दुस्तर संसार सागर से भी पार लगाकर परम पद को प्राप्त करानेवाले हैं।

तथा **'योगिगम्यांघ्रिपद्मः'** इति। योगी जो श्रीसनक श्रीसनन्दन श्रीसनातन एवं श्रीसनत्कुमार प्रभृतिक योगशील महर्षि लोग हैं उन लोगों से गम्य प्राप्य है चरणकमल जिनका, तादृश भगवान् श्रीरामजी हैं। अर्थात् भगवान् का चरणकमल अकृत पुण्यकर्मा, अत एव असंस्कृत अन्तःकरणवाले व्यक्तियों से प्राप्त नहीं होता है। किन्तु पूर्वकथित महापुरुषों से ही प्राप्त होता है। जिस तरह वैदिक कर्मों में द्विजाति का अधिकार है ऐसा नियम है। ऐसा नियम यहाँ नहीं भगवान् श्रीकृष्णजी ने कहा है-

'येऽपि स्युः पापयोनयः।
स्त्रीयो वैश्यास्तथा शूद्रास्तेपि यान्ति पराङ्गतिम् ॥
किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा ॥
अनित्यमसुखं लोकमिमं प्राप्य भजस्वमामिति ॥'

अनेक नीच योनिक तथा स्त्री प्रभृतिक भक्तों का उद्धार श्रीकोसलेन्द्र सरकार ने किया है। ऐसा पौराणिक वीर्ता भी लोक में प्रचलित है।

कविकुल कोकिल गोस्वामी श्रीतुलसीदासजी का यह गान तो उनके विश्व

Scanned by CamScanner ankurnagpal108@gmail.com

गुरुत्व सडिंडिमनाद फरमा रहा है-

पाई न केहि गति, पतीत-पावन राम भजि सुनु सठ मना ।
गनिका, अजामिल, व्याध, गीध, गजादि खल तारे घना ।
आभीर, जवन, किरात, खस, स्वपचादि अति अघरूपजे ।
कहि नाम वारक तेऽपि पावन होहिं, राम ! नमानि ते । (मानस)

पुनः भगवान् '**अस्पृश्यः क्लेशादिभिरिति** । क्लेश कर्म विपाक आशयादिकों से अस्पृष्ट है ! पतञ्जली ने कहा है-**क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः**।

इसमें अविद्याऽस्मिता रागद्वेष और अभिनिवेश ये योगशास्त्रोक्त पांच नाम हैं क्लेश के । अतद्वत् में जो तत्प्रकारक ज्ञान उसको अविद्या कहते हैं । जैसे शरीर में आत्मज्ञान, आत्मा में शरीरत्व प्रकारक ज्ञान वगैरह को अविद्या कहते हैं। अस्मिता-इसका विशेष लक्षण योगसूत्र विवरण में देखिये । राग-अनुराग द्वेष परद्रोह भावना अभिनिवेश मरणत्रास जो कि ब्रह्मा से लेकर कीट पतङ्ग पर्यन्त मरणत्रास समान रूप से होता है । यह अविद्या ही अस्मिता, रागद्वेष और अभिनिवेश इन चारों का कारण है । कर्म शब्द का अर्थ होता है शुभाशुभ पुण्यपाप । इनका जो फल है उसको विपाक कहते हैं । जिसको योगशास्त्र में कहा है-जाति, आयु और भोग सुखादि रूप का अनुभव । तथा आशय संस्कार वासना । इन सबों से असम्बद्ध पुरुष विशेष को ईश्वर कहते हैं । ऐसा पुरुष विशेष को ईश्वर समझना-ऐसा योगमत है । इसका विशेष विवरण योगसूत्रविवरण से जानिए । विस्तार के भय से यहाँ संक्षेप में बतलाया गया है ।

'**सत्समुदितसुयशाः**' इति । सज्जन विद्वान् श्रीवाल्मीकि श्रीव्यासादि प्रवर मनिषियों से समुदित है अर्थात् समीचीन रूपसे लोक में वर्णित है सुयश सुश्लोक नतु निन्दा श्लोक जिनका-एतादृश भगवान् श्रीरामचन्द्रजी हैं । श्रीवाल्मीकि मुनि ने श्रीमद्रामायण ग्रन्थ में विस्तार रूप से सबको अपने अधीन करनेवाले रावण वाली प्रभृति का तथा अति दुस्तर समुद्रबन्धन वगैरह अनेक यशस्कर कार्य का वर्णन किया है । इसलिए वर्णनीय नायक में उदात्तत्व तथा लोकोत्तरत्व की अभिव्यक्ति होती है। तथा '**सूरि मान्यः**' इति । वह भगवान् सूरि अर्थात् नित्यमुक्त जो श्रीहनुमान् प्रभृतिक सूरि हैं उन सबों से मान्य पूजनीय हैं । '**सदा पश्यन्ति सूरयः**' इस वचन से सिद्ध

Scanned by CamScanner
ankurnagpal108@gmail.com

होता है कि नित्य सूरिगण सर्वदा ईश्वर का पूजन करते हैं। तथा **वदान्यः** चतुर्वर्ग धर्मार्थ काममोक्ष फल को देनेवाले हैं। एतादृश ईश्वर गुणसम्पन्न भगवान् श्रीरामचन्द्रजी हैं। **'सुमहित महिमा साधुवैदेरशेषैरिति'** साधु समीचीनरूप से यथा हो तथा शाश्वत सर्वदा अशेषनिखिल सभी वेदों से प्रतिपादित है महिमा महत्त्व जिनका। तथा **'निर्मृत्युः'** जो श्रीरामजी मृत्यु से सर्वदा रहित हैं तदुक्तम्-**'विवेश वैष्णवं तेजः सशरीरः सहानुजः'** शरीर तथा सोदरों के साथ वैष्णव तेज स्वदिव्य धाम श्रीसाकेत में प्रविष्ट हो गए इस वचन से सिद्ध होता है कि भगवान् मृत्यु रहित हैं। और भगवान् मृत्यु जयी हैं। और भगवान् सर्वशक्तिमान् हैं। **'परास्य शक्तिर्विविधैव श्रूयते'** इस श्रुति से सिद्ध होता है कि समाभ्यधिक विवर्जित अत्युत्कृष्ट शक्ति ईश्वर में है। तथा जिस ईश्वर में जरा वृद्धावस्था नहीं है किसी प्रकार का रजोगुण प्रयुक्त मल नहीं है **'अपहत पाप्मा विजरो विमृत्यु'** ईश्वर सकल पाप कर्म से रहित है। जरावस्था से रहित है तथा सकल मलीन कर्म पाप से रहित है।

तथा, **'विधिभवप्रमुखैर्गीर्मनोभ्यामगम्यः'** इति। ब्रह्मा विष्णु महादेव प्रभृतिक महानुभावों के भी वाणी मन से अगम्य हैं। प्राप्त करने के अयोग्य हैं। **'यतो वाचो निवर्तन्तेऽप्राप्य मनसा सह'** इतिश्रुतेः।

अर्थात् जिस परमात्मा से यह मन वाणी के साथ-साथ परम तत्व का अप्राप्त करके निवृत्त हो जाता है। अर्थात् परमात्मा वाणी मन से ग्रहण करने के योग्य नहीं है। प्राकृत रूपादि के सहकार से पदार्थ ग्राहक चक्षुरादिक से परमात्मा का ग्रहण नहीं होता है। जब विधिभव प्रमुख देव भी मनोद्वारा परमात्मा को प्राप्त नहीं कर सकते हैं तब तदीतर व्यक्तियों की तो कथा ही क्या अर्थात् इतर व्यक्तियों के वाणी मन से तो सर्वथा अप्राप्य हैं। इस तरह सर्वनियामक सर्वान्तर्यामी सर्वशेषी चेतनाचेतन शरीरक जगज्जन्मादि कारणीभूत हेयप्रत्यनीक अनन्त कल्याण गुणक सकल वेद प्रतिपादित भगवान् श्रीसीतानाथ सकल लोकाधिपति ही परमेश्वर हैं यह सिद्ध होता है।

इसप्रकार विगत प्रकरण से आचार्यश्री ने परमतत्त्व का निरूपण किया। तथा उससे पूर्व जड़चेतन प्रकृति जीव का भी यथा साध्य निरूपण किया गया। इस तरह 'किं तत्त्वम्' ऐसा जो प्रथम प्रश्न जगद्गुरु श्रीसुरसुरानन्दाचार्यजी का था, उसका समाधान किया गया ॥९॥

❋ श्रीवैष्णवमताब्जभास्कर किरणे प्रथमपरिच्छेदः ❋

Scanned by CamScanner
ankurhagpati08@gmail.com

卐 अथ द्वितीयपरिच्छेदे जप्यात्मकरहस्यत्रयनिरूपणम् 卐

सञ्जप्यस्तारकाख्योमनुवर इह तैर्वह्निबीजं यदादौ-
रामो ङेप्रत्ययान्तो रसमितशुभदस्वक्षरः स्यान्नमोन्तः ।
मन्त्रो रामद्वयाख्यः सकृदितिचरमप्रान्वितो गुह्यगुह्यो-
भूताक्ष्युत्संख्यवर्णः सुकृतिभिरनिशं मोक्षकामैर्निषेव्यः ॥१॥

एतावता प्रबन्धेन किं तत्वमिति प्रथमप्रश्नविषयीभूतप्रकृतिजीवेश्वरतत्त्वानि स्वरूपगुणाभ्यामुपदिश्य ततः परं 'किं जाप्यमित्याकारकद्वितीयप्रश्नविषयवस्तु यथावदुत्तरयितुमाचार्यः संप्रत्युपक्रमते सञ्जप्यस्तारकारख्यः इत्यादि श्लोकम् ।

'यदादौ' यस्याक्षरसमुदायात्मकमन्त्रस्यादौ प्रथमं मनुवर मन्यते इतिमनुर्मन्त्रः तस्मिन् वर श्रेष्ठतमवह्निबीजं । रामिति भवेत् अन्तेऽवसाने भवेत् नमः इति मध्ये तु चतुर्थ्येकवचन ङे प्रत्ययः ततश्च ङे प्रत्ययघटितो रामः तस्यादौ वह्निबीजमन्ते नमः इति पदम्, एवं च 'रां रामाय नमः' एतादृशो मन्त्राकारः फलितो भवति । अयं च मन्त्रः, 'रसमितशुभदस्वक्षरः' रससंख्यया प्रमितः कल्याणकारिप्रसन्नषड्वर्णसमुदायैरलंकृतः ततश्रुतिस्मृत्यादिषु प्रसिद्धतरः तारकाख्यः तारकनामकोराजमन्त्र एवेह तैः मोक्षेच्छुभिर्मनुष्यैः सञ्जप्यो जपनीयो भवतीति । पुनश्चायं नैतावदेव जपनीयः किन्तु मोक्षकामनावद्भिः पुरुषैः 'सकृदिति चरमप्रान्वितः' 'सकृदेव प्रपन्नाय तवास्मीति च याचते । अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम ॥' इत्यन्तिममन्त्रेण संयुतः । एतादृशोमन्त्रराजोऽतिगोप्यः । स च भूत्ताक्ष्युत्संख्यवर्णः भूताक्षिसंख्यामिलितपञ्चविंशतिवर्णसमुदाययुक्तः श्रीरामस्य द्वयनामकोमन्त्रः 'श्रीमद्रामचन्द्रचरणौ शरणं प्रपद्ये श्रीमते रामचन्द्राय नमः' एतादृशो हि तारक मन्त्रराजः श्रेयस्कामैर्विरक्तैर्वा सर्वैरपि सर्वदा जप्तुं योग्यः । फलं च यथाप्रतिज्ञानुसारेणैव भवतीति ।

अयमर्थः-इतः पूर्वं किंतत्त्वमिति प्रश्नस्य तत्त्वं त्रिविधं प्रधानपुरुषपरमे

Scanned by CamScanner ankurnagpal108@gmail.com

श्वररूपेण । तत्र चेतनाचेतनेश्वराणां तत्वानां स्वरूपं विचिन्त्य प्रथमप्रश्नं समाधाय ततः परम्, 'किं जाप्यमिति द्वितीयं श्रीसुरसुरानन्दाचार्यीयं प्रश्नमुत्तरयितुमुपक्रमते 'सञ्जप्यस्तारकाख्यः' इत्यादि । तारकाख्यो हि मन्त्रराजः श्रुतिस्मृतिपुराणादिप्रसिद्धः धर्मार्थकाममोक्षफलकामैः सर्वदैवोपासनीयः । कीदृशस्तारकाख्यो मन्त्रस्तत्राहः यदादाविति । यस्य मन्त्रराजस्यादौ पूर्वभागे वैष्णवमन्त्रेष्वपि वर 'मनुते इति मन्त्रः तेषु श्रेष्ठ वह्नि बीजं रामित्याकारकं विद्यते मध्ये चतुर्थ्येकवचन ङे प्रत्ययान्तो रामेति पदं भवति, अवसाने च नम इति अव्ययपदं विद्यते ततश्च 'रां रामाय नमः' इत्याकारकं मन्त्रराजस्वरूपं फलति स च मन्त्रराजः 'रसमित शुभदस्वक्षरः' रसैर्मधुरादिभेदभिन्नषट्त्वसंख्यया मितानि परिमितानि शुभ कल्याणप्रदायकानि अर्थात् मोक्षान्तफलदायकानि अक्षराणि वर्णाः विराजन्ते यस्मिन् मन्त्रराजे स रसमितशुभदस्वक्षरः । तथा च, 'रां रामाय नमः' इत्याकारकं मन्त्रराजस्य रूपनिष्पन्नं भवति । अपि च अयं मन्त्रो रामद्वयाख्यः वारद्वयं रामपदघटितो मन्त्रराजतां लभते, 'श्रीमद्रामचन्द्रचरणौ शरणं प्रपद्ये श्रीमते रामचन्द्राय नमः' एतादृशोऽयं मन्त्रो जपनीयः । यश्च, 'सकृदिति चरमप्रान्वितो भवद् गुह्यगुह्यो भवति । अर्थात् 'सकृदेव प्रपन्नाय तवास्मीति याचते । अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं ममेति । चरमेणान्तिमेन प्रान्वितो युक्तः सन् गोप्यगोपनीयो भवति । अर्थादनधिकारिणेऽसूयकादिभ्यो न कथमपि प्रकाशनीयः । पुनश्च रामद्वयाख्योमन्त्रः पञ्चविशतिसंख्याकवर्णविशिष्टः सन्नेव धर्मार्थकाममोक्षाख्यपुरुषार्थकामुकैः सर्वै र्नियमेन सेवनीयः । अर्थात् संसारविरक्तैर्मोक्षकामुकैरनुक्षणं मन्त्रोऽयं जपनीय इति भावः ॥१॥

इसके पूर्व में लोकोपकार की इच्छा से जगद्गुरु श्रीसुरसुरानन्दाचार्यजी से पूछा हुआ-तत्त्व क्या है ! इस प्रश्न का चित् अचित् और ईश्वर ये तीन तत्त्व हैं, ऐसा उत्तर देकर के तदनन्तर पूर्वोक्त चिदचिदादि तत्त्वत्रय विषयक ज्ञान का प्रधान साधन जो मन्त्रराज का जप है, तादृश मन्त्रराज विषयक '**किञ्च जाप्यम्**' इत्याकारक जो द्वितीय प्रश्न है, उस प्रश्न का समाधान करने के लिए आचार्यश्री उपक्रम करते हैं '**सञ्जप्यस्तारकाख्यः**' इत्यादि । हे सुरसुरानन्द ! उस मन्त्र का जप करना चाहिए

Scanned by CamScanner ankurnagpal108@gmail.com

जिसको सम्प्रदाय के पूर्वाचार्य महर्षियों ने तारक मन्त्र-ऐसा नामकरण किया है। जिस अक्षर समुदयात्मक मन्त्र के आदि में तो सर्वबीज श्रेष्ठ अग्निबीज रां है। और मध्य में चतुर्थ्यन्त रामपद है। और अन्त में 'नमः' इत्याकारक पद है। अर्थात् **'रां रामाय नमः'** एतादृश स्वरूप उस तारक मन्त्र का है। वह मन्त्रराज शुभकल्याणकारी सुप्रसन्न अर्थात् मनोहर छ (रां, रा.मा.य. न. मः) इत्याकारक अक्षरों से युक्त मन्त्रराज कहलाता है। तथा, 'सकृदेव प्रपन्नाय तवास्मीति च याचते' इत्यादि चरममन्त्र से युक्त होने पर, 'श्रीमद्रामचन्द्रचरणौ शरणं प्रपद्ये श्रीमते रामचन्द्राय नमः' मन्त्रराज नाम को प्राप्त करता है। यह श्रीरामचन्द्रजी का द्वय नामक मन्त्र पुरुषार्थ प्राप्ति की इच्छा वाले व्यक्तियों से सदैव जप करने के योग्य है अतः इसीका जाप करना चाहिए।

जो व्यक्ति सम्प्रदायान्तर के दुराग्रहरूप वागुरा में फँसकर के कल्पवृक्ष के समान शरणागत व्यक्ति को सद्यः सर्वफल प्रदाता इस मन्त्रराज को छोड़कर अन्य मन्त्र के द्वारा देवतान्तर की उपासना करने के आग्रह को नहीं छोड़ते हैं वे व्यक्ति- 'तृषितो जाह्नवीतीरे कूपं खनति दुर्मति' इस न्याय विषयता का अतिक्रमण नहीं करते हैं। यह मन्त्रराज कल्पवृक्षादिक में भी सर्वफल प्रदातृत्व सामर्थ्य को देनेवाला है। क्योंकि भगवान् श्रीरामजी सर्वशक्ति सर्वशेषी हैं। प्रकृत मन्त्रराज की विशेष चर्चा अन्यत्र की जायगी इति संक्षेपः ॥१॥

卐 श्रीमन्त्रराजरहस्यम् 卐

मन्त्राणां व्यापकानां भगवत इह चाव्यापकानान्तुमध्ये
ऽतिश्रेष्ठो व्यापकः स श्रुतिमुनिसुमतः शिष्टमुख्यैर्गृहीतः ।
नित्यानामाश्रयोऽयं परितउरुशुभो राममन्त्रः प्रधानः-
प्राप्योऽथप्रापकश्च प्रचुरतरगुणज्ञानशक्त्यादिकानाम् ॥२॥

'इह' इदं पदस्य सर्वनामत्वेन सर्वनाम्नः स्वप्रक्रान्तपरामर्शकतया प्रक्रान्त समस्तशास्त्रप्रतिपादितमन्त्रमध्ये जगज्जन्मादिकारणभगवतः सर्वावतारी सर्वेश्वर श्रीरामस्य परमात्मनो ये मन्त्राः श्रेष्ठाः, तेषां वैष्णवमन्त्राणामव्यापकानां मध्ये ये व्यापका मन्त्रास्ते श्रेष्ठाः, एतेषां व्यापकमन्त्राणां मध्येऽपि योऽयं श्रीराममन्त्रः स तु अतिश्रेष्ठः। यतः श्रुतिस्मृतिसंमतः श्रुतिस्मृतिभ्यां प्रमाणितः श्रीअगस्तिव्यास

Scanned by CamScanner ankurnagpal108@gmail.com

पराशरप्रभृतिकशिष्टमुनिपुङ्गवैर्गृहीतो लोकेभ्यः समुपदिष्टश्च । नित्यानां प्रचुरतर गुणज्ञानशक्त्यादिकानामयं मन्त्रराज आश्रयोऽधिष्ठानरूपः, अथ प्रापको मोक्ष स्य शुभः परमशोभनरूपः । परितः सर्वेभ्योवैष्णवावैष्णवव्यापकमन्त्रेभ्यः प्रधा नमतीवश्रेष्ठः श्रेष्ठतम एतादृशोऽयं श्रीराममन्त्रः प्राप्य आचार्योपसत्तिद्वारेण गुरुभ्यः प्राप्तुं योग्यः । एतादृशो महामहिमकः श्रीराममन्त्रस्तारकाख्यो विरक्ता चार्यमुखादेव तिलकतुलसीमालाकण्ठीधारणपूर्वकं गृहीतव्यो यथाशास्त्रं पञ्चसंस्काररीत्या यथाशक्तिप्रतिदिनं श्रीरामकैङ्कर्यसंपादयन् रात्रिंदिवमतन्द्रितो-भूत्वा जपनीयश्चेति ।

भावार्थस्तु प्रकृतश्रीराममन्त्रस्य प्राचीनाचार्या इत्थमुद्गिरन्ति तथाहि-इतः परं वैदिकावैदिकवरुणादिमान्त्रिकामान्त्रिकदेवतान्तराणां ये मन्त्राः सन्ति सहस्रसः, तन्मन्त्रापेक्षया वैष्णवमन्त्राणां श्रेष्ठत्वं ख्यापयन् तादृशमन्त्रेष्वपि 'ॐ नारायणाय विद्महि वासुदेवाय धीमहि तन्नो विष्णुः प्रचोदयात्' एतादृशवैष्णवगायत्र्यामु-पास्यत्वेन श्रुतस्य, तथा 'नृसिंहार्कवराहाणां प्रसादात्प्रणवस्य च । स्वनाम पूर्व काश्चेति मन्त्राश्चव्यापकाः स्मृता ॥ 'व्यापकेषु च मन्त्रेषु सिद्धारिंनैव चिन्तयेत् इत्यादिस्मृतिप्रमाणेन व्यापकश्रेष्ठनारायणवासुदेवविष्णुमन्त्राणां तत्वं प्रकाशयत् तत्रापि सर्वप्रथमतया श्रेष्ठनारायणमन्त्रमपेक्ष्यापि तारकाख्यस्य मन्त्रस्य गूढार्थक तया 'नास्तिचाष्टाक्षरात्परः' 'नमन्त्रोऽष्टाक्षरात्परः' इत्यादिस्थले 'श्रीरामः शरणं मम' इतिमन्त्रस्य सद्भिः परिगृहीतस्य मन्त्रान्तरेभ्योऽतिक्षेष्ठत्वप्रतिपादनायाचार्य उपक्रमते 'मन्त्राणां व्यापकानाम्' इत्यादि । भगवद्व्यतिरिक्तदेवतान्तरमन्त्रान पेक्ष्य श्रेष्ठानां परमेश्वरस्वरूपप्रतिपादकत्वेन व्यापकानाम्, तथा परमेश्वरावतार तदीयगुणादि-एकैकप्रतिपादकतयाऽव्यापकानां मध्ये, न चोपास्यस्यैकत्वेन तन्मन्त्रस्याप्येकत्वेनैवभाव्यं तत्कथं मन्त्राणामित्यत्र बहुत्वं कथितमितिवाच्यम् । परमेश्वरगुणराशिवत् गुणपरिवाहरूपतदीयावताराणामनेकत्वेन बहुत्वसंभवात् मन्त्राणामित्यत्र बहुत्वनिर्देशः । परमेश्वरजन्मनोऽनेकत्वं तु 'अजायमानो बहु धाऽभिजायते' 'बहुनि मे व्यतीतानि जन्मानि तवचार्जुन' इत्यतो ज्ञेयम्, एवं च तत्तत्प्रकाशकमन्त्रा अप्यनेका एव, 'अनन्ता वै भगवन्मत्राः' इत्युक्तेः ।

एतादृशव्यापकाव्यापकमन्त्राणां मध्ये श्रुतिमुनिसुमतः शिष्टमुख्यैर्व्यासा

Scanned by CamScanner ankurnagpal108@gmail.com

दिभिः परिगृहीतस्तारकाख्यो राममन्त्रो व्यापकोऽतीव श्रेष्ठः । गुप्तपरिभाषणात्म कमत्रिगुप्तपरिभाषणे इति धातोरौणादिकप्रत्यये कृतेनिष्पन्नोमन्त्रशब्दः 'अतएव गोप्यगोप्य इतिकथितम् । अयं श्रीराममन्त्रो नित्यानामाश्रयः तथाहि रीयन्ते वि ध्वंसन्ते इति राःक्षयशीलाः पदार्था रीङ्क्षये इतिधातुस्ततोऽप्रत्यये कृते रा इति रूपम् । राः क्षयिष्णवो न भवन्तीति राः नित्यापदार्थाः विनापिप्रत्यये पूर्वोत्तर पदयो लोप इतिव्याकरणनियमात् । अथवा परमेश्वराश्रितत्वात् प्रलयेऽपि निरन्तरं राजन्ते इति रा नित्याः पदार्थाः 'प्रलये न व्यथन्ति ते' इति वचनात् । ते रा पदबोध्यापदार्था इमे ज्ञानानन्दामलत्वादिकाज्ञानशक्त्यादयो वात्सल्यादयश्च दिव्यात्मगुणाः दिव्यमङ्गलविग्रहकान्तिसुकुमारादिकाः, दिव्यमङ्गलविग्रहादि-गुणाः भूषणानि दिव्यायुधानि नित्यसूरयः छत्रचामरप्रभृतिपरिचरणसाधनं द्वार पाला गणाधिपा मुक्ताः परमाकाशो मूलप्रकृतिर्बद्धजीवाः कालो महदादिवि कारा ब्रह्माण्डानि तदन्तर्गतपदार्थास्ते नित्यपदवाच्याः । तत्र ज्ञानाद्यारभ्यकाल पर्यन्तपदार्थाः स्वरूपतो नित्याः कदापि नच्यवन्ते । महदादिकाविकारास्तु प्रवा हतो नित्याः, यथा गाङ्गजलं प्रतिक्षणं प्रवहनशीलं प्रवाहरूपेण विनष्टं न भवति तथैव जन्या महदादिका ब्रह्माण्डान्ताः पदार्थाः प्रातिस्विकरूपेणागमापायिनो भवन्तोऽपि द्रव्यसत्तादिरूपेण स्थिता भवन्तः प्रवाहनित्या इति कथिता भवन्ति। सत्वे सति उत्पत्तिविनाशात्यन्ताभाववत्त्वम्, उत्पत्तिविनाशयोग्यत्वे सति पूर्व रूपानन्यथाभाववत्त्वमित्युक्तेः । इत्यत उपर्युक्ताः पदार्थाः राः पदबोध्या भव न्ति । एतेषामामः, तत्र अम् गत्यादिषु इतिधातोर्निष्पन्नोयम् आमशब्दः स चाम शब्दः प्राप्यवाची ततश्च रा पदबोध्यानाम्, आमः प्राप्यो यः स रामः । अम्य तेऽनेनेति करणव्युत्पत्यात्वयं प्रापकवाची अर्थात् आमः अत्र अमगत्यादिषु इति अमधातोर्निष्पन्नोऽयमामशब्दः 'ये गत्यर्थकास्तेप्राप्त्यर्थकाः' इतिनियमेन अम्य ते प्राप्यते इति आमः 'अकर्तरि च कारके संज्ञायाम्' इतिसूत्रेण अमधातोः कर्म णि घञि कर्मव्युत्पत्तिं कृत्वा आम इति भवति स च प्राप्यवाची । अम्यते प्राप्यतेऽनेनेति करणव्युत्पत्या तु स एव प्रापकवाची भवति । 'यतो वा इमानि भूतानि जायन्ते....यत्प्रयन्त्यभिसंविशन्ति' इतिश्रुत्यनुसारेण अमन्ति गच्छन्ति अस्मिन्नित्यधिकरणव्युत्पत्या तु आश्रयाभिन्नाधिकरणवाचको भवति अयमाम

Scanned by CamScanner ankurnagpal108@gmail.com

शब्दः । ततश्च रा पदवाच्यानां ज्ञानानन्दादयारभ्य ब्रह्माण्डान्तानां स्वरूपतः प्रवाहतो नित्यानां प्राकृतिकाप्राकृतिकसर्वपदार्थानाम् आमः प्राप्यः प्रापकस्तथा सर्वाधारश्च यो भवति स रामपदवाच्यो भवति एतावता परिदृश्यमानसर्वपदार्थापेक्षया श्रीरामस्यपरत्वमभिव्यञ्जितम् । ततश्चैतादृशपरमात्मबोधकश्रीराममन्त्रस्य व्यापकाव्यापकसर्वश्रेष्ठत्वसर्वश्रुत्यादिसंमतत्वशिष्टपरिगृहीतत्वकथनं युक्तियुक्तमेवेतिसारः ।

अपि च रा आम आधारो यस्य भवति स रामः एतावता सर्वान्तर्यामित्वं श्रीरामस्य सिद्ध्यति । न च लक्षणादोषग्रस्तत्वान्न सर्वत्र बहुव्रीहिः साधुरितिवाच्यं श्रुत्यनुरोधात्तथा स्वीकारेऽपि क्षतेरभावात् । कण्ठेकाल इत्यादिप्रामाणिकप्रयोगदर्शनेन व्यधिकरणबहुव्रीहेरपि साधुत्वात् । 'अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा 'यः पृथिव्यांतिष्ठन्' 'अन्तर्बहिश्च तत्सर्वं व्याप्यनारायणः स्थितः । 'भवान्नारायणो देवः श्रीमांश्चक्रायुधोहरिः' 'महार्णवेशयानोऽप्सु मां त्वं पूर्वमजीजनः' इत्यादिसर्ववाक्यानामेकवाक्यत्वे कृते श्रीनृसिंहवराहनारायणादिपदानामपि वाच्यो भगवान् श्रीसीतापतिरेव सर्वशेषितयाभिव्यञ्जितः श्रुतिस्मृत्यादिभिः । देवतान्तरवाचकपदानामेकैकवाचकत्वेनेश्वरत्वासाधकत्वात् । किन्तु ते देवा भगवतो रामस्य प्रकाररूपा इति तेऽपि स्वप्रकारिणमेव बोधयन्ति शरीरवाचकपदानां शरीरिपर्यन्तबोधकत्वं मनुष्यादिस्थले दृष्टत्वेन सर्वशरीरी श्रीराम एवेश्वरः । तदाहुर्भाष्यकाराः-ब्रह्मशब्दश्चमहापुरुषादिपदवेदनीयनिरस्ताखिलदोषमनवधिकातिशयासंख्येयकल्याणगुणगणं भगवन्तं श्रीराममेवाह, सामान्यवाचकानां पदानां विशेषार्थे पर्यवसानात् । तदाह वृत्तिकारः-विशेषार्थेन सामान्यार्थोऽवसीयत इति (बो.वृ.) (आनन्दभाष्यम् १।१।१)

एवं श्रीरामतापनीयश्रीवाल्मीकीयश्रीमद्रामायणवशिष्ठसंहितागीतादिश्रुतिस्मृतिप्रभृतिग्रन्थेभ्यः सर्वेश्वरश्रीरामस्यैवेश्वरत्वमायाति ॥२॥

अतीत प्रकरण से चित् अचित् तथा ईश्वरतत्व का निर्वचन के द्वारा परम प्राप्य श्रीवैष्णव संमत भगवान् श्रीसीतानाथजी के ईश्वरतत्व का सांङ्गोपाङ्ग विवेचन किया गया है । उस विवेचित परमतत्व-प्राप्य परमेश्वर का जो उपासना है वह ऐहिक तथा पारलौकिक स्वर्गादि फल देनेवाला है, इतना ही नहीं स्वर्ग से भी अत्यधिक श्रेष्ठ

Scanned by CamScanner ankurnagpal108@gmail.com

श्रीसाकेतधाम प्राप्तिरूप मोक्षात्मक परम फल प्रदाता है। आचार्य श्रीउदयन ने कहा है-

'स्वर्गापवर्गयोर्मार्गमामनन्तिमनीषिणः ।

यदुपास्तिमसावत्र परमात्मा निरुप्यते ॥' इति ।

एतादृश सर्वव्यापक सर्वजगत् का कारण भगवान् का उपासन भगवन्नाम वाचक मन्त्र जप द्वारा सम्पन्न होता है। पतञ्जलि मुनि ने कहा है कि-**'तस्य वाचकः प्रणवः'** ईश्वर का वाचक प्रणवादिक मन्त्र हैं। क्योंकि आगे पुनः कहा है-**'तन्मन्त्र जपस्तदर्थपरिभावनम्'** ईश्वर का वाचक जो मन्त्र है उस मन्त्र का जप करना चाहिए तथा मन्त्र का जो अर्थ विषय है उसका अनुचिन्तन करना चाहिए। अर्थात् प्रत्यक्ष समानाकार तैलधारावदविच्छिन्न प्रत्यय प्रवाहरूप ध्यान करना चाहिए। अतः प्रकृत में सर्वकारण सर्वशेषितया अभिमत भगवान् श्रीरामजी के मन्त्र का जप करने के पूर्व उस मन्त्र का यथावत् स्वरूप का परिचय आवश्यक है। यह जान करके आचार्यश्री ने प्रथमतः स्वरूप गुणादि द्वारा जाप्य भगवान् के मन्त्र का स्वरूप को बतलाया।

अर्थात् जगदाचार्यजी ने पूर्व श्लोक में जिस मन्त्र के जप करने से जीव को मोक्षान्त फल प्राप्त होता है कहे उस तारक नामक मन्त्र का स्वरूप, श्रीरामद्वयाख्य **'श्रीमद्रामचन्द्रचरणौ शरणं प्रपद्ये श्रीमते रामचन्द्राय नमः'** ऐसा बतलाया है।

इसके वाद इस जपनीय तारक मन्त्र का वैभव व्यापकत्वादिकों का दिग्दर्शन कराने के लिए उपक्रम करते हैं, **'मन्त्राणां व्यापकानामित्यादि ।'**

समस्त साङ्गोपाङ्ग वेदादिकशास्त्रों में प्रतिपादित कर्मों में तथा उपासनाओं में मन्त्र हैं अर्थात् देवान्तरों के जितने मन्त्र शास्त्रों में प्रतिपादित हैं उनमें चराचर का अभिन्न निमित्तोपादान कारण भगवान् श्रीरामजी का जो मन्त्र है वह श्रेष्ठ है। इसमें भी श्रीनृसिंहवराहादि अवतारों का जो मन्त्र हैं वे अव्यापक मन्त्र हैं। अर्थात् एक देवमात्र के प्रति चरितार्थ होनेवाले मन्त्र अव्यापक मन्त्र कहलाते हैं तो मन्त्रान्तर मन्त्रापेक्षया अव्यापक मन्त्र श्रेष्ठ कहा गया है। उन अव्यापक वैष्णव मन्त्र के अपेक्षा से यह व्यापक मन्त्र अतिश्रेष्ठ है। इन अव्यापक तथा व्यापक सर्वमन्त्रों का भी व्यापक मन्त्र श्रीराममन्त्र श्रेष्ठ है। यह सर्वव्यापक श्रीराममन्त्र श्रुति स्मृति तथा मुनियों से सम्मत है। तथा शिष्टों में अग्रसर जो अगस्ति पराशर वगैरह हैं उनसे परिगृहीत है। अर्थात् इन मुनियों ने इसका यथावत् अनुष्ठान किया है तथा अद्यावधि व्यापका

Scanned by CamScanner ankurnagpal108@gmail.com

व्यापक सर्वमन्त्र श्रेष्ठ इस श्रीराममन्त्र का अनुष्ठान करते हैं। तथा नित्य जो अनन्त ज्ञानादि गुण तथा, 'स्वाभाविकी ज्ञानबलक्रिया च' इत्यादि श्रुति समर्थित हेय प्रत्यनीक ज्ञानशक्ति प्रभृतिक कल्याण गुण समुदाय हैं उन नित्य गुण समुदायों का यह तारक मन्त्र आश्रय है अर्थात् प्रापक है। अर्थात्-'राम' के अन्दर दो पद हैं एक तो **'रा'** दूसरा **'आम'** इसमें र पद नित्य ज्ञानानन्द बल वीर्य शक्ति वगैरह का बोधक है और आम शब्द प्राप्त्यर्थक अम् धातु से निष्पन्न है वहाँ **अम्यन्ते प्राप्यन्ते ज्ञानादि पदवाच्या गुणा येन स रामः** इस करण व्युत्पत्ति से र पद वाच्य ज्ञानादि नित्यगुण समुदाय का प्रापक रामपद समुदायात्मक मन्त्र है ऐसा अर्थ होता है। इसलिए राममन्त्र जो शब्दात्मक है वह भी प्रापक सिद्ध होता है। यद्यपि प्रापकत्व धर्म चेतन का है अचेतन में प्रापकता नहीं है। राम यह नाम शब्दात्मक होने से इसमें करण व्युत्पत्ति के बल से प्रापकत्व कहना अयुक्तप्राय होता है। तथापि **'शब्द तथा अर्थ में तादात्म्य है'** इस सिद्धान्त के अनुसार कहा गया है। अर्थात् नाम जो श्रीरामात्मक शब्द समुदाय तथा नामी जो श्रीसाकेताधिपति परमेश्वर ये दोनों एक अभिन्न हैं और अर्थरूप राम में जब सर्व प्रापकत्व सामर्थ्य है। तब तदभिन्न शब्दात्मक राम में भी याचित मण्डन न्याय से सर्व प्रापकत्व करण व्युत्पत्ति के द्वारा समर्थन करना अनुचित नहीं है। शब्द तथा अर्थ में तादात्म्य तो पतञ्जलि मुनि का इष्ट है ही। वेदान्तियों ने भी-**'अतः प्रभवात् प्रत्यक्षानुमानाभ्याम्'** इस ब्रह्मसूत्र में स्थिर किया है। एवं भक्त प्रवर जगद्गुरु श्रीतुलसीदासजी ने भी कहा है-

'गिरा अरथ जल बीचि सम कहियत भिन्न न भिन्न।
वन्दौ सीतारामपद जिनहि परमप्रियखिन्न ॥ इति।

जिस तरह शब्द तथा तत्प्रतिपाद्य पदार्थ को भिन्न कहा जाता है कहते हैं परन्तु शब्द अर्थ वस्तुतः भिन्न नहीं है। यथा वा जल तथा तदीय वीचितरंग है। इनमें कहने के लिए भेद तो है क्योंकि यह जल है तथा यह जल सम्बन्धी तरंग है। परन्तु एतादृश प्रतिभासमान व्यवहार विषयीभूत दोनों पदार्थ वस्तुतः भिन्न नहीं है। क्योंकि जलतत्त्व दोनों में जल तथा तदीय तरंगों में समान रूपसे अनुस्यूत है। सिद्धान्त में परिणामी कारण तथा कार्य में तादात्म्य माना गया है। अन्यथा गवाश्व की तरह कार्यकारण भाव ही नहीं होगा। श्रुति भी 'वाचारंभणं विकारो नामधेयं मृत्ति

Scanned by CamScanner ankurnagpal108@gmail.com

केत्येव सत्यम्' इत्यादिक कारण से अतिरिक्त कार्य को नहीं कहती है। एवं 'वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये' इत्यादि सूक्ति से कालिदास ने भी शब्दार्थ का तादात्म्य माना है। एतादृश परमोपास्य परमेश्वर श्रीसीतारामजी वन्दन का विषय हैं। जिस परमेश्वर को गरीब अर्थात् अनात्मज्ञ व्यक्ति परमप्रिय है। जो आत्मतत्त्व को नहीं जानता है वह गरीब कृपण कहलाता है वारंवार संसार में परिभ्रमण करने से तो प्रकृत में जिस तरह शब्दार्थ में जलतरंग में अभेद है, उसी तरह श्रीसीतारामात्मक अर्थ में तथा उस अर्थ का वाचक जो पद है अर्थात् मन्त्रात्मक पद है, मन्त्रवाचक है, भगवान् वाच्य हैं! तो वाच्य रामात्मक अर्थ परमेश्वर में जिस तरह नित्य ज्ञानादिक गुण तथा परमपद प्रापकत्व है उसी तरह रामात्मक अर्थ में अभिन्न तद्वाचक जो राममन्त्र तारकाख्य है उसमें भी करण व्युत्पत्ति से प्रापकत्व सिद्ध होता है। अपि च-**'र पदवाच्याः अम्यन्ते प्रलीयन्ते यस्मिन् स रामः'** इसप्रकार अधिकरण व्युत्पत्ति करके सभी पदार्थों का लय समय में निवास परमेश्वर में होता है। उसी तरह श्रीरामाभिन्न रामवाचक पदात्मक मन्त्र में भी होता है। इसप्रकार महामहिम श्रीरामजी का तारक मन्त्र देवतान्तर मन्त्रापेक्षया तथा अव्यापक और व्यापक वैष्णव मन्त्रापेक्षया अतिश्रेष्ठ है ऐसा सिद्ध होता है। इस बात को आचार्यश्री ने प्रकृत श्लोक से सिद्ध किया है। तथा यह तारक श्रीराम महामन्त्र परम शुभ है। क्योंकि संसारानल ताप से अनादिकाल से सन्तप्त जीव भाग्यवश प्राप्त किसी श्रेष्ठ गुरु को प्राप्त करके तादृश गुरु के उपदेश से इस तारक महामन्त्र को प्राप्त करके तादृश मन्त्र के बल से संसारसागर का अतिक्रमण करता हुआ परमपद को प्राप्त करता है। तथा सर्वदा के लिए श्रीरामजी भगवान् का कैङ्कर्य करता हुआ परमपद को प्राप्त कर कृतार्थ हो जाता है। अतः परम शुभ मोक्ष का प्रापक तारक मन्त्र को भी-**'आयुर्वै घृतम्'** की तरह कारण में भी कार्यगत धर्म का आरोप करके परम पद के कारण तारक मन्त्र में भी परम शुभत्व होता है।

इस श्रीराममन्त्र का माहात्म्य सर्वमन्त्र से उत्तम है यह अगस्त्यादिक संहिता में कहा है-

'सुतीक्ष्ण मन्त्रवर्गेषु श्रेष्ठो वैष्णव उच्यते।
गाणपत्येषु शैवेषु शाक्तसौरेष्वभीष्टदः'

Scanned by CamScanner ankurnagpal108@gmail.com

Scanned by CamScanner

'वैष्णवेष्वपि सर्वेषु राममन्त्रः फलाधिकः ।
मन्त्रराज इति प्रोक्तः सर्वेषामुत्तमोत्तमः ॥' इति ।

एवं-बृहद्ब्रह्मसंहिता में भी-

'श्रीराममन्त्रराजस्य माहात्म्यं गिरिजापतिः ।
जानाति भगवान् शंभुर्ज्वलत्पावकलोचनः ॥'

शारदातिलक में भी कहा है-

'वेदानां च यथा सामवेदज्ञो जायते वरम् ।
तथा समस्तमन्त्राणां राममन्त्रः प्रकीर्तितः ॥'

'विश्वरूपस्य ते राम ! विश्वशद्वा हि वाचकाः ।
तथैव मूलमन्त्रस्ते विश्वेषां वीजमक्षयम् ॥'

'अचिन्त्योयं महाबाहो ! मन्त्रश्चिन्तामणिर्विभो ।
विहायैनं विमूढात्मा ततश्चेतश्च धावति ॥' इति ।

अर्थात् हे श्रीरामजी ! समस्त जगत् शरीरक होने से आप जिस तरह सम्पूर्ण जगत् स्वरूप हैं, उसी तरह जड़चेतन सभी पदार्थ वाचक जो मनुष्य स्थावरादि पद हैं वे सबके सब आपके ही वाचक हैं । हे सर्वव्यापक महाबाहु ! यह जो आपका **'रां रामाय नमः'** इत्याकारक अचिन्त्यि प्रभाव का मन्त्र है वह चिन्तामणि मणि के समान तथा कल्पवृक्ष की तरह अप्रत्यासित अघटीत सकल फलों को देनेवाला है। मूर्ख अन्य सम्प्रदायाभिनिविष्टः मूढ पुरुष इस अचिन्त्य प्रभावक श्रीराममन्त्र का निरादर करके इतस्ततः देवान्तर मन्त्रान्तर की तरफ दौड़ लगाता है । जिस तरह पिपाषित पुरुष गंगाजी के किनारे पानी पीने के लिए कूप खोदता है । इसप्रकार से स्कन्दादिक पुराणों में श्रीराममन्त्र के माहात्म्य का वर्णन किया है ।

'मन्त्ररूपं प्रवक्षामि श्रृणु नारद तत्परः ।
रकारादिमकारान्तं मन्त्रं षड् वर्णसंज्ञितम् ॥

'षडक्षरात्मकं मन्त्रं तारकं ब्रह्म संज्ञकम्' अर्थात् अगस्त्यजी नारदजी से कहते हैं कि-'हे नारद ! आप सावधान होकर के सुनें मैं आपको तारक मन्त्र के स्वरूप को बतलाता हूँ । रेफ से लेकर के मकार पर्यन्त छ वर्णों से युक्त छ अक्षरवाला **'रां रामाय नमः'** इत्याकारक ब्रह्म संज्ञक तारक मन्त्रराज है । ऐसा

अगस्त्यजी ने श्रीनारदजी सदृश विरक्त महानुभाव को सुनाया है ।

'अहं दिशामि ते मन्त्रं तारकं ब्रह्मसंज्ञितम् ।
एवं मन्त्रश्च विज्ञेयस्तारकश्चेति संज्ञितः ॥'

'कल्पद्रुम इति स्फीतः साधकानां फलप्रदः ।
सर्वेषां मन्त्रवर्णानां श्रेष्ठो वैष्णव उच्यते ॥'

'तेषु वैष्णवमन्त्रेषु राममन्त्रः फलाधिकः ॥'

अर्थात् महादेवजी कहते हैं कि मैं तुमको ब्रह्मसंज्ञित तारक मन्त्र का उपदेश देता हूँ इसको तुम मन्त्र समझो तथा इसी को तारक भी समझो । संसार सागर से पार उतारनेवाला है । इसलिए इसका नाम तारक मन्त्र होता है । यद्यपि मन्त्रान्तर भी मन्त्र है । तथापि यह मन्त्र होता हुआ तारक भी है । अतः वैष्णवावैष्णव सभी मन्त्र में श्रेष्ठ है । इसी बात को महादेव स्वयं बतलाते हैं-'**कल्पद्रुम इति स्फीत**' इत्यादि । यह मन्त्र कल्पवृक्ष के समान अति रमणीय है । तथा जो साधक इसका जाप करते हैं उन्हें सर्वफल को देनेवाला है । सभी मन्त्र में श्रेष्ठ वैष्णव मन्त्र हैं उन वैष्णव मन्त्रों में भी अत्यधिक फल को देनेवाला यह श्रीराममहामन्त्र '**रां रामाय नमः**' है। इस तरह शिवसंहिता में भगवान् शिवजी ने इस श्रीराममन्त्र का उपर्युक्त रूपमें माहात्म्य का वर्णन किया है ।

इस तरह सर्वव्यापक तथा सब मन्त्रों में प्रधान जो श्रीराममहामन्त्र है वह विरक्त श्रीवैष्णव आचार्य से प्राप्त करने के योग्य प्राप्य है । तथा प्राप्त करके जपनीय है इस बात को सनत्कुमार संहिता में कहा है-'**श्रीरामेति परं जाप्यं तारकं ब्रह्म संज्ञकम् । ब्रह्महत्यादिपापघ्नमिति वेदविदोविदुरिति**' अर्थात् सनत्कुमारजी कहते हैं-'हे नारद ! ब्रह्म संज्ञक तारक यह श्रीराममन्त्र परम जपनीय है । ब्रह्महत्या प्रभृतिक सकल पापों का विनाशक है । ऐसा वेद को जाननेवाले विद्वान् लोग कहते हैं ।

यह षडक्षर श्रीराममन्त्र उपासक पुरुष को गर्भवास जन्म मरणादि रूप महाभय से छुटकारा करा देता है । इसलिए इस श्रीराममन्त्र को तारक मन्त्र कहते हैं । एतादृश षडक्षर मन्त्रराज परम जाप्य है इसप्रकार परम जपनीय जो श्रीराममहा मन्त्र है वह-'**परीक्ष्य कर्मचितान् लोकान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन स तद्विज्ञानार्थं गुरुमुपसदेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ।**' अर्थात् शुभाशुभ

Scanned by CamScanner ankurnagpal108@gmail.com

कर्म द्वारा प्राप्त जो लोक उसकी परीक्षा करके ब्राह्मण अधिकारी वैराग्य का सम्पादन करे, वह मन में विचार करे कि अन्य समस्त क्रिया से प्राप्त नहीं होनेवाला मोक्ष केवल अग्नि होत्रादिक कर्म से प्राप्त नहीं हो सकता है। किन्तु तत्वत्रय के ज्ञान से ही होगा। इसलिए तत्त्वत्रयान्तर्गत श्रीसीतापति रूप परमब्रह्म को जानने के लिये श्रोत्रिय ब्रह्मनिष्ठ गुरु के पास समित्पाणि होकर के जाय। एतादृश शान्तदान्तादि गुणविशिष्ट समागत अधिकारी को गुरु यथासम्प्रदाय परम गोपनीय श्रीराममन्त्र का उपदेश करे। तदनन्तर वह अधिकारी गुरूपदिष्ट प्रकार से यथोक्त मन्त्र का जाप कर परम पद का भागी बनें। प्रकृत विषय का विशेष विवेचन मन्त्रराजमीमांसा-विवरण में देखें ॥२॥

यावद्वेदार्थगर्भं प्रणवि जगदुदाधारभूतं सविन्दु
प्रव्यक्तं रामबीजं श्रुतिमुनिगदितोत्कृष्टषड्व्याप्तिभेदम् ।
रेफारूढत्रिमूर्तिप्रचुरतरमहाशक्तिविश्वोन्निदानं
शश्वत्संराजते यद्विविधसकलसंभासमानप्रपञ्चम् ॥३॥

गुरोः सकाशाद् भक्तिश्रद्धाभ्यां मन्त्रराजश्रीराममन्त्रमवाप्य तादृशमन्त्रस्य जपः कर्तव्यो मोक्षादिफलकामिनेति कथितम्। तत्र यस्य कस्यचिद्वामन्त्रो भवतु स तु स्वार्थानुसन्धानपूर्वक एव जपनीयः, अर्थाननुसन्धानपूर्वकजपस्य निषेधात्। तदुक्तं 'गीतीशीघ्रीशिरः कम्पी तथा लिखितपाठकः। अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः' इत्यादिनानिषिध्य-'माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः। धैर्यलयसमर्थश्च षडेतेपाठका गुणाः' इत्यादिना पाणिनीयशिक्षायामभिधानात् 'रां' एतद्बीजप्रतिपाद्यं जगत उत्पत्तिस्थितिलयकारणभूतं ब्रह्मदर्शयितुमुपक्रमते 'यावद्वेदार्थगर्भमि'त्यादि, अत्र यावद्वेदार्थगर्भमित्यादिकं श्रीरामबीजमित्याकारक विशेष्यस्य विशेषणम्। एवं 'प्रणवि' इत्यादिकमपि अनेकविशेषणमेव। 'संराजते' इति क्रियेति शेषः। यदेतत्, 'रां' इत्याकारकं श्रीरामबीजं तत् यावद्वेदार्थगर्भमित्याद्यनेकविशेषणविशिष्टं सत् शश्वत् सर्वदा संराजते इति क्रियान्वयः। तत् श्रीरामबीजं यावद्वेदार्थगर्भम्-सकलवेदार्थघटितम्, सर्वोपि वेदार्थो बीजमध्ये निविष्टो बीजे वटवृक्षवदिति।

Scanned by CamScanner ankurnagpal108@gmail.com

यथैव वटबीजस्थः प्राकृतोऽयं महाद्रुमः ।
तथैव रामबीजस्थं जगदेतच्चराचरम् ॥ इतिश्रुतेः ।

तथा तद्रामबीजं प्रणवि प्रकर्षेणनूयते समुपास्यते परमात्माऽनेनेति प्रणवः ओंकारः स विद्यते यस्मिन् तत्प्रणवि रामबीजम् अर्थादोंकारकारणं जगत्कारणा दिवदेव । तथा 'जगदुदाधारभूतम्' सकलस्थावरजङ्गमात्मकजगत उत्कृष्टाधार भूतमभिन्ननिमित्तोपादानरूपम् । तथा तद्रामबीजं सविन्दुविन्दुनासहितमुपलक्षितं वा बिन्दुना जलबिन्दुवत् । तथा तद्रामबीजं सुव्यक्तं समुत्पादितसंसारं जगतः समुत्पादकमिति प्रपञ्चमात्रस्योत्पत्तिस्थितिनिदानम् ।

तथा 'तद्रामबीजं श्रुतिमुनिगदितोत्कृष्टषड्व्याप्तिभेदम्' श्रुतिस्मृतिभिर्महर्षि प्रभृतिभिर्यदीयोत्कृष्टानां विलक्षणानां नाम, रूप, यशो, गुण, स्वरूप, मन्त्राणां षण्णामपि व्याप्तिभेदाविशेषाव्यापकत्वविशेषाश्च प्रतिपादितास्तादृशं श्रीरामबीजमिति ।

तथा तद्रामबीजं 'रेफारूढत्रिमूर्ति' बीजावयवरूपे आश्रिताः समाश्रिता ब्रह्माविष्णुमहेश्वरात्मकह्रस्वदीर्घाकारमकारात्मकावर्णविशेषा यस्य बीजानि भवन्ति तादृशमेतद्रामबीजं तदुपास्यमितिशेषः । तथा-'प्रचुरतरमहाशक्ति' जगत उत्पत्तिरक्षणप्रलयसम्पाद्रकसमाभ्यधिकविलक्षणशक्तियुक्तं तद्बीजम् । तथा तद्रामबीजम् विविधसकलसंभासमानप्रपञ्चम्' जरायुजाण्डजस्वेदजोद्भिजादि भेदभिन्नानेकप्रकारकविलक्षणप्रतिभासमानजगदधिकरणरूपम् । एतादृशं पूर्वो पदर्शितानेकप्रकारकविलक्षणविशेषणयुक्तं यत् श्रीरामबीजं 'रां' इत्याकारक-रूपम् तादृशं भगवतो बीजम् शश्वत् सर्वदेशे सर्वकाले च लीलाविभूत्यादौ समी चीनरूपेण राजते अर्थात् निगमागमप्रतिपादितमन्त्रेषु प्रधानतया राजते शोभते तिष्ठति वा । यथाऽनेकप्रकारकपौरैरधितिष्ठितग्रामे नगरे वा राजा प्रधानतया शोभते तथैव श्रीरामबीजं वेदप्रतिपादितमन्त्रेषु सम्राडिवराजते ।

तदत्र 'अत्रायं पुरुषः स्वयं ज्योतिर्भवति' 'सत्यंज्ञानमानन्दं ब्रह्म' प्रज्ञान घनः' 'ज्ञानानन्दमयोऽमलः' इत्यादिश्रुत्यादिसिद्धस्वप्रकाशचैतन्यरूपस्य, 'अस्थूलमनणु' निष्कलं निष्क्रियं शान्तम्' इत्यादिश्रुतिसिद्धमायातत्कार्यशरी रादिरहितस्य ज्ञानादिस्वरूपस्य भगवतो रामस्य कथं जगदभिन्नोपादानकारणत्व

Scanned by CamScanner ankurnagpal108@gmail.com

मिति संशये वस्तुतस्तस्य मायारहितस्यापि मायिकसत्वादिगुणत्रयात्मकजगत उत्पत्तिस्थितिलयकारणत्वं श्रुतियुक्तिभ्यां प्रतिपादयन् श्रीरामात्मकपरमेश्वराभिन्न श्रीरामीयमन्त्रराजघटकस्य रामित्याकारकबीजस्य प्रतिपाद्यमर्थं प्रदर्शयितुमुपक्रमते आचार्यः 'यावद्वेदार्थगर्भम्' इत्यादि ।

श्रुतिस्मृत्यादिप्रतिपादिततारक 'रां रामाय नमः' इत्याकारकराजमन्त्रस्यादौ प्रथमावयवतया स्थितं 'रां' इत्याकारकं यद्बीजं तत् शश्वद्राजते इतिक्रियान्वयः । यथा नगरादेः प्रथमावयवतया विद्यमानं गोपुरादिकं नगरस्यादौ स्थितमिति कथ्यते तथैव मन्त्रराजस्य प्रथमावयवेस्थितं रामितिबीजं शोभते यथा वा मालाया आदौ स्थितसुमेरुवदिति । किमाकारकं तादृशं रामितिबीजं तत्राह- 'यावद्वेदार्थगर्भम् ।'

यावन्तो वेदस्यकाण्डत्रितयात्मकस्य प्रतिपाद्या वाच्या वा वाचका वा ते सर्वे विद्यन्ते गर्भे अन्तर्मध्ये यस्येति यथा वटवृक्ष उत्पत्तिस्थितिकाले फलित पुष्पितो महातरुरपि सर्वात्मना धानामध्ये निहित एव भवति तथैव वेदप्रतिपादितो यावानर्थविषयः सर्वोपि यस्य रामिति बीजस्यान्तरेव प्रविष्ट इति । कथं रामितिबीजस्य यावद्वेदार्थगर्भत्वमितिचेदित्थम् । यथा सर्ववेदात्मकगायत्रीमन्त्रे सवितृदेवस्य तदभिन्नानेकप्रकारकमाहात्म्यविशिष्ट आदित्यान्तर्वर्ती पुरुषोत्तमो राम एव प्रतीत इति 'अन्तस्तद्धर्मोपदेशादिति' सूत्रे भाष्य-वृत्तिविवरणे प्रपञ्चितं तथैवेहापि तत्वमिति ज्ञेयम् । तदुक्तं सनत्कुमारसंहितायाम्-

'सूर्यमण्डलमध्यस्थं रामं सीतासमन्वितम् ।
नमामि पुण्डरीकाक्षममेयं गुरुतत्परमिति ॥

न च 'ध्येयः सदा सवितृमण्डलमध्यवर्ति नारायणः' इत्यादिस्थले नारायणदेवस्य सूर्यमण्डलमध्यवर्त्तित्वं प्रतिपाद्यते इति तेन विरोध इतिवाच्यं सकलवचनानामेकवातक्यत्वेन श्रीनारायणस्य श्रीरामशरीरताया एव व्यवस्थापितत्वात् । नचोभययोः परत्वं संभवतीति न भवति पूर्वापरवचनानां कोऽपि विरोध इत्येवं श्रीरामबीजस्य यावद्वेदार्थगर्भत्वमथवा नर एव नारः अयनं यस्य स नारायणः सर्वान्तर्वर्ती सर्वान्तर्यामित्वेन तत्तद्रूपत्वमिति सुस्थम् । अत्र विशेषप्रपञ्चस्तु श्रीरामपरतत्त्वनिर्णयतोऽनुसन्धेयः ।

Scanned by CamScanner ankurnagpal108@gmail.com

अपि च यदिदम् 'रां' इत्याख्यम् श्रीरामबीजम् तत्प्रणवि तत्र नूयते उपास्यतेऽनेनेति प्रणव ओंकारः स ओंकारो विद्यते यमिन् तत् प्रणवि अर्थादोंकारात्मकः प्रणवो यस्य रामबीजस्य कार्यम् यतः प्रणवमन्त्रस्य जपम् कुर्वन्तः प्रणववाच्यस्य भगवतो रामरूपार्थस्यानुचिन्तनम् कुर्वतो योगिनश्चित्तैकाग्र्यद्वारा निर्विकल्पकसमाधेः प्राप्तिदर्शनात् । 'तस्य वाचकः प्रणवः' इतियोगसूत्रानुसारेण प्रणवस्य परमेश्वरवाचकतायाः परमेश्वरस्य तद्वाच्यतायाश्च श्रवणात् । 'तज्जपस्तदर्थभावनम्' इतिभगवान् पतञ्जलिः । तस्य परमेश्वरवाचकस्य प्रणववाक्योङ्कारस्य जपम् तथा प्रणववाच्यस्यार्थस्य परमेश्वरस्यानुचिन्तनम् सम्यक् कुर्वतः साधकस्य विक्षिप्तादिदोषरहितचित्तत्वेनैकाग्र्यं भवतीत्यर्थः । तदुक्तम्-

'स्वाध्यायाद् योगमासीतयोगात्स्वाध्यायमामनेत् ।
स्वाध्याययोगसंपत्त्या परमात्माप्रकाशते' इति ॥

एतादृशपरमेश्वरप्रणिधानं झटितिनिर्विकल्पकसमाधिं भावयति तदेवेश्वरानुचिन्तनस्य फलमिति । एतादृशयथोक्तलक्षणकः ओं पदात्मकः प्रणवो विद्यते यस्मिन् तत् प्रणवि श्रीरामबीजं रामिति । तदित्थम् रामित्यत्र र.अ.आ.म् इति स्थितौ 'भवेद्वर्णागमाद्धंसः सिंहो वर्णविपर्ययात् । गूढोत्मा वर्णविकृतेर्वर्णनाशात्पृषोदरम्' इतिविलक्षणप्रभावकपृषोदरादित्वात् रकारस्याकारादेशरूपविकारे संजाते ततोविकृतरेफरूपाकारेणसहाग्रिमाकारस्य 'अकः सवर्णे दीर्घः' इत्यादिनादीर्घेकृते पुनर्दीर्घाकारस्य, उकारादेशे जाते गुणे च कृते रामितिबीजादेव प्रणवस्य स्वरूपं निष्पन्नं भवतीति स्थितिः । तदुक्तम्-

'सर्वेर्था वेदगर्भस्था वेदाश्चाष्टाक्षरेस्थिताः ।
अष्टाक्षरश्च प्रणवे अकारे प्रणवस्थितिः ॥'

'यथैव वटबीजस्थः प्राकृतश्चमहाद्रुमः ।
तथैव रामबीजस्थं जगदेतच्चराचरम् ॥ इति ।

ननु महति तदल्पस्य निवेशो भवति, नतु महतः समावेशोऽल्पाधिकरणे यथा कुण्डे वदरस्य निवेशो नतु कुण्डस्य समावेशो वदरे जायते । तत्कस्य हेतोः ? अल्पबहुत्वाभ्याम् अर्थान्महदवयवके स्वल्पावयवकस्य निवेशो नतु महदवयवकस्याल्पे वस्तुनि तत्कथमत्राल्पे रामितिबीजे महदवयवकजगतस्तदन्तर्ग

Scanned by CamScanner ankurnagpal108@gmail.com

तप्रणवादेर्वेति शङ्कायाः समाधानं दर्शयितुमिदं वचनं 'सर्वेर्थाविदगर्भस्था' इत्यादि ।

यावन्तो विषया, वाचका वा, वाच्या वा सन्ति ते सर्वेप्यर्था वेदगर्भस्था वेदगर्भे एव व्यवस्थिताः । वेदाश्च ते अष्टाक्षरे श्रीराममन्त्रे स्थिताः अष्टाक्षरश्च प्रणवे स्थितः प्रणवश्च बीजस्याकारे स्थित इति । स्वल्पेपि महतोऽवस्थानं नासंभवि ! तत्राह 'यथैव वटबीजस्थः' इत्यादि । यथा प्राकृतोऽतिमहान् वटवृक्षः स्थिति समये वटबीजे वटधानामेवावस्थितो भवति तथा महदपि एतच्चराचरं जगत् श्रीरामबीजरूपे परमकारणे तिष्ठति । अर्थात् कारणे कार्यस्यावस्थानमिति नियमः । तथा च यथा कार्यरूपो वटवृक्षः आकारप्रकाराभ्यां महान् बीजाख्ये कारणे स्थितस्तथैव सर्वकारणे बीजमन्त्रावयवेऽकारे एव एतत्स्थावर जङ्गमात्मकजगतोऽवस्थाने न कापि क्षतिः । यतः कार्यः कारणं व्याप्नोति नतु कारणं कार्यो व्याप्नोतीति नियमतसर्वकारणकारणे बीजे सर्वस्यावस्थानमिति । अत एवैतदभिप्रेत्यमहर्षिवाल्मीकिनापि श्रीमद्रामायणेऽरण्यकाण्डे-

'अग्रतः प्रययौ रामः सीतामध्ये सुमध्यमा ।
पृष्ठतस्तुधनुष्पाणिर्लक्ष्मणोनुजगामह' इति ॥ उक्तम् ।

अयमाशयः अकार-उकार-मकाराणां वर्णराशीनां सम्बन्धेन ओमित्यस्य सिद्धिर्भवतीतिस्थितिः । तत्र अग्रत इत्यत्र अकारस्यार्थः सर्वशक्तिमान्परेशो महा विभूतिनायको रामोऽवगम्यते, मध्यगत-उकारस्यार्थो विदेहजासीतेतिगृह्यते, अन्तिममकारस्यार्थो लक्ष्मणः सर्वजीवनियमनकारको भवति । तदेवमित्थंभूत प्रणवार्थ आवर्त्यमानसर्ववेदपाठजनितफलप्रदायको भवतीति । तदुक्तं भगव-ताव्यासेनापि-

'विष्णोरेकैकनामानि सर्ववेदाधिकंमतम् ।
तादृङ्नामसहस्त्रेण रामनामसमं मतमिति ॥

तदत्र महादेव-

राम रामेति रामेति रमे रामे मनोरमे ।
सहस्त्रनाम तत्तुल्यं रामनाम वरानने ॥

श्रुतिश्च-रमन्ते योगिनो यस्मिन् सत्यानन्दे चिदात्मनि ।
इतिरामपदेनासौ परं ब्रह्माभिधीयते ॥ इति ॥

Scanned by CamScanner ankurnagpal108@gmail.com

तदेवं श्रीराममन्त्रं प्रणवित्वात् सर्वस्याधारभूतं भवतीतिस्थापितवाना चार्यः ।

पुनश्च कीदृशमेतत्रामितिबीजं तत्राह, 'जगदुदाधारभूतम्' इति । तत्र उत्-उत्कृष्ट आधारोऽधिकरणम् उदाधारः जगतां चेतनाचेतनात्मक सकल-प्राकृतलोकानाम् उदाधारो जगदुदाधारस्तादृशं प्रकृतं श्रीरामबीजं रां इत्या कारकम् । रामितिबीजस्य सकलप्रपञ्चजनकत्वं तदाधारत्वं तद्विलयकारणत्वञ्च श्रुतिसिद्धम् । तथाहि, 'सदेव सोम्येदमग्रे आसीदेकमेवाद्वितीयम्' 'तदैक्षत ब-हुस्यां प्रजायेय तत्तेजोऽसृजत, 'यतोवा इमानि भूतानि जायन्ते येन जातानि जीव न्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासास्व तद्ब्रह्मेति' इत्यादिश्रुतिः श्रीरामाद भिन्नस्य रामिति श्रीराममन्त्रबीजस्य जगत उपादानत्वं निमित्तत्वं च दर्शयति । एतदेवोत्कृष्टाधारत्वं प्रपञ्चंप्रति श्रीरामवीजस्य यत् उभयविधकारणत्वमेकस्यैव अर्थात् यथा घटं प्रति उपादानत्वमात्रं मृत्तिकायाः निमित्तकारणत्वं च चेतनत्वेन कुलालस्येति तत्रोत्कृष्टाधारत्वं घटं प्रति न केवलं मृत्तिकाया नवाकुलालस्य यत उभयोरेकैककारकत्वात् इहतु तद्विलक्षणत्वम् । यत एकमेव श्रीरामवीजमुपादानं जगतस्तथा निमित्तमपि भवति लूताकीटवत् । यथा लूताकीटः तन्तूनामुपादानं निमित्तञ्च भवति तथैव प्रकृतेपि ज्ञातव्यम् । तथा च 'यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः संभवन्ति । तथाऽक्षराद्विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापियन्ति । इत्यादिश्रुतिरेकस्यैव द्विविधकारणत्वं वक्ति । एतदेवोत्कृष्टा धारत्वं जगतः प्रति रामितिबीजस्येति । तथैव श्रीरामतापनीयश्रुतिः 'सीतारामौ तन्मयावत्रपूज्यौ जातान्याभ्यां भुवनानि द्विसप्तस्थितान्येव एष सर्वेश्वर एष सर्वज्ञः एषोऽन्तर्याम्येषयोनिः सर्वस्य प्रभवाप्ययौ हि भूतानामिति । स्मृतावपि 'सर्ववेदाश्रयत्वाच्च सर्वलोकस्यकारणात् । ईश्वरप्रतिपाद्यत्वादखण्डब्रह्मवा-चक' इति । एवं 'स्त्वंविष्णुस्त्वं परंब्रह्मयोगिध्येयः सनातनः । त्वमेवसर्वदेवा नामनादिनिधनोऽव्ययः' इतिपाद्मे । 'संक्षिप्य हि पुरा लोकान्मायया स्वयमेव हि । महार्णवे शयानोऽप्सु मां त्वं पूर्वमजीजनः' इतिश्रीमद्रामायणे । तथागस्त्यसंहिता याम्-यथा घटश्च कलशः पदार्थस्याभिधायकः । तथा ब्रह्म च रामश्च नूनमे कार्थतत्परः' इति । श्रीरामतापनीयाश्रुतिरपि-एवं भूतं जगदाधारभूतं रामं

Scanned by CamScanner ankurnagpal108@gmail.com

वन्दे सच्चिदानन्दरूपम्' इति । अनेन श्रुतिस्मृतिपुराणादिभिः सकलजगतोऽभिन्ननिमित्तोपादानत्वं प्रतिपाद्य बीजस्य जगत उत्कृष्टाधारत्वं समर्थितवान् ।

पुनश्च कीदृशं रामित्याकारकं बीजं ! तत्राह 'सविन्दु' इति बिन्दुना सह वर्त्तते यत्सद्विन्दु बिन्दुविशिष्टमित्यर्थः । अयमाशयः प्रलयादनन्तरं सर्गादिकाले शद्वात्मकार्थात्मकसृष्टये परमेश्वरक्षुभितकलाकरणवत् कृततयाऽविद्याकला व्यक्तं च कथितं भवति तत् शब्दार्थवत्वं विद्याविन्दुमहत्तत्वंचेति कथ्यते ततश्च महतोऽहङ्कारात्पञ्चतन्मात्राणि समुत्पद्यन्ते तेभ्यो महाभूतानि जातानि तादृशमहाभूतेभ्य ओषधिवनस्पतिस्थावरजङ्गमसाधारणसंपूर्णस्य जगतः समुत्पत्तिरित्यर्थसर्गप्रकारः । एवं विन्दोः सकाशात् नादः शब्दजालः स च शब्दः परा पश्यन्तीमध्यमावैखरीतिभेदाच्चतुर्विधः । ततश्च स एव प्रदर्शितचतुरवस्थामनुभूय स्वरवर्णपदवाक्यसमुदायात्मको भवतीत्येवं क्रमेण शब्दसृष्टिक्रमो वर्णितो भवति । अतो वाचकशब्दसर्गस्थविन्दुपूर्वकं विन्दुना जायमानत्वात् वटधानादृष्टान्तद्वारेण विन्दुशिरस्कं तारकबीजं जानीयात् । मकारतत्वावयवद्योतकोऽमृतरूपश्चन्द्रमा भवतीति । ततश्च मन्त्रबीजमस्तके बिन्दुनादकलां प्रदर्श्य अर्थात्मकसर्गस्य स्वरूपमुक्तं भवति । तत्रार्थसृष्टिर्वाच्याभवति शब्दसर्गस्तु वाचको भवति । एवं प्रकारेण तारकमन्त्रस्थितविन्दौ सकाशादेव अर्थात्मकः शब्दात्मकश्च सर्गो जायते इति सिद्ध्यति यतोऽर्थसर्गकारणस्य महत्तत्वस्य विन्दुपदार्थेनैकरूपत्वादर्थसर्गोपि बिन्दोः कार्यमेवभवतीति ज्ञेयम् । अत्रार्थे श्रुतयोपि-

'इन्द्रियेभ्यः पराह्यर्था अर्थेभ्यश्च परं मनः ।
मनसस्तुपराबुद्धिर्बुद्धेर्यस्तुमहान् परः ॥
महतः परमव्यक्तमव्यक्तात्पुरुषः परः ।
पुरुषान्न परं किञ्चित्साकाष्ठा सा परागतिः । इति ।
'इन्द्रियाणिपराण्याहुरिन्द्रियेभ्यः परं मनः ।
मनसस्तुपराबुद्धिर्यो बुद्धेः परतस्तु सः' ॥

इत्यादिस्मृत्या च बिन्दुसाहित्यं तारकस्य सिद्धंभवतीति संक्षेपः ॥

पुनश्च कीदृशं रामित्याकारकं बीजं तत्राह 'प्रव्यक्तम्' इति । प्रव्यक्तं प्रकृष्टरूपेण समुत्पादितसंसारम् 'सु' समीचीनरूपेण व्यज्यते प्रकाश्यते स्थावर

Scanned by CamScanner ankurnagpal108@gmail.com

जङ्गमात्मकं जगत् येन तत्सुव्यक्तमिति वा रामिति बीजम् श्रीरामात्मकपरमेश्वरादभिन्नसर्वमिदं जगत् सर्गादावाविर्भावयति । यथा धान्यादिबीजेभ्योऽङ्कुरपरंपरया महान् वृक्षादिरा विर्भूतो भवति फलितश्चापि । काले पुष्पादिमांश्चापि । उत्पत्तेः पूर्वं तिरोभूतमासीद्बीजे । तथैवेदं सकलमपि जगदुत्पत्तेः पूर्वं तिरोहितं सर्वकारणे श्रीरामबीजे । सर्गादौ रामिति बीजं पुनराविर्भावयति स्वस्मिन् । तदुक्तम् 'आविर्भावयति स्वस्मिन् विलीनं सकलं जगदिति । अत इदं बीजं सुव्यक्तमिति सर्वस्य संसार जातस्याभिव्यञ्जकमित्यर्थः । अस्मिन् रामिति बीजे भगवतो रामस्य यतुर्व्यूहावतारभेदभिन्नत्वं स्पष्टतयैव प्रतीयते । तथाहि-'रमन्ते योगिनो यस्मिन् स रामः' रमयति जन्मादि दातृत्वेन जगदिति वा स्वयमन्तर्यामितया रमते जगत्सु यः स रामः । 'महर्षे त्वं समर्थोऽसि ज्ञातमेवं विधं नरम्'। 'तैर्युक्तः श्रूयताम्' 'रामोनाम जनैः श्रुतः' इत्यादिश्रीवाल्मीकिश्रीनारदप्रश्नप्रतिवचनाभ्यां नरापरपर्यायो भगवान् श्रीरामश्चतुर्व्यूहतया ज्ञायते । व्यूह प्रकारस्तु समासतः प्रदर्शितः प्राक् प्रपञ्चस्तु श्रीबोधायनमतादर्शप्रभृतिसाम्प्रदायिकग्रन्थादेव ज्ञातव्य इतिसंक्षेपः । तथापि-

'अकाराक्षरसंभूतः सौमित्रिर्विश्वभावनः ।
उकाराक्षरसंभूतः शत्रुघ्नस्तैजसात्मकः ॥
प्रज्ञात्मकस्तु भरतो मकाराक्षरसम्भवः ।
अर्द्धमात्रात्मको रामो ब्रह्मनन्दैकविग्रहः ॥
श्रीरामसान्निध्यवशाज्जगदानन्ददायिनी ।
उत्पत्तिस्थितिसंहारकारिणीं सर्वदेहिनाम् ॥
सा सीता भगवती ज्ञेया मूलप्रकृतिसंज्ञिता ।
प्रणवत्वात्प्रकृतिरिति वदन्ति ब्रह्मवादिनः ।
ओं उद्ब्रह्मात्मकसच्चिदानन्दाख्यमित्युपासितव्यम् ।

अकारः प्रथमाक्षरो भवति । उकारो द्वितीयाक्षरो भवति । मकारस्तृतीयाक्षरो भवति । अर्द्धमात्रश्चतुर्थाक्षरो भवति । बिन्दु पञ्चमाक्षरो भवति । नादः षष्ठाक्षरो भवति' । इत्यादिश्रीरामतापनीयोपनिषत्प्रदर्शितदिशा सर्वात्मकः श्रीरामः सर्वैरुपासनीय इति तु न विस्मरणीयम् ।

Scanned by CamScanner ankurnagpal108@gmail.com

'स्थूलमष्टभुजं प्रोक्तं सूक्ष्मं चैव चतुर्भुजम् । परं तु द्विभुजं रूपं....।
आनन्दो द्विविधः प्रोक्तो मूर्तश्चामूर्त एव च ।
अमूर्तस्याश्रयोमूर्तः परमात्मा नराकृतिः' ॥ (आनन्दाख्यसंहिता)
'जपतः सर्ववेदांश्च सर्वमन्त्रांश्च पार्वति ।
तस्मात्कोटिगुणं पुण्यं रामनाम्नैवलभ्यते' ॥ (इति पद्मपुराणोक्तेः)

पुनः कीदृशं रामित्याकारकं बीजम् ? तत्राह 'श्रुतिमुनिगदितोत्कृष्टषड् व्याप्तिभेदमिति तत्र श्रुतयो यजुर्वेदादिकाः मुनयो महर्षिश्रीवाल्मीकिव्यासबृहस्पतिप्रभृतिकाः एभिः श्रुतिमुनिभिर्गदिताः कथिता उत्कृष्टा अतिविलक्षणाः, नाम रूपयशो गुणस्वरूपमन्त्रप्रभेदभिन्ना ये षट् प्रकारा व्याप्तिभेदा विद्यन्ते यस्मिन् तत् श्रुतिमुनिगदितोत्कृष्टषड्व्याप्तिभेदं श्रीरामबीजमिति । तत्र प्रथमनामव्याप्तिभेद प्रदर्शकयजुर्वेदीयशाखावचनम् 'न यस्य प्रतिमाऽस्ति यस्य नाम महद् यशः' अर्थात् यस्य परमेश्वरस्य प्रतिमा सादृश्यं न कुत्रापि विद्यते तदा नामादिकानां तु कथैव केत्यर्थः । तथा 'ब्रह्मैतद्धि सर्वाणि नामानि विभर्ति' सर्वस्यापि नाम्नोद्धारकः परमात्मैवेत्यर्थः । तदत्रानुसन्धेयाः-

'जपान्ते नैव शरीरेण शरीरेण देवता दर्शनं करोति । कलौ नान्येषां भवति । यजूंषि नामेति नामैव ब्रह्मरूपेण श्रुतय आहुः' (आश्वलायनश्रुतिः)
'सदारामोऽहमित्येतत्तत्वतः प्रवदन्ति ये ।
न ते संसारिणो नूनं राम एव न संशयः' (अथर्ववेदश्रुतिः)
ऋग्वेदे स यजुर्वेदे तथैवाथर्वसामसु ।
पुराणे सोपनिषदे तथैव ज्योतिषेऽर्जुन ।
सांख्ये च योगशास्त्रे च आयुर्वेदे तथैव च ।
बहुनि मम नामानि कीर्तितानि महर्षिभिः ।
गौणानि तत्र नामानि कर्मजानि च कानि च । (महाभारते शान्तिपर्वणि)
'वेदे रामायणे शास्त्रे पुराणे भारते तथा ।
आदौ मध्ये तथा चान्ते हरिः सर्वत्र कीर्त्यते । (विष्णुरहस्ये)
यथा प्रलपते मूर्खो देशराज्यादिकं बहु ।
तथा चेत्प्रलपेद्रामं को न मुच्येत वन्धनात् ।' (बृहस्पतिस्मृतौ)

Scanned by CamScanner ankurnagpal108@gmail.com

रामनाम परं बीजं रामनाम परं जगत् ।
रामनाम परो मन्त्रो रामनाम पराक्रिया' । (ब्रह्मयामले)
'सप्तकोटिमहामन्त्राश्चित्तविभ्रमकारकाः ।
एक एव परो मन्त्रो राम इत्यक्षरद्वयम्' ।
(वृद्धमनुस्मृतौ) अतोऽवसीयते यत्सर्वोपास्यत्वं श्रीरामस्यैवेति ।

एवं परमेश्वरस्य रूपव्याप्तावपि श्रुतय एव प्रमाणम् । ननु यदि स्वभावतो विग्रहरहितनिराकारस्य कथं विग्रहवत्त्वम् । शरीरस्य कर्माधीनत्वेन परमेश्वरस्य कर्मरहितत्वादिति चेत्सत्यम् । परमेश्वरस्य हेयविग्रहवत्त्वं नास्ति तस्य कर्माधीनत्वात् किन्तु लोकोत्तरदिव्यमङ्गलविग्रहवत्त्वं त्वनेकश्रुतिसिद्धत्वादभ्युपेयमेव । कर्माधीनत्वं विग्रहस्येति नियमस्तु प्राकृतशरीरविषयक एव । दिव्यमङ्गलविग्रहवत्त्वं तु श्रुतिसिद्धत्वादभ्युपेयमेव तस्य, तथा च श्रुति 'य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते' इत्यादि । तथा 'ज्योतिषिभावाच्च' रूपोपन्यासादित्यादिसूत्रमपि परमेश्वरस्य नामरूपादिविषये प्रमाणं भवति ।

'अर्द्धमात्रात्मको रामो ब्रह्मानन्दैकविग्रहः'
'पूर्णानन्दैकविग्रहं परं ज्योतिः स्वरूपिणम्'
'द्विभुजः कुण्डली रत्नमाली धीरो धनुर्धरः' (श्रीरा.ता.श्रुतिः)
'अजायमानो बहुधा विजायते तस्य योनिं परिपश्यन्ति धीराः' शु.यजु.वे.
'अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।
प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया ।
परित्राणाय साधूनां विनाशाय च दुष्कृताम् । गीता
वेद वेद्ये परे पुंसि जाते दशरथात्मजे ।
वेदः प्राचेतसादासीत्साक्षाद्रामायणात्मना (आगम)
न भूत सङ्घसंस्थानो देहोऽस्य परमात्मनः' । भारते
'वृक्षे वृक्षे हि पश्यामि चीरकृष्णाजिनाम्बरम् ।
गृहीतधनुषं रामं पाशहस्तमिवान्तकम् ।
अपि रामसहस्राणि भीतः पश्यामि रावण ।
रामभूतमिदं सर्वमरण्यं प्रतिभाति मे । (श्रीमद्रामायणे)

Scanned by CamScanner ankurnagpal108@gmail.com

'प्रकृत्या सहितः श्यामः पीतवासा जटाधरः' (श्रीरा.ता.)

'पुरामहर्षयः सर्वे दण्डकारण्यवासिनः ।
दृष्ट्वा रामं हरिं तत्र भोक्तुमैच्छन्सुविग्रहम् ।
रामरूपनिमग्नानि पश्यच्चक्षुर्मनांसि च ।
नाप क्रष्टुं हि ते शेकुः पश्यन्तो राममच्युतम् ।
नहि कश्चिन्मनस्तस्माच्चक्षुषो वा नरोत्तमात् ।
नरश्शक्नोत्यपाक्रष्टुमतिक्रान्तेऽपि राघवे ।
यश्च रामं न पश्येत यं च रामो न पश्यति ।
निन्दितः स भवेल्लोके स्वात्माप्येनं विगर्हते ।

इत्याद्यनेक प्रमाणेन ईश्वरस्य दिव्यमङ्गलविग्रहवत्वं सिद्ध्यति । विग्रहाभावप्रतिपादकप्रमाणं तु लौकिकदेहाभावाभिप्रायकम्-न तु दिव्यस्य तस्य निषेधे प्रमाणम् । एवं भगवतो यशोगुणस्वरूपमन्त्रव्याप्तिभेदेऽपि प्रमाणवचनान्युदाहरणीयानि ।

'विष्णोर्नुकं वीर्याणि प्रवोच यः पार्थिवानि विममे रजांसि न ते विष्णोर्जायमानो न जातो देवमहिम्नः परमन्तमाय सहस्त्रधा महिमानः सहस्त्रम्' (श्रुतिः) 'काव्यं राप्रायणं कृत्स्नं सीतायाश्चरितं महत्' 'चरितं रघुनाथस्य शतकोटिप्रविस्तरम् । एकैकमक्षरं पुंसां महापातकनाशनम्' (श्रीमद्रामायणे) 'लोकवत्तु लीलाकैवल्यम्' (ब्र.सू.) 'यः सर्वज्ञः स सर्ववित्' 'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकिज्ञानबलक्रिया च (श्रुतौ) इत्यादीनि । पुनश्च कीदृशं रामित्यात्मकं बीजं तत्राह, 'रेफारूढत्रिमूर्त्ति' इति । अत्र रेफशब्देन रकारात्मको वर्णः परिगृहीतो भवति । ततश्च रेफात्मकवर्णारूढास्तदाश्रिताः यथा वृक्षे वृक्षकोटरे वा आश्रिता वानरादयो वृक्षाश्रिता इति कथ्यन्ते, तथैव रेफे आश्रिताः तिस्त्रो मूर्तयो ब्रह्माविष्णुमहेशस्वरूपा वर्णाः । अकारद्वयं मकारश्च यस्मिन् रामित्याकारकबीजे तत् रेफारूढत्रिमूर्तिः । अत्र प्रथमाकारस्वरूपो ब्रह्मा हिरण्यगर्भः, द्वितीयाकारस्वरूपो जलशायी अनन्तासनो मकारः सर्वसंहारकरुद्रस्वरूपः । इत्यतः प्रकृते त्रिमूर्तिपदेन अकारद्वयं मकारश्चेति वर्णत्रयमेवोक्तं भवतीति, रेफारूढत्रिमूर्त्ति इत्यस्यार्थः फलति ।

Scanned by CamScanner ankurnagpal108@gmail.com

अथाचेतनानां सर्गादिशक्यभाववतामकारादिवर्णत्रयाणां सर्गादिकारक चेतनब्रह्मादिस्वरूपत्वं स्यात् हिरण्यगर्भादीनां तु चेतनतया शक्तियुक्तत्वादिति कथं चेतनाचेतनयोस्तादात्म्यमित्याशङ्कामपनेतुमुपक्रमते-'प्रचुरतरमहाशक्ति' इति। प्रचुरतरा अत्यधिकविलक्षणामहती लोकोत्तरा-उत्पादस्थितिविनाशप्रयोजिका शक्तिर्विद्यते यस्य बीजस्य तत् तादृशम्। न चैतद्विवरणं बीजस्य न तु तद्घटकवर्णस्येति बीजस्यैव तादृशशक्तिर्न तु वर्णत्रयस्य संभवतीति वाच्यम्, बीजस्य तादृशशक्तिमत्वेन याचितमण्डनन्यायेन बीजघटकाचेतनवर्णानामपि प्रचुरतरशक्तिमत्वसंभवात्। यथा राज्ञो गौरवेण गौरवान्वितो राजमन्त्री राजवदेव सम्मानितो गौरवमनुभवति। यथा वा गुरोः प्रतिनिधिर्भूतो शिष्यमण्डली गुरुगौरवेण पूज्यः सत्कृतश्च भवति तथैव प्रकृतेऽपीति।

अतएव श्रीरामतापिन्यां 'रेफारूढामूर्त्तयः स्युः शक्तयस्तिस्त्र एव च' इत्यादिना शक्तित्रयस्यापि ब्रह्माविष्णुरुद्ररूपस्याकारद्वयमकारस्य च रेफारूढत्वेनार्थात् रेफाश्रितत्वेन कथनं सङ्गतं भवति युक्तियुक्तत्वादित्यादिकं विभावनीयम्।

पुनश्च कीदृशं रामिति बीजं तत्राह-'विश्वोन्निदानम्' इति। तत्र विश्वपदवाच्यसकलस्थावरजङ्गमजायमानवस्तूनां निदानमादिकारणम् अर्थात् चराचरात्मकसकलजगतो मुख्यंकारणं, तत्कारणं समाभ्यधिकविवर्जितं सहकारिविरहमन्तरेणैव केवलं स्वेच्छयैव जगत उत्पत्यादिव्यापारे सर्वथा समर्थो न तु सहायकान्तरादिसापेक्षं कुलालादिवत् घटादिकार्ये उत्पादयितव्ये।

पुनश्च 'विविधसकलसंभासमानप्रपञ्चम्' जरायुजाण्डजस्वेदजोद्भिज्जादिभेदेनानेकप्रकारकभासमाननिखिलप्रपञ्चस्याधिकरणम् अर्थात् 'तमेवभान्तमनुभाति सर्वं तस्य भासा जगदिदं विभातीति श्रुतेः प्रकाशमानसकलप्रपञ्चस्याधिकरणम् यस्य श्रीरामबीजस्य प्रकाशेनैव सर्वं जगत् प्रकाशितं भवति, तथा प्रकाशमानं सत् यस्मिन् विद्यते। तदुक्तं-श्रुत्या 'यथैव वटबीजस्थः प्राकृतश्च महाद्रुमः। तथैव रामबीजस्थं जगदेतच्चराचरम्' इति। एवं च पूर्वोक्तताद्दशविशेषणविशिष्टं रामिति बीजमेव सर्वथोपास्यं श्रेयस्कामैरिति। उपर्युक्तमर्थमनेकाः श्रुतिस्मृतयश्नानुमोदन्ते तथा च हारीतः-'रामित्येकाक्षरं रामं योगिनः समु

Scanned by CamScanner ankurnagpal108@gmail.com

पासते' इति । जगद्गुरुश्रीविजयरामाचार्यप्रणीतश्रीराममहिम्नः स्तोत्रेऽपि-

कृशानुर्बीजं ते रघुवर ! जनाः प्रीतिसहिता
भजन्ति ध्यायन्तस्तवचरणपङ्केरुहयुगम् ।
गृहे तेषां पद्मा विहरति मुखे गीः सुललिता-
सुभुक्त्वा भौगान् वै तव वरपदं यान्ति परम'मिति ॥३२॥

पिप्पलायनोप्याह-

'स्वप्रकाशः परंज्योतिः स्वानुभूत्येकचिन्मयः ।
तदेव रामचन्द्रस्य मनोराद्यक्षरं स्मृतम् ॥ इति ।
'स्वभूर्ज्योतिर्मयोऽनन्तरूपीस्वेनैवभासते ।
बीजत्वेनेदमों यस्य सृष्टिस्थितिलयस्य च ॥
कारणत्वेनचिच्छक्त्या रजः सत्त्वतमोगुणैः ।
यथैव वटबीजस्थः प्राकृतश्च महाद्रुमः ॥
तथैव रामबीजस्थं जगदेतच्चराचरम् ।
रेफारूढाः मूर्तयः स्युः शक्तयस्तिस्त्र एव चेति ॥ (श्रीरा.ता.)

अगस्तिरपि-

'श्रीराममन्त्रराजस्य सम्यगर्थोऽभिधीयते ।
संहितोपनिषन्मूलः सर्वकार्यार्थसिद्धिदः ॥
रकारोवह्निवचनः प्रकाशे पर्यवस्यति ।
सच्चिदानन्दरूपोऽस्य परमात्मार्थ उच्यते ॥
व्यञ्जनं निष्कलं ब्रह्मप्राणो मायेति च स्वरः ।
व्यञ्जनैः स्वरसंयोगो विद्धि तत्प्राणयोजनम् ॥'
रेफे ज्योतिर्मयं तस्मात्कृतमाकारयोजनम् ।
मकारोऽभ्युदयार्थत्वात्सामायेति च कीर्त्यते ।
अयमेवान्तमुत्सृज्य कार्यमेकाक्षरो मनुः ।
सोऽयं बीजं स्वकं तस्मात्समायं ब्रह्म उच्यते ।
सविन्दुः सोऽपि पुरुषशिवसूर्येन्दुरूपवान् ।
ज्योतिस्तस्य शिवोरूपं नादः स प्रकृतिर्मता ।

Scanned by CamScanner ankurnagpal108@gmail.com

प्रकृतिः पुरुषश्चोभौ समायं ब्रह्म संस्मृतौ !
विन्दुनादात्मकं बीजं वह्निः सोमकला मता ।
अग्निसोमात्मकं विश्वं रामबीजे प्रतिष्ठितम् ।

इत्यादिकम् । तदाह-भगवान् श्रीपुरुषोत्तमाचार्यबोधायनः-पुरुषोत्तमप्रपत्तिषट्के-'रामिति बीजवान् नाथ ! मन्त्रराजो हि तारकः' तथैव शिवसंहितायाम्-

'अक्षरार्थोऽधुनास्यैव विशदीक्रियते मनोः ।
बीजोक्तमुभयार्थत्वं रामनामनि दृश्यते ॥
बीजं मायाविनिर्मुक्तं परं ब्रह्मेति कीर्त्यते ।
मुक्तिदं साधकानां तन्मकारो मुक्तिदो ततः ॥
सरूपत्वादतो रामो भुक्तिमुक्तिफलप्रदः ।
आद्यस्तु तत्पदार्थस्यान्मकारस्त्वं पदार्थवान् ॥
तयोः संयोजनमसीत्यात्मा तत्त्वविदो विदुः ।
तत्त्वमस्यादि वाक्यन्तु केवलं मुक्तिदं यतः ॥
भुक्तिमुक्तिप्रदं चेदं तस्मादप्यतिरिच्यते ।
रमन्ते योगिनो नित्यं यद्वा रमयति स्वकान् ॥
निर्गुणं सच्चिदानन्दं सगुणं चेति कीर्त्यते ।
योनिलिङ्गात्मकं विश्वं रामबीजे प्रतिष्ठितम् ॥
रामबीजसमुद्भूतं बहुसोमात्मकं जगत् ।
यथैव वटबीजस्थः प्राकृतश्च महाद्रुमः ॥
तथैव रामबीजस्थं जगदेतच्चराचरम् ।

इत्यादिकानि वचनान्यत्रोदाहर्तव्यानि । विस्तृतविवेचनन्तु जगद्गुरुश्रीरामानन्दाचार्यश्रीरघुवराचार्यविरचितश्रीमन्त्रराजमीमांसातोऽनुसन्धेयम् ॥३॥

अभ्युदय तथा निःश्रेयस फल प्राप्ति के लिए क्रियमाण जो श्रीराममन्त्र का जप है वह मन्त्रार्थ के अनुसन्धान के बिना नहीं हो सकेगा । क्योंकि, प्रयोग सम्बद्ध जो अर्थ है उसका जो स्मारक हो वही मन्त्र है । ऐसा मन्त्र का लक्षण पूर्वमीमांसा में निरूपण किया गया है । अतः 'रां' इस बीज से प्रतिपाद्य सकल चराचर के जन्मादि

Scanned by CamScanner
ankurhagpati08@gmail.com